भगवंतभास्करे

मीमांसकश्रीनीलकण्ठभट्टविरचितः

दानमयूखः ।

(सप्तमः)

लेलेइत्युपाह्वव्यंकटेशशास्त्रिणा

संशोधितः ।

मुम्बय्यां

फोर्ट बेक–हाउस लेन–फोर्बस स्ट्रीट प्रविभागे

' मणिलाल इच्छाराम देसाई ' इत्यनेन स्वीये ' गुजराती न्यूस '

मुद्रणयन्त्रालये मुद्रयित्वा तत्रैव प्रकाशितः ।

विक्रमसंवत् १९८०. ख्रिस्ताब्दः १९२४.

अथ दानमयूखस्थविषयाणां अनुक्रमणिका।

विषयानुक्रमणिका ।

इति दानमयूखस्थविषयाणामनुक्रमणिका ।

‘गुजराती न्यूस’ मुद्रणालये मुद्रितानि क्रय्य-संस्कृतपुस्तकानि ।

१	दानमयूखः—	२-०-०
२	विशिष्टाद्वैताधिकरणमाला—	१-०-०
३	गणेशसहस्रनामावलिः— ग्लेज	०-३-०
४	विष्णुसहस्रनामावलिः— ,, ...	०-३-०
५	शिवसहस्रनामावलिः— ,, ...	०-३-०
६	देवीसहस्रनामावलिः— ,, ...	०-३-०
७	कुमारसंभवकाव्यम्—	मुद्रियमाणम्
८	मेघसंदेशकाव्यम्—	,,
९	स्तोत्रमुक्ताहारः—	मुद्रियमाणः
१०	श्रीमद्भागवतं चूर्णिकासहितम्—	मुद्रियमाणम्
११	उत्सर्गमयूखः—	मुद्रियमाणः
१२	प्रतिष्ठामयूखः—	,,
१३	प्रायश्चित्तमयूखः—	,,
१४	विशुद्धिमयूखः—	,,
१५	शान्तिमयूखः—	,,
१६	हिरण्यकेशीयं गृह्यसूत्रम्—...	,,
१७	ईशोपनिषद्भाष्यसमूहोपेता—	मुद्रियमाणा
१८	रघुवंशकाव्यम्—	,,
१९	किरातार्जुनीयम्—	,,
२०	**श्रीमद्वाल्मीकिरामायणम्**—सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुः श्रृङ्गबेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्ना प्रणीतया **रामायणतिलकाख्यया टीकया**, पण्डितश्रीवंशीधर-शिवसहायाभ्यां प्रणीतया **रामायणशिरोमण्याख्यया टीकया**, श्रीगोविन्दराजप्रणीतया **भूषणाख्यया टीकया** च सहितम् । सप्तधा विभज्य वस्त्रबद्धम् । पृ. सं. ३०८२	३१-०-०
	बालकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मूल्यम् रु.	३-०-०
	अयोध्याकाण्डम्—ऊर्ध्वनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	५-०-०
	अरण्यकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	२-१२-०
	किष्किन्धाकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	२-१२-०
	सुन्दरकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	३-८-०
	युद्धकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	८-०-०
	उत्तरकाण्डम्—उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	६-०-०

दानमयूखः ।

सप्तमः ७

श्रीगणेशाय नमः ॥

यो लीलया सन्तनुतेऽत्र विश्वं
तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः
शिवं तनोत्वाशु रविर्ममासौ ॥ १ ॥
श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं
तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्करस्यात्मज एष दाने
श्रीनीलकण्ठो विवृणोति कृत्यम् ॥ २ ॥

परस्वत्वोत्पत्त्यन्तो द्रव्यत्यागो दानम् । 'व्यत्ययविनिमयादयस्त्वेतद्व्याप्त्या एव दानपदप्रयोगात्' इति केचित् । परे 'प्रयोगस्य भाक्तत्वात्तद्भिन्नत्वेनापि विशेषणीयम्' इत्याहुः । दामोदरठक्कुरस्तु 'क्रयादि वारयितुमदृष्टार्थत्वेन विशेषणीयं प्रीत्यादिदाने दानपदं गौणम्' इत्यूचे । तन्न । सोमक्रयातिव्याप्त्यवारणात् । गौण्यां मानाभावाच्च । दूरस्थां पात्रोद्देशेन त्यक्तस्यापहर्ता तु प्रत्यवैत्येव । तादृशापहारे शिष्टविगानेन निषेधकल्पनात् । 'परस्वं नाददीत' इत्येवमाकारकः प्रत्यक्षस्तु निषेधो न प्रवर्तते । अपहारदशायां कस्याऽपि स्वत्वाभावात् । दातुः पुनरुत्पत्तौ तु मानाभावः । रक्षणं तु परकीयस्यापि प्रीत्यादिनोपपद्यत एव । अग्न्युद्देशत्यक्तपुरोडाशादाविव । अन्यथा तत्राऽपि पुनरुत्पत्तिप्रयोजकस्विष्टकृदादिविध्यभावेऽपि पुनरुत्पत्तिप्रसङ्गः । स्विष्टकृदादिविधिसत्त्व एव पुनरुत्पत्तिर्नान्यथा । त्यक्तोपादाने विगानादिति निर्णायितं तन्त्ररत्नादौ । न त्यागकाले स्वत्वापगमः, किं तु विप्रकर्तृकस्वीकारकाल इति तु कस्यचिद्व्याहतः प्रलाप उपेक्षणीय एव । यदि केनचित् कश्चिद्ब्राह्मणमुद्दिश्य किञ्चिद्द्रव्यं सुवर्णरजतादि ।

मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत् ।
दाता तत्फलमाप्नोति प्रतिग्राही न दोषभाक् ॥

इत्यादिवचनप्रतिपादितेन विधिनोत्सृज्य देशान्तरस्थाय तस्मै तद्द्रव्यं प्रहितम् । तच्च यदि मध्येमार्गं नष्टं चौरैर्वाऽपहृतं तदा दातुर्न कोऽपि प्रत्यवायः प्रमाणाभावात् । दानफलं तु नैव जायते । ब्राह्मणस्वत्वापत्त्यवसानकस्योत्सर्गस्याजातत्वात् । नचानेन वचसा दानानुकल्पेन पात्रोद्देश्यकः सङ्कल्प एव विधीयते, न तु पात्रस्वत्वोत्पत्तिपर्यन्तताऽपि, उद्देशमात्रश्रवणादिति वाच्यम् । प्रजापतिव्रतान्तर्गतोद्यदादित्यानीक्षणसङ्कल्पवदत्रापि फलपर्यन्तताया आवश्यकत्वात् । अन्यथा तत्रापि सङ्कल्पमात्रादेव फलं स्यात् । अस्त्विति चेन्मैवम् । 'तस्य व्रतम्' इति भावरूपव्रतोपक्रमेणाभावरूपाऽऽदित्यानीक्षणाद्युक्तिर्विरुद्धोपक्रमानुरोधात्प्रतिपालनीयस्वार्थाऽव्यभिचारिणीं भावरूपां सङ्कल्पक्रियां लक्षयति । तत्र च परिपालितेऽनीक्षणादौ व्यभिचारात्सङ्कल्पलक्षणैव दुर्घटा स्यात् । अतो न सङ्कल्पमात्रात्तत्र फलम् । किञ्चात्र वैधदेशकालावच्छेदेन पात्रहस्तप्रक्षेपासम्भवे तत्स्थाने मानसपात्रोद्देश्यको जलाधिकरणको जलप्रक्षेपो विधीयते । न तु पात्रस्वत्वापत्तिपर्यन्तताऽपि बाध्यते । पात्रदातृप्रतिग्रहीतृपदैस्त्यागप्रतिग्रहयोः प्रतीतेः । अतो न प्रतिग्रहीतृव्यापारं विनोद्देशविशिष्टजलप्रक्षेपमात्रात्फलमिति दिक् ।

यत्तु देवलः—

अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यते । इति ॥

तद्वक्ष्यमाणसात्त्विकदानोक्त्यर्थं, न दानसामान्यपरम् । इति दानस्वरूपम् ।

एतत्प्रशंसा सामवेदोपनिषदि—'दानेन सर्वान् कामानवाप्नोति चिरञ्जीवत्वम्' इति ।

व्यासः—

यद्ददासि विशिष्टेभ्यो यदश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥
ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति । इत्यादि ॥

तच्च दानं त्रेधोक्तं भगवद्गीतासु—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असंस्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥

विष्णुधर्मोत्तरे—

तामसानां फलं भुङ्क्ते तिर्यक्त्वे मानवः सदा ।
वर्णसङ्करभावेन वार्द्धके यदि वा पुनः ॥
बाल्ये वा दासभावे वा नात्र कार्या विचारणा ।
अतोऽन्यथा तु मानुष्ये राजसानां फलं भवेत् ॥
सात्त्विकानां फलं भुङ्क्ते देवत्वे नाऽत्र संशयः ।

मात्स्ये—

येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्मणा प्राप्यते लोकान् राजसस्य तथा फलम् ।
कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम् ॥

हारीतः—

मुमूर्षुस्तामसं यच्चाप्रकृतो ददाति । इति ।

अप्रकृतोऽसावधानः ।

गारुडे—

अर्हते यत्सुवर्णादि दान तत्कायिकं मतम् ।
आर्तानामभयं दद्यादेतद्धि वाचिकं स्मृतम् ॥
विद्यामादाय यज्जप्यैस्तद्दानं मानसं द्विजाः । इति ॥

अथ दानसामान्येतिकर्तव्यता ।

तत्र दानाधिकारस्तु चतुर्णामपि वर्णानां स्त्रीणां च ।

वर्णानामाश्रमाणां च चातुर्वर्ण्ये युधिष्ठिर ।

दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितम् ।

इति व्यासोक्तेः ।

स च निषादस्थपतिवद्वैदिकमन्त्रवत्स्वपि समन्त्रक एव स्त्रीशूद्रयोरविरुद्धः ।

मदनरत्ने जातूकर्ण्यः—

अधिकारी भवेच्छूद्रः पूर्तधर्मे न वैदिके ।

पूर्तधर्मास्तत्रैव स्मृत्यन्तरे—

बहिर्वेदि च यद्दानं तत्पौर्तिकमुदाहृतम् ।

तत्रैव व्यासोऽपि—

अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते । इति ॥

अथ पात्रम् ।

याज्ञवल्क्यः—

न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते । इति ॥

व्यासः—

प्रथमं तु गुरोर्दानं दत्त्वा ज्येष्ठमनुक्रमात् ।
ततोऽन्येषां तु विप्राणां दद्यात्पात्रानुरूपतः ॥

भविष्यपुराणे—

सन्निधानस्थितान्विप्रान् दौहित्रं विट्पतिं तथा ।
भागिनेयं विशेषेण तथा बन्धून्गृहागतान् ॥
नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपि दीयते ।
अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत् ॥

विट्पतिर्जामाता ।

विष्णुः—

मातृष्वसा स्वसा चैव तथैव च पितृष्वसा ।
मातामही भागिनेयी भागिनेयस्तथैव च ॥
दौहित्रश्चैव जामाता तेषु दत्तमिहाक्षयम् ।
श्रीभ्रष्टेषु तथा दत्तं तदप्यक्षय्यमुच्यते ॥
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेभ्यो दातव्यं भूतिमिच्छता ॥

व्यासः—

पितुः शतगुणं दानं सहस्रं मातुरेव च ।
अनन्तं दुहितुर्दानं सोदर्ये दत्तमक्षयम् ॥

एतत्प्रशंसामात्रम् ।

दक्षः—

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
सहस्रगुणमाचार्ये त्वनन्तं वेदपारगे ॥

व्यासः—

ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः ।
जातिमात्रोपजीवी च भवेदब्राह्मणः स तु ॥
गर्भाधानादिभिर्युक्तस्तथोपनयनेन च ।
न कर्मविन्न चाधीते स भवेद्ब्राह्मणब्रुवः ॥

तथा—

देवार्चनपरो नित्यं वित्तार्थी वत्सरत्रयम् ।
असौ देवलको नाम हव्यकव्येषु गर्हितः ॥

यत्तु बृहस्पतिना—

शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतम् ।
क्षत्रिये त्रिगुणं प्रोक्तं ब्राह्मणे षड्गुणं स्मृतम् ॥

इति शूद्रादीनामपि पात्रतोक्ता, साऽन्नाच्छादनपरा ।

अन्नाच्छादनदानेषु पात्रं नैव विचारयेत् ।
अन्नस्य क्षुधितं पात्रं विवस्त्रो वसनस्य च ॥

इति विष्णुधर्मोक्तेः । अपात्रायाऽमन्त्रकं दानम्—

मन्त्रपूर्वं तु यद्दानमपात्राय प्रदीयते ।
दातुर्निकृत्य हस्तं तु श्रोतुर्जिह्वां निकृन्तति ॥

इति शातातपोक्तेः ।

तथा—

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नाम यश्च वै वृषलीपतिः । इति ॥

अपात्रमित्यर्थः ।

अथ देयम् ।

यथाविधेन द्रव्येण यत्किञ्चित्कुरुते नरः ।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च ॥

तथाविधं शुक्लेन शुद्धं शबलेन दुःखसंमिश्रं कृष्णेनासुखोदयम् । शुक्लादिस्वरूपं तु स्मृतौ—

श्रुतशौर्यतपःकन्यायाज्यशिष्यान्वयागतम् ।
धनं सप्तविधं शुक्लमुदयोऽप्यस्य तद्विधः ॥
कुसीदकृषिवाणिज्यशिष्यशुक्लानुवृत्तितः ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥
पार्श्विकद्यूतचौर्यार्तिप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यत्तत्सर्वेषां कृष्णमुच्यते ॥ इति ॥

पार्श्विकं सर्वदा समीपस्थित्या सेवा । प्रतिरूपकं वेशान्तरग्रहणम् । शिवधर्मे—

तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ।
भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः ॥

'सर्ववित्तस्य भागपञ्चकं कृत्वा भागत्रयं जीवनार्थं, भागद्वयं धर्मार्थम्' इति हेमाद्रिः । 'भागत्रयं सर्ववित्तस्य तत्रैको भागो जीवनाय भागद्वयं धर्माय' इत्यन्ये ।

कृपणाशक्तविषये तु भारते—

एकां गां दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात् सर्वे समफलाः स्मृताः ॥ इति ॥

'गोपदं वित्तमात्रोपलक्षणार्थम् । अन्यथा पञ्चगवादेः सहस्राधिकगवादेश्च गोदानेऽनधिकारः स्यात्' इति हेमाद्रिः ।

यमः—

सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति ।
न तत्फलमवाप्नोति तत्रैव परिवर्तते ॥
यतये काञ्चनं दत्त्वा दाताऽपि नरकं व्रजेत् ।

अपिशब्दात् प्रतिग्रहीताऽपि ।

अङ्गिराः—

देवतानां गुरूणां च मातापित्रोस्तथैव च।
पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित्॥

तथा—

पापदः पापमाप्नोति नरो लक्षगुणं सदा।
पुण्यदः पुण्यमाप्नोति शतशोऽथ सहस्रशः॥

स्कान्दे—

आपत्स्वपि न देयानि नव वस्तूनि सर्वदा।
अन्वये सति सर्वस्वं दाराश्च शरणागताः॥
न्यासाधी कुलवृत्तिश्च निक्षेपः स्त्रीधनं सुतः।
यो ददाति स मूढात्मा प्रायश्चित्तैर्विशुद्धयति॥

अङ्गिराः—

बहुभ्यो न प्रदेयानि गोगृहं शयनं स्त्रियः।
विभक्तदक्षिणा ह्येता दातारं तारयन्ति हि॥

विभक्तदत्तानि पृथग्दत्तानि।

गौरेकस्यैव दातव्या न बहुभ्यः कथञ्चन।
सा हि विक्रयमापन्ना दहत्यासप्तमं कुलम्। इति॥

अग्राह्यं स्कान्दे—

अजिनं मृतशय्यां च मेषीं चोभयतोमुखीम्।
कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत्॥

अग्राह्यं प्रकृत्य तत्रैव—

हस्त्यश्वरथयानानि मृतशय्यासनादयः।

अग्राह्या इत्यर्थः। आसनं मृतस्यैव।

पद्मपुराणे—

ब्रह्माण्डं भूमिदानं च ग्राह्यं नैकेन तद्भवेत्।
अश्वं च मणिमातङ्गतिललोहानि वर्जयेत्। इति॥

वसिष्ठः—शस्त्रं विषं सुरा वाऽप्रतिग्राह्याणि ब्राह्मणस्य।

हेमाद्रौ पाद्मे—

अतिदुष्टा प्रेतशय्या न ग्राह्या द्विजसत्तमैः।
गृहीतायां च तस्यां तु पुनः संस्कारमर्हति॥

लोहं तिलाश्च महिषी तैलं लवणमेव च ।
तिलधेनुर्मणिश्चैव घोराः सप्त प्रतिग्रहाः । इति ॥

मनुः—

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतम् ।
अविद्वान्प्रतिगृह्णानो भस्मीभवति काष्ठवत् ॥
प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।
प्रतिग्रहेण विप्राणां ब्राह्मं तेजो विनश्यति ॥

इति देयद्रव्यम् ।

अथ कालाः ।

वाराहे—

दर्शे शतगुणं दानं तच्चतुर्घ्नं दिनक्षये ।
शतघ्नं तच्च संक्रान्तौ शतघ्नं विषुवे ततः ॥
युगादौ तच्छतगुणमयने तच्छताहतम् ।
सोमग्रहे तच्छतघ्नं तच्छतघ्नं रवेर्ग्रहे ॥
तच्छतघ्नं व्यतीपाते दानं वेदविदो विदुः ।

विष्णुधर्मोत्तरे—

वैशाखी कार्तिकी माघी पूर्णिमा तु महाफला ।
पौर्णमासीषु सर्वासु मासर्क्षसहितासु च ॥
दत्तानामिह दानानां फलं शतगुणं भवेत् ।
यस्यां पूर्णेन्दुना योगं याति जीवो महाबलः ॥
पौर्णमासी तु विज्ञेया महापूर्वा द्विजोत्तम ।
स्नानं दानं तथा जप्यमक्षय्यं वै तदा स्मृतम् ॥

शङ्खः—

अमावास्या तु सोमेन सप्तमी भानुना सह ।
चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
चतस्रस्तिथयस्त्वेतास्तुल्याः स्युर्ग्रहणादिभिः ।
सर्वमक्षयमत्रोक्तं स्नानदानजपादिकम् ॥
अमावास्या व्यतीपातो ग्रहणं चन्द्रसूर्ययोः ।
मन्वादयो युगादिश्च संक्रान्तिर्वैधृतिस्तथा ॥ इत्यादि ॥

भारते—

> रात्रौ दानं न शंसन्ति विना त्वभयदक्षिणाम्।
> विद्यां कन्यां द्विजश्रेष्ठ दीपमन्नं प्रतिश्रयम्॥

विनेतिपदं विद्यादिभिरपि सम्बद्ध्यते।

तथा—

> महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्।
> स्नानं तत्र न कुर्वीत काम्यं नैमित्तिकादृते॥
> नेच्छन्त्येके स्नानदानं रात्रौ मध्यमयामयोः।
> नैमित्तिकं तदा कुर्यान्नित्यं तु न मनागपि॥

उभयतोमुख्यातुरदानाभयदानान्नदानादिकं तु सर्वदा भवतीति अर्द्धप्रसूतां गां दद्यात्कालादि न विचारयेत्, इति तत्र तत्र स्पष्टम्।

अथ पुण्यदेशाः।

मनुः—

> दृषद्वतीसरस्वत्योर्देवनद्योर्यदन्तरम्।
> तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते॥
> कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः।
> एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः॥

मत्स्यो विराटदेशः। पञ्चालाः कान्यकुब्जाहिच्छत्रादिदेशाः। शूरसेनिको मथुरादिदेशः।

> हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि।
> प्रत्यगेव प्रयागाच्च मध्यदेशश्च कीर्तितः॥

विनशनमन्तर्द्धानम्।

भविष्यपुराणे—'वाराणसीकुरुक्षेत्रप्रयागपुष्करक्षेत्रगङ्गासमुद्रतीरनैमरकण्टकश्रीपर्वतमहाकालगोकर्णदेवपर्वतादीनि पुण्यानि'। इति

पाद्मे—

> लिङ्गं वा प्रतिमा वाऽपि दृश्यते यत्र कुत्रचित्।
> तत्सर्वं पुण्यतां याति दानेषु च महाफलम्॥

भविष्योत्तरे—

> क्रोशमात्रं भवेत्क्षेत्रं शिवस्य परमात्मनः।

प्राणिनां तत्र पञ्चत्वं शिवसायुज्यकारकम् ॥
फलं दत्तहुतानां च अनन्तं परिकीर्तितम् ।
मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतम् ॥
स्वयम्भुवि सहस्रं स्यादार्षे चैव तदर्द्धकम् ।

तथा—

गृहे दशगुणं दानं गोष्ठे चैव शताधिकम् ।
पुण्यतीर्थेषु साहस्रमनन्तं शिवसन्निधौ ॥

मात्स्ये—

शालग्रामसमुद्भूतः शैलचक्राङ्कमण्डितः ।
तिष्ठते यत्र वसुधे तत्क्षेत्रं योजनत्रयम् ॥
द्वारवत्याः शिला देवि मुद्रिता मम मुद्रया ।
यत्रापि नीयते तत्स्यात्क्षेत्रं द्वादशयोजनम् । इत्यादि ॥

काशीखण्डे—

अन्यत्र यत्कृतं कर्म व्रतं दानं तपो जपः ।
गङ्गातटेषु तत्सर्वं कृतं कोटिगुणं भवेत् ॥

मात्स्ये—

अग्निहोत्रगृहे चैव यदल्पमपि दीयते ।
तदनन्तफलं सर्वं भवतीति विनिश्चयः ॥

इति देशाः ।

प्रतिग्रहे देशनिषेधः ।

पाद्मे—

न तीर्थे प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ।

ब्रह्मपुराणे—

प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र न प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ॥

दानधर्मे—

भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते ॥

मात्स्येऽपि—

सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते ।

स्कान्दे—

तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते । इति ॥

इदं च गङ्गायाम् । गर्भप्रतिग्रहनिषेधः प्रसिद्धनदीषु । प्रसिद्धतरगण्डक्यादिषु तु तीरेऽपि । गङ्गायां तु क्षेत्रेपीति सर्वशिष्टाचारः ॥

अथ दातृकृत्यम् ।

मनुः—

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥

कात्यायनः—

कुशोपरि निविष्टेन तथा यज्ञोपवीतिना ।
देयं प्रतिग्रहीतव्यमन्यथा विफलं भवेत् ॥

स्मृत्यन्तरे—

दद्यात्पूर्वमुखो दानं गृह्णीयादुत्तरामुखः ।
आयुर्विवर्द्धते दातुर्ग्रहीतुः क्षीयते न तत् ॥

हेमाद्रौ—

नामगोत्रे समुच्चार्य सम्प्रदानस्य चात्मनः ।
संप्रदेयं प्रयच्छन्ति कन्यादाने तु पुंस्त्रयम् ॥

शाखामप्युच्चारयन्ति शिष्टाः । वस्त्रादिना विप्रवरणं च कुर्वन्ति मध्यदेशे ।

तथा—

नामगोत्रे समुच्चार्य सम्यक्श्रद्धान्वितो ददेत् ।
सङ्कीर्त्य देशकालादि तुभ्यं संप्रददे इति ॥

न ममेत्यपि कीर्तयन्ति शिष्टाः ।

वाराहे—

सुस्नातः सम्यगाचान्तः कृतसन्ध्यादिकक्रियः ।
कामक्रोधविहीनश्च पाखण्डस्पर्शवर्जितः ॥

दद्यादिति शेषः ।

गौतमः—

अन्तर्जानुकरं कृत्वा सकुशं सतिलोदकम् ।
फलान्यपि च सन्धाय प्रदद्याच्छ्रद्धयाऽन्वितः ॥

...।—

नामगोत्रे समुच्चार्य प्राङ्मुखो देयकीर्तनात् ।
उदङ्मुखाय विप्राय दत्त्वा तं स्वस्ति कीर्तयेत् ॥

सदेवताकदेयकीर्तनाऽनन्तरं दत्त्वेत्यर्थः ।

देवलः—

प्रदाय शाकमुष्टिं वा यस्तु श्रद्धासमन्वितः ।
महते पात्रभूताय सर्वाभ्युदयमाप्नुयात् ॥

पात्राऽसन्निधाने नारदीये—

मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत् ।
विद्यते सागरस्यान्तस्तस्यान्तो नैव विद्यते ॥

'पात्राऽसन्निधानेऽन्यविप्रकरे दानं देयम्' इति धौम्यस्मृतौ । पात्राऽसन्निधाने 'अप्सु देयं विनिक्षिपेत्' इति षट्त्रिंशन्मते । देय-पात्रासंन्निधाने तत्रैव विशेष उक्तः—

द्रव्यपात्रविकर्षश्चेत्परोक्षं दातुमुद्यतः ।
तं ध्यायाद्द्वैभवं पात्रं द्रव्यमादित्यदैवतम् ॥

तथा—

परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
गोत्रजेभ्यस्तदा दद्यात्तदभावेऽस्य बन्धुषु ॥

गोत्रजाः पात्रस्य ।

स्कान्दे—

तस्मात् प्रणवमुच्चार्य कार्यौ दानप्रतिग्रहौ ।

याज्ञवल्क्यः—

प्रतिग्रहे सूतिचक्रिध्वजिवेश्यानराधिपाः ।
दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् ॥

राजा शास्त्रातिक्रमवर्ती । 'न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रव-र्तिनः' इति स्मृतेः । तदपवादः—

अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः ।
अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः ॥

तथा—

चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात् ।
यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेत् ॥

यज्ञोद्देशेन न याचेतेत्यर्थः । प्रकारान्तरेण लब्धेन यज्ञे कृते
अत एव ज्ञायते, वैश्यादेर्यज्ञोद्देशेनाऽपि याचनीयम्, इति ।

अथ प्रतिग्रहीतृकृत्यम् ।

ॐकारमुच्चरन्प्राज्ञो द्रविणं सकुशोदकम् ।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्तयेत् ॥

पुराणान्तरे—

प्रतिग्रहीता सावित्रं सर्वत्रैवानुकीर्तयेत् ।
ततस्तु कीर्तयेत्सार्द्धं द्रव्येण द्रव्यदेवताम् ॥
समापयेत्ततः पश्चात्कामस्तुत्या प्रतिग्रहम् ।
तदन्ते कीर्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयम् ॥

सावित्री 'देवस्यत्वा' इत्यादिः ।

आदित्यपुराणे—

प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ।
मन्द्रं पठेत्तु राजन्यादुपांशु च तथा विशि ॥
मनसा तु तथा शूद्रे स्वस्ति वाचनमेव च ।
सोङ्कारं ब्राह्मणे कुर्यान्निरोङ्कारं महीपतौ ॥
उपांशु च तथा वैश्ये मनसा शूद्रजे तथा । इति ॥

प्रतिग्रहश्च दक्षिणहस्तमध्ये कर्तव्यः—

"हस्तमध्ये ब्रह्मतीर्थं दक्षिणाग्रहणे च तत्" इति [illegible]णात् ।

तथा—

प्रतिग्रहस्य यो धर्म्यं न जानाति द्विजो विधि[illegible] ।
द्रव्यस्तैन्यसमायुक्तो नरकं प्रतिपद्यते ॥
विधिं तु धर्म्यं विज्ञाय ब्राह्मणस्तु प्रतिग्रहे ।
दात्रा सह तरत्येव महादुर्गाण्यसौ ध्रुवम् । इति ॥

याज्ञवल्क्यः—

प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् । इति ॥

अप्रत्याख्येयमाह स एव—

कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः ।
मांसं शय्यासनाधानाः प्रत्याख्येयं न वारि च ॥

एधोदकं मूलफलं जलमभ्युद्यतं च यत् ।
सर्वतः प्रतिगृह्णीयान्मध्वथाऽभयदक्षिणाम् । इति ॥

एधः काष्ठम्, अभ्युद्यतमयाचितागतम् ।

तथा चाङ्गिराः—

आममांसं मधु घृतं धानाः क्षीरमथोदितम् ।
गुडं तक्रं च सङ्ग्राह्यं निवृत्तेनापि शूद्रतः ॥
खलक्षेत्रगतं धान्यं वापीकूपगतं जलम् ।
असाधोरपि तद्ग्राह्यं यच्च गोष्ठगतं पयः ॥
इक्षुः फलानि पिण्याकं प्रतिग्राह्याणि सर्वतः ।

बृहस्पतिः—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
पूर्वं सङ्कल्पितं ग्राह्यं न दोषः परिकीर्तितः । इति ॥

अत्र विवाहोत्सवयज्ञेष्विति 'यजतिषु येयजामहं करोति नानुयाजेषु' इतिवदुद्देश्यविशेषणमपि विवक्षितम् । अन्यथा विवाहोत्सवयज्ञेषु इति परिगणनं व्यर्थं स्यात् । अतोऽन्यत्र पूर्वसंकल्पितस्य सूतकादौ दोष एवेति ।

द्रव्यदेवतास्तैत्तिरीये—सोमाय वासः । रुद्राय गाम् । वरुणायाऽश्वम् । प्रजापतये पुरुषम् । मनवे तल्पम् । त्वष्ट्रेऽजाम् । पूष्णेऽविम् । निर्ऋत्या अश्वतरगर्दभैमात् हिमवते हस्तिनम् । गन्धर्वाप्सरोभ्यः स्रगलङ्करणे । विश्वेभ्यो देवेभ्यो धान्यम् । वाचेऽन्नम् । ब्रह्मण ओदनम् । समुद्रायापः । उत्तानायाऽङ्गीरसायाऽनः । वैश्वानराय रथम् । इति ॥

विष्णुधर्मोत्तरे—

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता ।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्तिताः ॥
तथा चैकशफं सर्वं कथितं यमदैवतम् ।
महिषाश्वास्तथा याम्या उष्ट्रो वा नैर्ऋतो भवेत् ॥
रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत् ।
मेषं तु वारुणं विद्याद्वराहं वैष्णवं तथा ॥
आरण्याः पशवः सर्वे कथिता वायुदेवताः ।

जलाशयांस्तु सर्वांस्तु वारिधानीं कमण्डलुम् ॥
कुम्भं च करकं चैव वारुणानि निबोधत ।
समुद्रजानि सर्वाणि वारुणानि द्विजोत्तमाः ॥
आग्नेयदैवतं प्रोक्तं सर्वलोहानि चाप्यथ ।
प्राजापत्यानि सस्यानि पक्वान्नमपि वै द्विज ॥
ज्ञेयास्तु सर्वगन्धा वै गान्धर्वाश्च विचक्षणैः ।
बार्हस्पत्यं स्मृतं वासः सौम्या ज्ञेया रसास्तथा ॥
पक्षिणश्च तथा सर्वे वायव्याः परिकीर्तिताः ।
विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च ॥
सारस्वतानि देयानि पुस्तकादीनि पण्डितैः ।
सर्वेषां शिल्पिभाण्डानां विश्वकर्मा तु दैवतम् ॥
द्रुमाणामथ पुष्पाणां शाकैर्हरितकैः सह ।
फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः ॥
मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च ।
छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ॥
उपानहौ च यानं च यच्चान्यत्प्राणिवर्जितम् ।
तत्त चाङ्गिरसत्वेन प्रतिगृह्णीत मानवः ॥
शूरोपयोगि यत्सर्वं शस्त्रवर्मध्वजादिकम् ।
रणोपकरणं सर्वं विज्ञेयं सर्वदैवतम् ॥
गृहं तु सर्वदैवत्यं यदनुक्तं द्विजोत्तम ।
विज्ञेयं विष्णुदैवत्यं सर्वं वा द्विजसत्तमाः ॥

हेमाद्रौ यजुःपाठानन्तरं—

'राजा त्वा वरुणो नयतु देवि दक्षिणे अमुकस्मै अमुकान्तेनाऽमृतत्वमश्यां वयो दात्रे मयो मह्यमस्तु प्रतिग्रहीत्रे'।

ततः कामस्तुतिः । 'ॐ स्वस्ति' इति विशेषः ।

अथ द्रव्याणां प्रतिग्रहस्थानानि ।

विष्णुधर्मोत्तरे—

भूमेः प्रतिग्रहं कुर्याद्भूमिं कुर्वन्प्रदक्षिणम् ।
करे गृहीत्वा कन्यां च दासदास्योर्द्विजोत्तमाः ॥

करं तु हृदि विन्यस्य धर्म्यो ज्ञेयः प्रतिग्रहः ।
आरुह्य तु गजस्योक्तः कर्णे वाऽश्वस्य कीर्तितः ॥
तथा चैकशफानां तु सर्वेषां च विशेषतः ।

तथा कर्णः—

प्रतिगृह्णीत तान्शृङ्गे पुच्छे कृष्णाजिनं तथा ।

तान् एकशफान् । अत्र शृङ्गिणामेकशफानां शृङ्गे इतरेषां कर्णे इति तु व्यवस्था ।

कर्णेऽजः पशवः सर्वे ग्राह्याः पुच्छे विचक्षणैः ।
गृह्णीयान्महिषं शृङ्गे खरं वै पृष्ठदेशतः ॥
प्रतिग्रहमथोष्ट्रस्य यानानां चाधिरोहणात् ।
बीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः ॥
वस्त्रं दशान्तादादद्यात्परिधायाऽथवा पुनः ।
आरुह्योपानहौ मञ्च आरुह्यैव तु पादुके ॥
वर्मध्वजौ तु संस्पृश्य प्रविश्य च तथा गृहम् ।
अवतीर्य च सर्वाणि जलस्थानानि वै द्विजाः ॥
ईषायां तु रथो ग्राह्यश्छत्रं दण्डे तथैव च ।
द्रुमांश्च प्रतिगृह्णीयान्मूलन्यस्तकरो द्विजः ॥
आयुधानि समादाय तथाऽऽमुच्य विभूषणम् ।

परिशिष्टे तु—

प्रतिगृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे ।
मूर्ध्नि दासीमजं चैव पृष्ठेऽश्वतरगर्दभौ ॥
अश्वं कर्णे सटे वाऽपि अन्नमुद्दिश्य धारयेत् ।
शय्यासनं गृहं क्षेत्रं संस्पृश्यादाय काञ्चनम् ॥
उष्ट्रं च ककुदे स्पृष्ट्वा मृगांश्च महिषादिकान् ।
गोधामश्वविधानेन पुच्छे संस्पृश्य पक्षिणः ॥
दंष्ट्रिणो दंशिनश्चैव तथा क्षुद्रमृगाश्च ये ।
ओजस्विनां च सर्वेषामेष एव विधिः स्मृतः ॥
छत्रं च चामरं मूले फलं संगृह्य गौरवात् ।
प्रगृह्योपानहौ मन्त्रं वाचयेत्प्रतिमुच्य वै ॥
वासस्त्वथ समादाय कन्यां शीर्ष्ण्यथ वै करे ।
रतिभार्यां परपूर्वां प्रतिगृह्णीत चाक्षताम् ॥

पुत्रमुत्सङ्गमारोप्य प्रतिगृह्णीत दत्तकम् ।
रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीत कूबरे ॥

कूबरो युगाधारं काष्ठम् । युग्यकाञ्चनवस्त्राणामङ्गयुक्ते प्रतिग्रहः ।

इति सामान्येतिकर्तव्यतानिरूपणम् ॥

अथ परिभाषा ।

वामनपुराणे—

सर्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥

भविष्ये—

सङ्कल्पेन विना विप्र यत्किञ्चित्कुरुते नरः ।
फलं वाऽल्पाल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत् ॥

वसिष्ठः—

जपहोमोपवासेषु धौतवस्त्रधरो भवेत् ।
अलङ्कृतः शुचिर्मौनी श्रद्धावान्विजितेन्द्रियः ॥

याज्ञवल्क्यः—

यदि वाग्यमलोपः स्याज्जप्यादिषु कथञ्चन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥

स एव—

रौद्रपित्रासुरान्मन्त्रांस्तथा चैवाभिचारिकान् ।
व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥

कात्यायनः—

पित्र्यमन्त्रानुद्रवणे आत्मालम्भेऽवमोक्षणे ।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥
मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे ।
निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत् ॥

आत्मालम्भो हृदयस्पर्शः । स च कर्मणि विहित इति केचित् ।

स्मृत्यर्थसारे—

कर्त्रङ्गानामनुक्तौ तु दक्षिणाऽङ्गं भवेत्तथा ॥

छन्दोगपरिशिष्टे—

यत्र दिङ्नियमो नास्ति जपादिषु कथञ्चन ।

तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्याऽपराजिता ॥

तत्रैव—

आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठता । इति ॥

तथा—

पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ।
दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः ॥

तथा—

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

तथा—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

विष्णुधर्मोत्तरे—

मन्त्रेणोङ्कारपूतेन स्वाहान्तेन विचक्षणः ।
स्वाहावसाने जुहुयाद्ध्यायन्वै मन्त्रदेवताम् ॥

ब्राह्मे—

शमीपलाशन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
अश्वत्थौदुम्बरौ बिल्वश्चन्दनः सरलस्तथा ॥
शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ।

कर्मप्रदीपे—

नाङ्गुलादधिका कार्या समित्स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका ।
न सपर्णा समित्कार्या होमकर्मसु जानता ॥

तथा—

प्रागग्राः समिधो ग्राह्या अखर्वा नोष्ठपाटिताः ।
काम्येषु वश्यकर्मादौ विपरीता जिघांसतः ॥
विशीर्णा विदला ह्रस्वा वक्रा बहुशिराः कृशाः ।
दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशकाः ॥

वायुपुराणे—

कण्डनं पेषणं चैव तथैवोल्लेखनं तथा।
सकृदेव पितॄणां स्याद्देवानां तन्निरुच्यते॥

भविष्यत्पुराणे—

भूमौ स्थितेन पात्रेण विष्टब्धेन च पाणिना।
वामेन यदुशार्दूल नान्तरिक्षे तु हूयते॥
धनायुर्दाररेखासु सोमतीर्थं तु मध्यमम्।
लाजादिहवनं तेन कर्तव्यं वपनं तथा॥

वपनं निर्वापः।

कात्यायनः—

पाण्याहुतिर्द्वादशपर्वपूरिका
रसादिना चेत्स्रुचि पर्वपूरिका।
दैवेन तीर्थेन तु हूयते हविः
स्वङ्गारिणि स्वर्चिषि तच्च पावके॥
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्चैव जायते॥
तस्मात्समिद्धे होतव्यं नासमिद्धे कथञ्चन।
आरोग्यमिच्छताऽऽयुश्च श्रियमात्यन्तिकीं तथा॥
जुहुयुश्च हुते चैव पाणिशूर्पस्रुवादिभिः।
न कुर्यादग्निधमनं कुर्यात्तु व्यजनादिना॥
मुखेनैव धमेदग्निं मुखाद्ध्येषोऽध्यजायत।
नाग्निं मुखेनेति तु यल्लौकिके योजयन्ति तत्॥

बह्वृचपरिशिष्टे—

अथाबुधः सधूमे तु जुहुयाद्यो हुताशने।
यजमानो भवेदन्धः सपुत्र इति च श्रुतिः॥

इति परिभाषाप्रकरणम्॥

मात्स्ये—

होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते॥

गृह्यपरिशिष्टे—

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ॥
प्रवृत्तमन्यथा कुर्याद्यदि होमात्कथञ्चन ।
यतस्तदन्यथाभूतं तत एव समापयेत् ॥

अन्यथाभूतं विपर्यस्तम् ।

छन्दोगपरिशिष्टे—

यन्नाऽऽम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥
समाप्ते यदि जानीयान्मयैतदयथाकृतम् ।
तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः ॥
प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ॥

तथा—

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥

लघुहारीतः—

चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षट् कुशान्परिवर्जयेत् । इति ॥

ब्राह्मे—

यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥
आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

अनादेशे अविधाने । 'प्राजापत्यमन्त्रः समस्तव्याहृतयः' इति मदनः ।
स्मृत्यन्तरेऽपि—न व्याहृत्या समं हुते इति ।

गारुडे—

प्रणवादि नमोऽन्तं च चतुर्थ्यन्तं च सत्तम ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः ॥

विष्णुधर्मोत्तरे—

दध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः ।

घृतप्रतिनिधिं कुर्यात्पयो वा दधि वा नृप ॥

'सर्वाभावे यवः प्रतिनिधिः' इति पैठीनसिनोक्तम् ।

'बौधायनः—'पलाशाश्वत्थखदिररौहितकौदुम्बरीणामिध्मास्तदलाभे सर्ववनस्पतीनाम्' ।

आज्यहोमेषु सर्वेषु गव्यमेव भवेद्घृतम् ।
तदलाभे महिष्यास्तु आजमाविकमेव च ॥
तदलाभे तु तैलं स्यात्तदलाभे तु जार्तिलम् ।
तदभावे तु कौसुम्भं तदभावे तु सार्षपम् ॥

याज्ञवल्क्यः—

आर्षश्छन्दश्च दैवत्यं विनियोगं तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणं च विशेषतः ॥
अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपम् ।
होममन्तर्जलादीनि तस्य वाऽल्पं फलं भवेत् ॥

आदित्यपुराणे—

सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् ।
रत्नपञ्चकमाख्यातं शेषं वस्तु ब्रवीम्यहम् ॥

स्मृत्यन्तरे तु—

कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् ।
एतानि पञ्च रत्नानि रत्नशास्त्रविदो विदुः । इति ॥

तत्रैव—

अभावे सर्वरत्नानां हेम सर्वत्र योजयेत् ।

विष्णुधर्मोत्तरे—

गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।
एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यमिति स्मृतम् ॥

मदनरत्ने कात्यायनः—

आज्यं क्षीरं मधु तथा मधुरत्रयमुच्यते । इति ॥

ब्राह्मे—

अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः ।
पञ्चभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः ॥

पञ्चभङ्गाः पञ्चपल्लवाः ।

चतुःसमं गारुडे—

कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम् ॥

शशी कर्पूरः ।

कर्पूरं चन्दनं दर्पं कुङ्कुमं च समांशकम् ।
सर्वगन्धमिति प्रोक्तं समस्तसुरवल्लभम् ॥

दर्पः कस्तूरी ।

तथा—

कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ।
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ॥

छन्दोगपरिशिष्टे—

कुष्टं मांसि हरिद्रे द्वे मुरा शैलेयचन्दनम् ।
वचा चम्पकमुस्तं च सर्वौषध्यो दश स्मृताः ॥

पाद्मे—

इक्षवस्तृणराजं च निष्पावाजाजिधान्यकम् ।
विकारवच्च गोक्षीरं कुसुम्भं कुङ्कुमं तथा ॥
लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते ।

तृणराजस्तालस्तत्पात्रम् । अजाजी जीरकम् ।

विष्णुधर्मोत्तरे—

मुक्ताफलं हरितकं वैडूर्यं पद्मरागकम् ।
पुष्परागं च गोमेदं नीलं गारुत्मतं तथा ॥
प्रवालमुक्तायुक्तानि महारत्नानि वै नव ।

स्कान्दे—

दधि क्षीरमथाज्यं च माक्षिकं लवणं गुडः ।
तथैवेक्षुरसश्चेति रसाः प्रोक्ता मनीषिभिः ॥

भविष्यत्पुराणे—

आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा ।
यवाः सिद्धार्थकाश्चेति ह्यर्घोऽष्टाङ्गः प्रकीर्तितः ॥

तत्रैव—

सुवर्णं रजतं ताम्रमारकूटं तथैव च ।

लोहं त्रपु तथा सीसं धातवः सप्त कीर्तिताः ॥

पञ्चरात्रे—

रजांसि पञ्चवर्णानि मण्डलाऽर्थं हि कारयेत् ।
शालितण्डुलचूर्णेन शुक्लं वा यवसंभवम् ॥
रक्तं कुसुम्भसिन्दूरगैरिकादिसमुद्भवम् ।
हरितालोद्भवं पीतं रजनीसंभवं तथा ॥

कृष्णं दग्धयवैः, हरितं पीतकृष्णविमिश्रितम्, रजनी हरिद्रा ।

भविष्यत्पुराणे—

दूर्वा यवाङ्कुरश्चैव वालकं चूतपल्लवाः ।
हरिद्राद्वयसिद्धार्थशिखिपत्रोरगत्वचः ॥
कङ्कणौषधयश्चैताः कौतुकाऽऽख्या नव स्मृताः ।

इति नव कौतुकानि ॥

दशाङ्गधूपो मदनरत्ने—

षड्भागकुष्टं द्विगुणो गुडश्च
लाक्षात्रयं पञ्च नखस्य भागाः ।
हरीतकी सर्जरसः समांसी
भागैकमेकं त्रिलवं शिलाजम् ॥
घनस्य चत्वारि पुरस्य चैको
धूपो दशाङ्गः कथितो मुनीन्द्रैः ।

शिलाजं शैलेयम् । घनो मुस्ता । पुरो गुग्गुलः ।

भविष्यत्पुराणे विशेषः—

अनुक्तद्रव्यततसङ्ख्या देवताप्रतिमा नृप ।
सौवर्णी राजती ताम्री वृक्षजा मार्तिकी तथा ॥
चित्रजा पिष्टलेपोत्था निजवित्तानुरूपतः ।
आमाषात्पलपर्यन्ता कर्तव्या शाठ्यवर्जितैः ॥
अङ्गुष्ठपर्वप्रभृतिवितस्त्यवधिका स्मृता । इति ॥

तत्तद्दानाऽङ्गदेवताप्रतिमालक्षणानि तत्र वक्ष्यन्ते ।

तुलाधिष्ठितदेवताप्रतिमानां तु लक्षणानि—

त्रिनेत्रो वृषभस्थस्त्रिशूलधृक् । पाशपाणिश्चन्द्रार्द्धभूषण ईशः ।

---

1 कपाल इति केपाठः ।

श्वेताश्वरथगः सोमो गदापाणिर्वरप्रदः ।
धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः ॥
रक्तवर्णास्त्रिनयना द्विभुजाश्चन्द्रमौलयः ।
जटिलाश्च प्रकर्तव्या रुद्रा बाणधनुर्द्धराः ॥

शुभश्मश्रुः सिन्दूरारुणसप्रभः पद्मासनः पद्मकरो भूषिताङ्गो रसनाधरः सूर्यः । श्मश्रुलो रसनाधरः, सन्दंशपाणिर्द्विभुजस्तेजोमूर्तिधरो महान्, विश्वकर्मा ।

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तो दण्डकमण्डल्वक्षसूत्रधृग्गुरुः ।

कमण्डलुं स्रुवं चैव शक्तिं दर्भमपि क्रमात् ।
कलयत्यङ्गिरोनाम्नः कराग्राणि समन्ततः ॥
पाणयश्चाग्निनाम्नोऽपि कलयन्ति जपस्रजम् ।
शक्तिं च पुस्तकं चैव क्रमादेवं कमण्डलुम् ॥
यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः ।
अक्षं स्रजं स्रुवं धत्ते कुण्डिकां च प्रजापतिः ॥
विश्वे देवास्तु सर्वेऽपि दक्षिणे बाणपाणयः ।
कर्तव्या वामपाणौ तु सशरासनपाणयः ॥
क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरिलोचनौ ।
पुरूरवार्द्रवश्चेति विश्वे देवा दश स्मृताः ॥

जगद्विधातृरूपं प्रजापतितुल्यम् । चतुर्मुखत्वमात्रमस्याऽऽधिक्यं ज्ञेयम् ।

पर्जन्यनामा विज्ञेयो गजवक्त्रस्त्रपान्वितः ।
यो धत्ते सर्वजीवात्मा वरं जीवं च शोषकम् ॥
कुठारं च पयोजं च चिन्तारत्नं महाशुचिम् ।
पाशं चक्रं किसलयं कुण्डीं च दशभिः करैः ॥

शम्भुरीशतुल्यः ।

कुशविष्टरपद्मस्थाः पितरः पिण्डपात्रिणः ।
पीताम्बरः पीतवपुः किरीटी
चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिधृक् सोमसुतः सदा नः

सिंहाऽधिरूढो वरदो बुधश्च ।
चतुर्वक्त्रश्चतुर्बाहुः सितमाल्यः सिताम्बरः ।
सर्वाऽऽभरणवाञ्श्वेतो धर्मः कार्यो महावपुः ॥
चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ।
शचीपतिः प्रकर्तव्यो नानाभरणभूषितः ॥
द्विभुजौ देवभिषजौ कर्तव्यावश्ववाहनौ ।
तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥
वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विज ।
वरुणः पाशभृत्सौम्यः प्रतीच्यां मकराश्रयः ॥
मित्रः कमलपाणिश्च कमलासनसंस्थितः ।
द्विभुजः श्वेतमूर्तिश्च सर्वभूतहिते रतः ॥

वरुणस्तु पूर्ववत् ।

देवा एकोनपञ्चाशद्देवेन्द्रसमतेजसः ।
भ्रातरः पुरुहूतस्य मरुतः सूर्यवर्चसः ॥
किरीटहारकेयूरकटकादिविभूषिताः ।
खड्गचर्मधरा नित्यं शक्रस्यानुचराः सदा ॥
ह्रस्वमापिङ्गनेत्रं च गदिनं पीतविग्रहम् ।
पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा ॥
वरदो भक्तलोकानां किरीटी कुण्डली गदी ।
कार्यः सुरूपो गन्धर्वो वीणावाद्यरतस्तथा ॥

जलेशः पूर्ववत् ।

प्रदक्षिणं दक्षिणाधःकरादारभ्य नित्यशः ।
विष्णुः कौमोदकीपद्मशङ्खचक्रैरलंकृतः ॥

इति विष्णुलक्षणम् ।

ब्रह्मवैवर्ते—

दानकालेषु देवत्वं प्रतिमानां प्रकीर्तितम् ।
धेनूनामपि धेनुत्वं श्रुत्युक्तं दानयोगतः ॥
दातुर्वै दानकाले तु धेनवः परिकीर्तिताः ।
विप्रस्य व्ययकाले तु द्रव्यं तदितिनिश्चयः । इति ॥

विष्णुधर्मोत्तरे—

हैमराजतताम्राश्च मृण्मया लक्षणान्विताः ।
यात्रोद्वाहप्रतिष्ठादौ कुम्भाः स्युरभिषेचने ॥
पञ्चाशाङ्गुलवैपुल्या उत्सेधे षोडशाङ्गुलाः ।
द्वादशाङ्गुलमूलाः स्युर्मुखमष्टाङ्गुलं भवेत् ॥

पञ्च च आशाश्च पञ्चाशाः । पञ्चाधिकशतमङ्गुलानि वैपुल्यमिति केचित् । आशा दश पञ्चाशदङ्गुलमित्यन्ये । पञ्चाधिका आशाः पञ्चदश तावान्वैपुल्यं व्यास इति तु युक्तम् ।

तथा—

कलशस्य मुखे ब्रह्मा ग्रीवायां च महेश्वरः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्मृताः ॥
शेषास्तु देवताः सर्वा वेष्टयन्ति चतुर्दिशम् ।
पृथिव्यां यानि तीर्थानि कलशे निवसन्ति हि ॥
ग्रहाः शान्तिश्च पुष्टिश्च प्रीतिश्च मतिरेव च ।
ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च ॥
अथर्ववेदसहिताः सर्वे कलशसंस्थिताः । इति ॥

षट्त्रिंशन्मते—

यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च ।
श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतम् ॥

मार्कण्डेयपुराणे—

व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुकास्तिलाः ।
प्रियङ्गवः कोविदाराः कोरदूषाः सतीनकाः ॥
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढक्यश्चणकाश्चैव शणः सप्तदशः स्मृतः ॥

कोरदूषाः कोद्रवाः । सतीनकाः कलायाः ।

स्कान्दे—

यवगोधूमधान्यानि तिलाः कङ्गुकुलत्थकाः ।
माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः ॥
गवेधुकाश्च नीवारा आढक्योऽथ सतीनकाः ।
चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु ॥

श्यामाः श्यामाकाः ।

व्यासः—

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा।
सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते॥

'परेत्युक्तेः पुरुषाहारौपयिकं तण्डुलादिकमपि दक्षिणा' इति हेमाद्रिः।

यत्तु—

अन्येषामेव दानानां सुवर्णं दक्षिणा स्मृता।
सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते। इति॥

तन्मूलं मृग्यम्।

सुवर्णं रजतं ताम्रं तण्डुला धान्यमेव वा।
नित्यश्राद्धं देवपूजा सर्वमेतदद्क्षिणम्।

इति व्यासेन केवलसुवर्णदाने दक्षिणापर्युदासाच्च। अयं च पर्युदासः केवलसुवर्णदान एव, न तु सुवर्णब्रह्माण्डादिदाने इति मदनादयः।

देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्।
अनुक्तदक्षिणे दाने दशांशं वाऽपि शक्तितः॥

तुलापुरुषदानादीन्यधिकृत्य लिङ्गपुराणे—

दक्षिणां च शतं सार्द्धं तदर्धं वा प्रदापयेत्।
ऋत्विजां चैव सर्वेषां दश निष्कांश्च दापयेत्॥

भविष्योत्तरे—

ज्ञेयं निष्कशतं पार्थ दानेषु विधिरुत्तमः।
मध्यमस्तु तदर्धेन तदर्धेनाऽधमः स्मृतः॥
मेर्वां च कालपुरुषे तथान्येषु महत्सु च।
एवं वृक्षे रथेऽण्डे च धेनोः कृष्णाजिनस्य च॥
अशक्तस्यापि क्लृप्तोऽयं पञ्चसौवर्णिको विधिः।

वृक्षे कल्पपादपे। रथे हिरण्याश्वरथे हेमहस्तिरथे च। अण्डे ब्रह्माण्डे। धेनोः सुवर्णकामधेनोः।

अतोऽप्यल्पेन यो दद्यान्महादानं नराधमः।
प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत्॥

अन्येषु महत्सु तिलगर्भादिषु जपाभिषेकमभिधाय,

लिङ्गपुराणे—

अष्टषष्टिपलोन्मानं दद्याद्वै दक्षिणां गुरोः।

होतॄणां चैव सर्वेषां त्रिंशत्पलमुदाहृतम् ॥
अध्येतॄणां तदर्द्धेन द्वारपानां तदर्द्धतः ।

अयं च गुर्वृत्विग्जापकद्वारपालानामर्द्धार्द्धदक्षिणाविभागोऽनुक्तविभागविशेषेषु दानान्तरेष्वपि द्रष्टव्यः । गृह्यपरिशिष्टे 'दक्षिणाऽलाभे मूलानां फलानां भक्ष्याणां दक्षिणां ददाति' इति ।

अथ द्रव्यमानम् ।

याज्ञवल्क्यः—

जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतः ।
तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते ॥
गौरस्तु ते त्रयः षट् ते यवो मध्यश्च ते त्रयः ।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश ॥
पलं सुवर्णाश्चत्वारः पञ्च वाऽपि प्रकीर्तितम् ।
द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ॥
शतमानं तु दशभिर्धरणैः पलमेव तु ।
निष्कः सुवर्णाश्चत्वारः । इति ॥

धरणपुराणौ पर्यायौ । तथा शतमानपले । पूर्वोक्ताश्चत्वारः सुवर्णा राजतो निष्कः इति ।

'कार्षिकस्ताम्रिकः पणः' इति ताम्रस्योन्मानम् । पलचतुर्थांशेन कर्षेणोन्मितः कार्षिकस्ताम्रसम्बन्धी पणो भवति । कार्षापणसंज्ञश्च । स्मृत्यन्तरेऽपि—षोडशपणः पुराणः । 'पणो भवेत्काकिणीचतुष्केण पञ्चाहतैश्चतुभिर्वराटकैः काकिणी चैका' इति । तथाच देशादिभेदेन पणादिव्यवहारो ज्ञेयः ।

अथ धान्यादिमानम् ।

भविष्यत्पुराणे—

पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ।
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥
आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः ।
कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश ॥

द्रोणद्वयस्यैव शूर्प इति संज्ञा । गोपथे—

पञ्चकृष्णलको माषस्तैश्चतुःषष्टिभिः पलम् ॥

पलैर्द्वात्रिंशद्भिः प्रस्थो मागधेषु प्रकीर्तितः।
आढकैस्तैश्चतुर्भिश्च द्रोणः स्याच्चतुराढकः॥

विष्णुधर्मोत्तरे—

पलं च कुडवः प्रस्थ आढको द्रोण एव च।
धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः॥
द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते।
कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता॥

विंशत्येत्यत्र द्रोणैरिति संबद्ध्यते। तथाच, कुम्भो द्रोणद्वयमिति पक्षाद्विंशतिद्रोणमितः कुम्भ इति पक्षान्तरम्। पलसहस्रमितः कुम्भ इत्यपि पक्षान्तरं ज्ञेयम्।

वाराहे—

पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतम्।
अष्टमुष्टि भवेत्किञ्चित्किञ्चिदष्टौ तु पुष्कलम्॥
पुष्कलानि च चत्वारि आढकः परिकीर्तितः।
चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणम्॥

एतत्पक्षाणां शक्तिदेशकालाद्यपेक्षया व्यवस्था।

उक्त्वा श्रीनीलकण्ठाख्यः परिभाषादिकं पुरा।
दानाद्यौपयिकं कुण्डमण्डपादि वदत्यथ॥

तत्र भूमानम्।

आदित्यपुराणे—

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥
त्रसरेणुस्तु विज्ञेयो अष्टौ ये परमाणवः।
त्रसरेणवस्तु ते ह्यष्टौ रथरेणुस्तु स स्मृतः॥
रथरेणवस्तु तेऽष्टौ च वालाग्रं तत्स्मृतं बुधैः।
वालाग्राष्टकं लिक्षा तु यूका लिक्षाष्टकं तथा॥
अष्टौ यूका यवं प्राहुरङ्गुलं तु यवाष्टकम्।

अन्यत्रापि—

यूकाष्टकं यवं प्राहुर्यवानामुदरैस्तथा।
अष्टभिश्चाङ्गुलं तिर्यग्यवानामुत्तमं मतम्॥

सप्तभिर्मध्यमं प्रोक्तं षड्भिः स्यादधमाङ्गुलम् । इति ॥
द्वादशाङ्गुलमात्रो वै वितस्तिः परिकीर्तितः ॥
अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ।
तालः स्मृतो मध्यमया गोकर्णश्चाप्यनामया ॥
कनिष्ठया वितस्तिस्तु द्वादशाङ्गुलमानकः ।
रत्निस्त्वङ्गुलपर्वाणि विज्ञेयस्त्वेकविंशतिः ॥
चत्वारि विंशतिश्चैव हस्तः स्यादङ्गुलानि तु ।
किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदङ्गुलः ॥
षण्णवत्यङ्गुलिश्चैव धनुर्दण्डः प्रकीर्तितः ।
धनुर्दण्डयुगं नालिर्ज्ञेया ह्येते यवाङ्गुलैः ॥
धनुषां त्रिशतं नल्वमाहुः संख्याविदो जनाः ।
धनुःसहस्रे द्वे चाऽपि गव्यूतिरपदिश्यते ॥
अष्टौ धनुःसहस्राणि योजनं परिकीर्तितम् ।

विष्णुधर्मोत्तरे—

यदुत्पन्नमथाश्नाति नरः संवत्सरं द्विजः ।
एकगोचर्ममात्रं तु भुवः प्रोक्तं विचक्षणैः ॥

बृहस्पतिः—

दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्तनम् ।
दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः ॥

इति भूमानम् ।

मार्जनखननाद्यन्यतमप्रकारेण यथोचितं भूमिः संशोध्या ।
तत्र मण्डपस्थलं सिद्धान्तशेखरे—

स्थलादर्काङ्गुलोच्छ्रायं मण्डपस्थलमीरितम् । इति ॥

मण्डपं प्रकृत्य कपिलपञ्चरात्रे—

उच्छ्रायो हस्तमात्रं स्यात्सुसमे च सुशोभनम् । इति ॥

ततो दण्डत्रयनिर्मितदीर्घत्रिकोणाकारयन्त्रे दण्डाग्राभ्यां भुवि न्यस्ते यन्त्रमूलात्तिर्यग्दण्डोपरिलम्बितमधोभारवद्भूमिमप्राप्तं सूत्रं यथा तिर्यग्दण्डमध्यचिह्ने पतेत्तथा निम्ना भूः पूर्वोक्ता उच्चा वा खननीयेत्यादिशिल्पशास्त्ररीत्या तां समीकृत्य च मण्डपाद्युपयुक्तां प्राचीं साधयेत् । एवं

समायां भुवि द्वादशाङ्गुलव्यासार्द्धमेकं तन्मध्ये चापरं नवाङ्गुलं व्यासार्द्धमिति वृत्तद्वयं कृत्वा तन्मध्ये द्वादशाङ्गुलं पृथङ्मूलं सूक्ष्माग्रमृजुं शङ्कुं निधाय नवाङ्गुलवृत्तरेखायां चतस्रो दिशः प्रकल्प्य तासु चतस्र ऋज्व्यः पञ्चदशाङ्गुलाः शलाकाः शङ्क्वग्रस्पृष्टाऽग्राः स्थाप्याः शङ्कुसमतार्थम् । तादृशशङ्क्वग्रच्छाया च महद्वृत्तरेखां पूर्वाह्णे यत्र स्पृशति सा प्रत्यक् । यत्रापराह्णे सा प्राक् । सूक्ष्मप्राचीज्ञानार्थं तु परदिनेऽपि तस्मिन्नेव वृत्ते शङ्कुच्छायानिगमप्रवेशयोश्चिह्नं कृत्वा पूर्वापरदिनच्छायाप्रदेशनिर्गमनचिह्नयोरन्तरालमिष्टैस्त्रिचतुराद्यैर्भागैर्विभज्य पूर्वदिनच्छायाप्रवेशनिर्गमान्तरालघटीः पादच्छायाघटीयन्त्रादिना ज्ञात्वा ताभिर्घटिकाभिः कल्पितान्भागान्गुणयेत् । षष्टिभिश्च हरेत् । ततो लब्धांशेन प्राच्यामेव पूर्वदिनकृतापगमचिह्नादुत्तरायण उत्तरस्मिन्दक्षिणायने दक्षिणस्मिन्नङ्कयेत् । तदुपरि पूर्वच्छायाप्रवेशचिह्नोपरि च धृते सूक्ष्मा प्राची भवति ।

दिग्ज्ञानोपायान्तरं च शुल्बे—

> कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम् ।
> एतत्प्राच्या दिशो रूपं युगमात्रोदिते सति । इति ॥

अत्रायं गुरूपदेशः । ऋज्वीं सूक्ष्मरन्ध्रां नलिकां काष्ठादौ बद्ध्वा तद्रन्ध्रेण युगमात्रमुपरिगतं कृत्तिकादिनक्षत्रं दृष्ट्वा नलिकां ताभ्यां प्राक्प्रत्यग्देशयोः सूक्ष्मं पाषाणद्वयमवलम्बद्वयं वा भूमौ प्रक्षिप्य तच्चिह्नयोः प्राचीसूत्रं देयमिति । एवमेव ध्रुवं दृष्ट्वोदीची साध्या । चित्रास्वात्यन्तरालज्ञानार्थं तु नलिकाद्वयेनैकेन च दण्डान्तरेण त्र्यस्राकारं यन्त्रं कृत्वा दण्डं च मध्येऽङ्कयेत् । नलिकाद्वयान्तौ तु तथा तक्षणादिना परस्परं योजनीयौ । यथैकेनैव प्रयत्नेन युगपदत्र द्वयमपि दृश्यते । एवं दृष्ट्वा मिलितान्नलिकान्ताद्दण्डमध्याङ्काच्च पाषाणावलम्बौ प्रक्षेप्तव्यौ । इति ॥

अथ मण्डपादिलक्षणम् ।

तत्र पञ्चरात्रे—

> कनीयान्दशहस्तः स्यान्मध्यमो द्वादशोन्मितः ।
> तथा षोडशभिर्हस्तैर्मण्डपः स्यादिहोत्तमः ॥

---

१ लाघिकव्या इति क पाठः । २ पृथु इति क पाठः ।

प्रतिष्ठासारसङ्ग्रहे—

मण्डपः कलाहस्तो वा सर्वलक्षणसंयुतः ।
दशद्वादशहस्तो वा द्विद्विवृद्ध्या ततः क्रमात् ॥

लिङ्गपुराणे तु पुरुषदानप्रकरणे—

विंशद्धस्तप्रमाणेन मण्डपं कूटमेव वा ।
अथाष्टादशहस्तेन कलाहस्तेन वा पुनः । इति ॥

विंशतिहस्तोऽप्युक्तः । मध्यस्तम्भवलिकोपरिगतैश्चतुर्भिरष्टभिर्वा मृदङ्गाऽऽकारकलशप्रोतैः काष्ठैर्मध्ये शिखराकारयुतः कूटः । कूटोऽस्त्री शिखरं शृङ्गमित्यऽभिधानानुसारात् । मध्यस्तम्भोपरि समतयाच्छादितो मण्डप इति हेमाद्रिः । संप्रति कूट एवादरो लोकानाम् । तत्रैव च मण्डपभ्रमः ।

'दशहस्तमण्डपस्त्वेकमेखलकुण्डपक्ष एकाग्निविधानपक्षे चोपयुक्तो भवति' इति मदनरत्ने ।

पञ्चरात्रे—

कुर्याद्वैष्णवयागेषु चतुर्द्वारांश्च मण्डपान् ।
सारदारुमयान्स्तम्भान्दृढान्कुर्यादृजून्समान् ॥
मण्डपार्द्धोच्छ्रितान्वेदसङ्ख्यांश्चूडासमन्वितान् ।
वलिकामूर्ध्वतस्तेषां स्तम्भद्वादशकं पुनः ॥
बाह्यपीठप्रमाणेन तत्र सूत्रविधानतः ।
कल्पयेद्विकरं द्वारं चतुरङ्गुलवृद्धितः ॥
मध्यमोत्तमयोर्वेदी मण्डपस्य त्रिभागतः ।
चतुर्थांशोच्छ्रितिस्तस्यास्त्रिसप्तपञ्चतोऽपि वा ॥
नवैकादशहीनं वा इष्टकाभिः प्रकल्पयेत् । इति ॥

चूडा शिखा । वलिकामिति । तेषां चतुःस्तम्भानां शिखाभिः प्रोतच्छिद्राण्युभयतश्छिद्रद्वयोपेतानि वलिकाख्यानि तिर्यक्काष्ठानि विधेयानीत्यर्थः । बाह्य इत्यादि । आदौ मध्यस्तम्भचतुष्टयं विन्यस्य तद्बाह्यपरिधौ मण्डपक्षेत्रविस्तारपर्यायपीठपरिमितसूत्रतृतीयांशेन तुल्यान्तरद्वादशचिह्नकरणपूर्वकं पञ्चहस्तप्रमाणा द्वादशस्तम्भा निखेया इत्यर्थः । तदेवं षोडशस्तम्भता संपद्यते । तेषु चत्वारो मण्डपायामार्द्ध-

मितोच्छ्राया अष्टहस्ता नवहस्ता वा भवन्ति। अधममध्यमोत्तमरूपे- ष्वष्टहस्ता एते चत्वारः।

शारदातिलके—

षोडशस्तम्भसंयुक्तं चत्वारस्तेषु मध्यगाः।
अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वादशाधिकाः॥
पञ्चहस्तप्रमाणास्ते निश्छिद्रा ऋजवः शुभाः।

इत्युक्तत्वादिति। तत्रापि मध्यमस्तम्भेषु चूडास्वेव तिर्यक्काष्ठनिवेश- नम्। बाह्येषु तु चूडासु स्तम्भकर्णेषु वेत्यनियमः। सर्वे च, 'पञ्चमांऽशं न्यसेद्भूमौ सर्वसाधारणो विधिः' इत्युक्तत्वात् सूत्रपञ्चमांशेन निखेयाः। सर्वेऽपि दशाङ्गुलसूत्रवेष्टनयोग्यस्थौल्या विधेयाः।

कल्पयेदित्यादि। कनिष्ठमण्डपे द्वारचतुष्टयं द्विहस्तविस्तारम्। तथा मध्यमे चतुरङ्गुलाधिकद्विहस्तविस्तारम्। एवमुत्तमेऽष्टाङ्गुलाधिकद्विहस्त- विस्तारम्। मध्यमोत्तमयोर्वेदीत्यादि। मण्डपमध्यत्रिभागमाना वेदिः स्वायामतृतीयचतुर्थपञ्चमसप्तमनवमैकादशाऽन्यतमेनोच्चा।

तुलापुरुषे तु मात्स्ये—

सप्तहस्ता भवेद्वेदी मध्ये पञ्चकराऽथवा। इति॥

सिद्धान्तशेखरे—

चतुरस्रा चतुष्कोणा वेदी सर्वफलप्रदा।
तडागादिप्रतिष्ठायां पद्मिनीपद्मसन्निभा॥
राज्ञां स्यात्सर्वतोभद्रा वेदी राज्याभिषेचने।
विवाहे श्रीधरी वेदी विंशद्धस्तसमन्विता। इति॥

'द्वारदेहल्या बहिर्हस्तमात्रे द्वारशाखा निखेया' इति निबन्धान्तरे। व्रतखण्डे तु 'हस्तद्वयं बहिस्त्यक्त्वा तोरणानि निवेशयेत्' इत्युक्तम्।

मात्स्ये—

द्वारेषु कार्याणि च तोरणानि
चत्वार्यपि क्षीरवनस्पतीनाम्। इति॥

अयमर्थः—पूर्वद्वारे अश्वत्थशाखे, दक्षिणे उदुम्बरशाखे, पश्चिमे प्लक्षशाखे उत्तरतो वटशाखे। शाखाश्च अधममध्यमोत्तममण्डपेषु क्रमात्पञ्चषट्सप्तहस्तोच्चाः। तासामुपरिकृतचूडासु तिर्यक्फलकमुभयतः सच्छिद्रं चूडान्यस्तच्छिद्रं निदध्यात्। तद्द्विहस्तमधममण्डपे। अङ्गुल-

षट्काधिकं द्विहस्तं मध्ये । सार्द्धं हस्तद्वयमुत्तमे । तिर्यक्फलकोपरि मध्ये मण्डपेषु क्रमाच्चतुरङ्गुलाः सार्द्धचतुरङ्गुलाः पञ्चाङ्गुलाश्च कीला निवेश्याः । तिर्यक्फलकं कीलाश्च तत्तत्काष्ठजा एव ।

यद्वास्तुशास्त्रे—

मस्तके द्वादशांशेन शङ्खचक्रगदाम्बुजम् ।
प्रागादिक्रमयोगेन न्यसेत्तेषां स्वदारुजम् ॥

द्वादशांशोऽत्र फलकस्य चतुरङ्गुलादिरेवोक्तः । शङ्खचक्रगदाम्बुजकरणं वैष्णवयागविषयम् ।

शैवयागे तु ते कीलास्त्रिशूलाः स्युः । त्रिशूलाकारत्वं चैवं—'मध्यकीलो नवाङ्गुलो वृत्तः सपादव्यङ्गुलविस्तारः । तमुभयतोऽन्यौ किञ्चिद्वक्रौ । दैर्घ्यमध्ये शूलस्य मूलाङ्गुलद्वयं बिले प्रविशति इत्यधममण्डपे । मध्यमे त्वेकादशाङ्गुल उच्छ्रायः । पादोनत्र्यङ्गुलविस्तारः । त्र्यङ्गुलो बिलप्रवेशः । उत्तमे त्रयोदशाङ्गुलमुच्छ्रायः सपादत्र्यङ्गुलो विस्तारश्चतुरङ्गुलो बिलप्रवेशः' । इदं च पिङ्गलमते—

शूलेन चिह्निताः कार्या द्वारशाखास्तु मस्तके ।
शूलैर्नवाङ्गुलैर्दैर्घ्यं तुरीयांशेन विस्तृतिः ॥
ऋजुर्वै मध्यशृङ्गः स्यात्किञ्चिद्वक्रं च पक्षयोः ।
प्रथमं तत्समाख्यातं व्यङ्गुलं रोपयेत्तथा । इत्यादिनोक्तम् ॥

एषामलाभे एकवृक्षजानि तोरणानि । तस्याप्यभावे शमीद्रुमजानि । एतन्निवेशनमन्त्राश्च अग्निमीळे, इषे त्वा, अग्न आयाहि, शंनो देवी इत्यनुसन्धेयाः । मध्यस्तम्भचतुष्टयोपरि च मुरजाऽऽकृतिकाष्ठे दिग्विदिग्गतरन्ध्राष्टकप्रोताग्रकाष्ठाष्टकेनोन्नतता कार्या । 'कटैः सन्धिस्तु संछाद्या विजयाद्यास्तु मण्डपाः' इत्युक्तत्वात् । द्वारवर्जं सर्वतो मण्डप आच्छाद्यः । जयविजयभद्रविश्वरूपसुरूपध्रुवधनदधन्वकसुप्रसन्नाः । एतेऽष्टहस्तादयो द्विहस्तवृद्धितो ज्ञातव्याः । यदा मण्डपद्वयं क्रियते, तदा तत्र प्रथममण्डपपरिमितमन्तरमुत्सृज्य द्वितीयो मण्डपः कर्तव्य इति वास्तुशास्त्रे 'एवं यदा धामाग्रे मण्डपः क्रियते तदा तद्धामपरिमाणमन्तरमुत्सृज्य परतो मण्डपो विधेय' इति ।

मण्डपे पताका उक्ताः । मात्स्ये—

लोकेशवर्णाः परितः पताका

मध्ये ध्वजः किङ्किणिकायुतः स्यात् । इति ॥

सङ्ग्रहेऽपि—

सप्तहस्ताः पताकाः स्युः सप्तमांशेन विस्तृताः ।
लोकपालानुवर्णेन नवमी तुहिनप्रभा ॥
पीतरक्तादिवर्णाश्च पञ्चहस्ता ध्वजाः स्मृताः ।
द्विपञ्चहस्तैर्दण्डैश्च वंशजैः संयुतास्तथा । इति ॥

लोकपालवर्णाः—

इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ।
कुबेरस्तु सुवर्णाभो ह्यग्निश्चापि सुवर्णभः ॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् । इति ॥

गारुडे तु पताकानां प्रकारान्तरमुक्तम्—

पञ्चहस्ता ध्वजाः कार्या वैपुल्येन द्विहस्तकाः ।
सप्तहस्ताः पताकाः स्युर्विंशत्यङ्गुलविस्तृताः ॥
दशहस्ताः पताकानां दण्डाः पञ्चांशवेशिताः ।
सिन्दूराः कर्बुरा धूम्रा धूसरा मेघसन्निभाः ॥
हरिताः पाण्डुवर्णाश्च शुद्धाः पूर्वादितः क्रमात् ।
एवं वर्णाः शुभाः कार्याः पताकाः पाकशासन । इति ॥

अत्र समचतुरस्रमण्डपसाधनम् । मण्डपादिव्यासप्रमाणां रज्जुं द्विगुणीकृत्य तामेवोभयतःपाशाभ्यां सह अष्टधा विभज्य, पञ्चमांशान्ते कर्षणाय षष्ठांशान्ते शङ्क्वर्थं च चिह्नद्वयं कृत्वा मण्डपादेः प्राचीसूत्रप्रान्तद्वये शङ्कुद्वयं निखाय, रज्ज्वन्तपाशौ तयोः शङ्कोरासज्य कर्षणचिह्नं दक्षिणत आकृष्य शङ्कुचिह्ने शङ्कुं निखाय ततः कर्षणचिह्नमुत्तरत आकृष्य शङ्कुचिह्ने शङ्कुं निखाय व्यत्यासं कृत्वा शङ्कोः पाशान्तावासज्य पूर्ववद्दक्षिणोत्तरयोः क्रमेण कर्षणचिह्नमाकृष्य शङ्कुद्वयं निहन्यात् । तत ईशानाग्नेयादिशङ्कुषु प्रादक्षिण्येन रज्जुवेष्टनान्मण्डपादिचतुरस्रं क्षेत्रं सिद्धं भवति ।

मध्यवेदीसाधनम् । मण्डपसूत्रं प्रागायतं दक्षिणोत्तरायतं च त्रेधा विभज्य तेन नवभागो मण्डपः संपद्यते । मध्यमे नवमेंऽशे तन्माना वेदिका यजमानहस्तोच्छ्राया च विधेया ।

मात्स्ये—

द्वारेषु कुम्भद्वयमत्र कार्यं
स्रग्गन्धधूपाम्बररत्नयुक्तम् । इति ॥

मदनरत्ने—

गन्धपुष्पाक्षतोपेतान् कुम्भांस्तेषु निवेशयेत् ।
ध्रुवं धरं वाक्पतिं च विघ्नेशं तेषु पूजयेत् ॥
मण्डपस्य तु कोणेषु कलशेषु क्रमादमी ।
अमृतो दुर्जयश्चैव सिद्धार्थो मङ्गलस्तथा ॥
पूज्या द्वारस्य कुम्भेषु शक्राद्यास्तु मनूत्तमैः ।

इति मण्डपनिरूपणम् ।

अथ कुण्डानि ।

तत्र भविष्यपुराणे—

वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च वा ।
वेदास्त्रीण्येव तानि स्युर्वर्तुलान्यथवा क्वचित् ॥

आम्नायरहस्ये—

कुण्डानि चतुरस्राणि वृत्तनानाकृतीनि वा ।
नव पञ्चाथ वैकं वा कर्तव्यं लक्षणान्वितम् ॥
नवकुण्डविधाने तु दिक्षु कुण्डाष्टके स्थिते ।
नवमं कारयेत्कुण्डं पूर्वेशानदिगन्तरे ॥
विधाने पञ्चकुण्डानामीशाने पञ्चमं भवेत् ।

अत्र 'चतुःकुण्डीपक्षे खातं नास्ति' इत्युक्तं हेमाद्रौ ।

नारदीये—

यत्रोपदिश्यते कुण्डं चतुष्कं तत्र कर्मणि ।
वेदास्रमर्द्धचन्द्रं च वृत्तं पद्मनिभं तथा ॥
पीठवद्वर्द्धयेत्कुण्डं सुप्रमाणेष्वगर्तकम् ।
कुर्यात्कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः ॥
कुण्डवेद्यन्तरं चैव सपादकरसंमतम् ।
विंशाङ्गुलं प्रकर्तव्यमन्तरं कुण्डपीठयोः ॥

स्मृत्यन्तरे—

> वेदिभित्तिं परित्यज्य त्रयोदशभिरङ्गुलैः ।
> हस्तमात्राणि कुण्डानि चतुरस्राणि सर्वतः । इति ॥

सर्वतोऽष्टदिक्षु ।

काम्ये तु—

> ऐन्द्र्यां स्तम्भे चतुष्कोणमग्नेर्भागे भगाकृतिम् ।
> चन्द्रार्द्धं मारणे याम्ये त्रिकोणं द्वेषनैर्ऋते ॥
> वारुण्यां शान्तिकं वृत्तं षडस्रमुच्चाटनेऽनिले ।
> उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रि मुक्तिदम् ॥

शारदातिलके—

> विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते ।
> वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् ॥
> चतुरस्रं च सर्वेषां केचिदिच्छन्ति तान्त्रिकाः ।

चतुरस्रसाधनं तु मण्डपसाधनावसर उक्तम् । तत्रैकस्मिन् हस्ते चतुर्विंशत्यङ्गुलानि व्यासः । द्वयोस्त्रयस्त्रिंशदङ्गुलानि, सप्त यवाः, चतस्रो यूकाः, द्वे लिक्षे । त्रिष्वेकचत्वारिंशदङ्गुलानि, चत्वारो यवाः, चतस्रो यूकाः, चतस्रो लिक्षाः । चतुर्ष्वष्टाचत्वारिंशदङ्गुलानि । पञ्चसु त्रिपञ्चाशदङ्गुलानि, पञ्च यवाः, द्वे यूके, पञ्च लिक्षाः । षट्स्वष्टपञ्चाशदङ्गुलानि, षड् यवाः, द्वे यूके, चतस्रो लिक्षाः । सप्तसु त्रिषष्ट्यङ्गुलानि, यवत्रयं, सप्त यूकाः, सप्त लिक्षाः । अष्टसु सप्तषष्ट्यङ्गुलानि, सप्त यवाः, लिक्षाश्चतस्रः । नवसु द्वासप्तत्यङ्गुलानि । दशसु पञ्चसप्तत्यङ्गुलानि, षड् यवाः, यूकाश्चतस्रः, लिक्षाश्चतस्रः । एवं षोडशहस्ते षण्णवत्यङ्गुलानि ॥

अथ योनिकुण्डम्—इष्टचतुरस्रं व्यासं चतुर्विंशतिधा विभज्य सपादैः पञ्चभिर्भागैर्मध्यसूत्रं प्राच्यां विवर्ध्य चतुरस्रमध्ये प्रागुदक्सूत्रपातजातोपरितनालपचतुरस्रयोः कोणसूत्रद्वयपातज्ञातमध्यादेतत्कोणसूत्रार्द्धमानेनेष्टचतुरस्रोदक्सूत्रदक्षिणान्तात्प्राक्सूत्रपश्चिमान्तं यावद् भ्रामयेद्वृत्तार्द्धम् । एवमेवोत्तरालपचतुरस्रेऽपि इष्टचतुरस्रोदगन्तात्प्राक्सूत्रपश्चिमान्तं परिभ्राम्य वृत्तार्द्धद्वयं दक्षिणोदक्कोटितो वर्द्धितप्राक्सूत्रान्तं यावत् सूत्रद्वयं पातयेत् ॥ इति योनिकुण्डम् ।

तथाच शारदातिलके—

चतुरस्रीकृतं क्षेत्रं पञ्चधा विभजेत्सुधीः।
न्यसेत्पुरस्तादेकांशं कोणार्धार्धप्रमाणतः॥
भ्रामयेत्कोणमानेन तथान्यदपि मन्त्रवत्।
सूत्रयुग्मं ततो दद्यात्कुण्डं योनिनिभं भवेत्। इति॥

अत्रोपपत्तिः। प्राग्दिग्गतत्र्यस्रलम्बः सप्तदशाङ्गुलानि, एको यवः, एका यूका लिक्षा पञ्च। भूस्तु इष्टचतुरस्रमध्या। उदक्सूत्रं चतुर्विंशत्यङ्गुलम्। उपरितनाल्पत्र्यस्रेऽपि भूः सैव। आलम्बस्तु द्वादशाङ्गुलानि। वृत्तार्द्धव्यासार्द्धयोस्त्वङ्गुलानि अष्टौ यवाश्चत्वार इति। योनिमध्यसूत्रवृद्धयङ्गुलानि। एकहस्ते पञ्चाऽङ्गुलानि, एको यवः, एका यूका, पञ्च लिक्षाः। द्विहस्ते सप्ताङ्गुलानि। द्वौ यवौ, द्वे यूके, एका लिक्षा। त्रिहस्तेऽष्टावङ्गुलानि सप्त यवाः, तिस्रो यूकाः। चतुर्हस्ते दशाङ्गुलानि, चत्वारो यवाः, तिस्रो यूकाः द्वे लिक्षे। पञ्चहस्ते एकादशाङ्गुलानि, यवचतुष्टयम्, एका यूका। षड्ढस्ते द्वादशाङ्गुलानि, चत्वारो यवाः, सप्त यूकाः, तिस्रो लिक्षाः। सप्तहस्ते त्रयोदशाङ्गुलानि, पञ्च यवाः, अष्टहस्ते चतुर्दशाङ्गुलानि, यवचतुष्टयम्, यूकाश्चतस्रः, द्वे लिक्षे। नवहस्ते पञ्चदशाङ्गुलानि, यवत्रयम्, यूकाचतुष्टयम्, सप्त लिक्षाः। दशहस्ते षोडशाङ्गुलानि, द्वौ यवौ। तिस्रो यूकास्तिस्रो लिक्षाः। एवं षोडशहस्ते विंशत्यङ्गुलानि यवचतुष्टयं षड्यूकाः, चतस्रो लिक्षाः॥

रामस्तु—इष्टचतुरस्रक्षेत्रमध्यरेखाया द्विनवत्यधिकं शतमंशान्कृत्वाष्टात्रिंशदंशान् मध्यसूत्रं प्राच्यामेकोनविंशदंशैश्चोभयतः श्रोणिं संवर्द्ध्य सवृद्धिश्रोणिचतुर्थांशककर्कटेन सूत्रेण वा पश्चिमभागे वृत्तार्द्धद्वयं प्राङ्मुखं श्रोणिसूत्रलग्नं विलिख्य वृत्तार्द्धद्वयबाह्यप्रान्तयोर्वर्द्धितप्राक्सूत्रे चिह्नं यावत् सूत्रद्वयान्तं योन्याकारं कार्यमित्याह। तत्फलसंवादेऽपि विरूपत्वादयुक्तम्॥

इदं चोदगग्रं कार्यम्। तच्च मध्यरेखापञ्चमांशवृद्धावुदीच्यां कृतायां भवति।

इदमुदाहृतं मदनरत्ने 'योन्याख्यमुच्यते कुण्डमाग्नेय्यामुत्तरामुखम्' इति॥

-थार्द्धचन्द्राभं कामिके—

चतुरस्रे ग्रहैर्भक्ते त्यक्त्वाऽऽद्यन्तौ तदंशकौ।
मध्ये सप्तांशमानेन कुण्डं खण्डेन्दुवद्भ्रमात्॥

अयमर्थः—इष्टप्रमाणचतुरस्रमध्यरेखां नवधा विभज्याऽऽद्यन्तिमौ भागौ परिमृज्य तत्र चिह्नद्वयं कृत्वोपरिचिह्ने तिर्यग्दक्षिणोत्तरं सूत्रं दत्त्वोपरिचिह्नाधश्चिह्नं यावद्वृत्तेन सूत्रेण कर्कटेन वा भ्रमाद्वृत्तार्द्धं ज्यासूत्रजातकोटिकमर्द्धचन्द्रं कुण्डं कुर्यात् इति। अर्द्धेन्दौ व्यासार्द्धाङ्गुलानि। एकस्मिन्नेकोनविंशत्यङ्गुलानि एको यवः एका यूका पञ्च लिक्षाः। द्वयोः सप्तविंशत्यङ्गुलानि पञ्च यूकाः द्वे लिक्षे। त्रिषु त्रयस्त्रिंशदङ्गुलानि एको यवः द्वे यूके षड्लिक्षाः। चतुर्षु अष्टत्रिंशदङ्गुलानि द्वौ यवौ तिस्रो यूकाः द्वे लिक्षे। पञ्चसु द्विचत्वारिंशदङ्गुलानि। सप्त यवाः। यूकाश्चतस्रः। तिस्रो लिक्षाः। षट्सु षट्चत्वारिंशदङ्गुलानि, सप्त यवाः द्वे यूके। सप्तसु पञ्चाशदङ्गुलानि, पञ्च यवाः, द्वे यूके चतस्रो लिक्षाः। अष्टसु पञ्चपञ्चाशदङ्गुलानि, एको यवः, द्वे यूके, तिस्रो लिक्षाः। नवसु सप्तपञ्चाशदङ्गुलानि, चत्वारो यवाः। दशसु षडङ्गुलानि, चत्वारो यवाः। एवं षोडशसु षट्सप्तत्यङ्गुलानि। पञ्च यवाः। अत्र रामेण—'चतुरशीत्यधिकत्रिशत्या विभक्तस्येष्टक्षेत्रव्यासस्यैकोंशोऽधिकस्त्याज्यः क्षेत्रफलसंवादार्थम्' इत्युक्तम्। स चैकांश इष्टक्षेत्रव्यासश्चतुर्विंशांशस्य षोडशांशो भवति। एकहस्तचतुरस्रे तु सार्द्धयवमितः। एवं द्विहस्तादिष्वप्यूह्यम्। इदं चोदगग्रं कार्यम्। तदुक्तं मदनरत्ने—'उदगग्रत्वं चोदङ्मध्यरेखाया नवधा विभागेन संपादनीयम्' इति॥

यत्तु शारदातिलके—

चतुरस्रीकृतं क्षेत्रं दशधा विभजेद्बुधः।
एकमेकं त्यजेदंशमधं उर्ध्वं च तन्त्रवित्॥
ज्यासूत्रं पातयेदग्रे तन्मानाद्भ्रामयेत्ततः।
अर्द्धचन्द्रनिभं कुण्डं रमणीयमिदं भवेत्। इति॥

तत्र भूयान्क्षेत्रफलविसंवादः। कामिकोक्ते स्वल्पः।

अथ त्रिकोणम्। 'इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिरंशाः। तत्र

सूत्रं च प्राच्यामष्टमांशोनैकांशसहितान् सार्द्धसप्तांशान् श्रोणिं च पार्श्व-योः। प्रत्येकं सपादान् षडंशान् संवद्धर्य वर्द्धितश्रोण्यन्तयोर्वर्द्धितप्राक्-सूत्रान्तं यावत्सूत्रद्वये दत्ते समभुजं त्र्यस्रं भवति।

यथोक्तं शारदातिलके—

चतुर्द्धामोदिते क्षेत्रे न्यसेदुभयपार्श्वयोः।
एकैकमंशतन्मानादग्रतो लाञ्छयेत्ततः॥
सूत्रद्वयं बुधः कुर्यात्त्र्यस्रं कुण्डमुदाहृतम्। इति॥

इदं तु किञ्चित्फलव्यभिचारि। अतोऽस्माभिरधिका वृद्धिरुक्ता। रामसुते तु 'मध्यसूत्रं दशभिरंशैः संवद्धर्य तत्रैकोंऽशः स्वाष्टमांशोनः श्रोणिसूत्रस्योभयतः पञ्चपञ्चांशवृद्धिः' इति। तत्तु विषमभुजत्वादुपे-क्ष्यम्। इदं च निर्ऋतौ प्रागग्रं पश्चिमयोनि त्र्यस्रभुजाः। एकस्मिन् षट्त्रिंशदङ्गुलानि चत्वारो यवाः। द्वयोरेकपञ्चाशदङ्गुलानि पञ्च यवाः। त्रिषु त्रिषष्ट्यङ्गुलानि एको यवः। चतुर्षु त्रिसप्तत्यङ्गुलानि पञ्च यवाः। षट्सु एकोननवत्यङ्गुलानि त्रयो यवाः। सप्तसु चतुर्न-वत्यङ्गुलानि चत्वारो यवाः। अष्टसु त्र्युत्तरशताङ्गुलानि एको यवः। नवसु नवाधिकशताङ्गुलानि यवत्रयम्। दशसु पञ्चदशाधिकशताङ्गु-लानि यवद्वयम्।

अथ वृत्तं कामिके—

कर्णार्धाष्टांशसंन्यासाद्वृत्तं कुण्डमिहोच्यते। इति॥

अयमर्थः—कर्णार्धस्य योऽष्टमांशोऽङ्गुलद्वययवाधिकमेकहस्ते तस्य सम्यङ्न्यासं त्यागं कृत्वा विशिष्टयवन्यूनपञ्चदशाङ्गुलात्मकव्यासार्धेन वृत्तं कुण्डं भवति।

शारदातिलकेऽपि—

अष्टादशांशे क्षेत्रेंऽशं न्यसेदेकं बहिर्बुधः।
भ्रामयेत्तेन मानेन वृत्तं कुण्डमनुत्तमम्। इति॥

अन्यत्रोभयत्रापि क्षेत्रफलविसंवादो बोध्यः। एकांशस्य पञ्चविंशांशसहितव्यासषोडशांशाधिकव्यासार्धमितकर्कटेन सूत्रेण वा कृतं मण्डलं वृत्तकुण्डं भवति। 'इष्टचतुरस्रव्यासषोडशांशाऽधिकव्यासार्द्धमितेन कर्कटेन सूत्रेण वा कृतं मण्डलं वृत्तकुण्डम्'। प्रागग्रं पश्चिमयोनि प्रतीच्यां वृत्तव्यासार्द्धाङ्गुलानि । एकस्मिंस्त्रयोदशाङ्गुलानि यव-

चतुष्टयम्। द्वयोरेकोनविंशत्यङ्गुलानि एको यवः। त्रिषु त्रयोविंशत्यङ्गुलानि यवचतुष्टयम्। चतुर्षु सप्तविंशत्यङ्गुलानि एको यवः। पञ्चसु त्रिंशदङ्गुलानि द्वौ यवौ। षट्सु त्रयस्त्रिंशदंगुलानि एको यवः। सप्तसु पञ्चत्रिंशदङ्गुलानि सप्त यवाः। अष्टस्वष्टत्रिंशदङ्गुलानि द्वौ यवौ। नवसु चत्वारिंशदङ्गुलानि पञ्च यवाः। दशसु द्विचत्वारिंशदङ्गुलानि सप्त यवाः।

अथ षडस्रम्। 'इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिमंशान्कृत्वा तत्सूत्रं त्रिभिरंशैः प्राच्यां वर्द्धयेत्। तत्रकोऽशः स्वाष्टमांशोनः तावच्च प्रतीच्यां संवर्द्धयं तदर्द्धेन वृत्तं कृत्वा तावतैव कर्कटेन उदीचीमारभ्य षट्सु स्थानेषु अङ्कयेत्' इति। अत्रैकहस्ते तावदेवं फलम्। मध्ये दीर्घचतुरस्रम्। तद्दीर्घभुजः पञ्चविंशत्यङ्गुलानि षड्यवाश्च। एवमन्योऽपि। अल्पभुजस्तु, चतुर्दशाङ्गुलानि सप्त यवाः सप्त यूकाश्च। तत्र फलं, पञ्चाशीत्यधिकानि शतत्रयमङ्गुलानि। 'चतुरस्रदीर्घभुजसंलग्ने त्र्यस्रे तु भुज एव भूः। लम्बस्तु वृत्तचतुर्थांशः सप्ताऽङ्गुलानि त्रयो यवाः पञ्च यूकाश्च इति। तत्फलं, पञ्चनवत्यङ्गुलानि चत्वारो यवाश्च। अपरत्र्यस्रेऽप्येवम्। फलत्रययोगे पञ्चशतषट्सप्ततिश्च। यत्तु विष्णुमूलप्रभृतिभिर्बहुभिः फलसंवाद्यपि त्र्यस्रद्वययोगेन बहिर्निर्गतास्रिकं षडस्रमुक्तम्। तदयुक्तम्। अन्तरबाह्यास्रयोगेन द्वादशास्रताद्वादशभुजतापत्तेः। बहिस्तना एवास्रा नान्तर्गता इति चेत्। तथापि वक्रभुजतायां मानाभावः। चतुरस्रत्र्यस्रादावपि फलसंवादेन कदाचित्तथापत्तेश्च। एतेन रामाद्युक्तमष्टास्रमपि प्रत्युक्तम्। षडस्रिभुजाङ्गुलान्येकहस्तादिक्रमेण दशहस्तपर्यन्तम्। चतुर्दशाऽङ्गुलानि सप्त यवाः। एकविंशत्यङ्गुलानि। पञ्चविंशत्यङ्गुलानि। षड् यवाः। एकोनत्रिंशदङ्गुलानि। षट् यवाः। त्रयस्त्रिंशदङ्गुलानि। द्वौ यवौ। षट्त्रिंशदङ्गुलानि। यवचतुष्कम्। एकोनचत्वारिंशदङ्गुलानि यवत्रयम्। द्विचत्वारिंशदङ्गुलानि एको यवः। चतुश्चत्वारिंशदङ्गुलानि पञ्च यवाः। सप्तचत्वारिंशदङ्गुलानि एको यवः।

अथ पद्मम्। इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंशतिरंशाः। तत्र द्वादशभिरंशैरेकं वृत्तं कृत्वा तदुपर्यंशपञ्चमांशाधिकान्साद्धान्त्रीनंशान्संवर्द्धयाऽपरं वृत्तं कृत्वा तत्र दिक्षु विदिक्षु तदंतरालेषु च सूत्राण्यास्फालयेत्। ततोऽन्त-

वृत्तरेखाप्राक्सूत्रमत्स्यात्तदेकान्तरितमत्स्याच्च सूत्रद्वयं त्रिकोणाकारेणाऽऽस्फालयेत्। तदन्तरालमत्स्यसमसूत्रबहिर्वृत्तरेखागतमत्स्यं यावत्। तत्रैकसूत्रं समांशतया मध्येऽङ्कयित्वा सूत्रार्द्धमितकर्कटकोटिमेकां मध्याङ्के परां च सूत्रारम्भकमत्स्ये संस्थाप्य त्रिकोणमध्ये भ्रमणादेकमत्स्यं, बहिर्वृत्तरेखागतत्रिकोणान्तात्तस्मादेव च सूत्राङ्कात्रिकोणाद्बहिरपरं मत्स्यं कृत्वान्तर्मत्स्यात्रिकोणाद्बहिरपरं मत्स्यं कृत्वाऽन्तर्मत्स्यात्रिकोणाद्बहिरुपरिसूत्रार्द्धज्याकमेकं बहिर्मत्स्यात्रिकोणान्तः अधः सूत्रार्द्धज्याकमपरमिति संलग्नकोटिकमुपर्यधोभावेन धनुर्द्वयं कार्यम्। एवमपरसूत्रेऽपि कृत्वा सूत्रद्वयमार्जने वक्राग्रं पद्मदलवत्पत्रं भवति। एवमन्यानि पत्राणि अधः कृत्वा इष्टचतुरस्रक्षेत्रकल्पितचतुर्विंशत्यंशमध्ये त्रिभिरंशैर्व्यासार्द्धेन मध्ये तद्बहिश्च षडंशव्यासार्द्धेनेति द्वे वृत्ते कार्ये। तत्रान्तर्वृत्ते विस्तारे तद्वृत्तेनोच्चतायां तद्व्यासेन समा मृदा कर्णिका कार्या। बहिर्वृत्ते तु केसरा इति। तथा च कामिके—

चतुरस्राष्टभागेन कर्णिका स्याद्विभागशः।
तद्बहिस्त्वेकभागेन केसराणि प्रकल्पयेत्॥
तृतीये दलमध्यानि चतुर्थदलकोटयः।
भ्रमणात्पद्मकुण्डं स्याद्दलाग्रं दर्शयेद्बहिः। इति॥

विभागशः सर्वदिग्भागेष्वित्यर्थः। भ्रमणात्सूत्रस्येति शेषः। एतत् पद्मकुण्डम्। अथैतत्फलम्। तत्रैकस्मिन् पत्रे उपरितने महति त्र्येकहस्ते चतुर्थमहद्वृत्तव्यासार्द्धे पञ्चदशाङ्गुलानि। पञ्च यवाः। तिस्रो यूकाः। तिस्रो लिक्षाः। द्वे वालाग्रे। द्विहस्ते विंशत्यङ्गुलानि। त्रयो यवाः। तिस्रो यूकाः। एका लिक्षा। षड् वालाग्राणि। त्रिहस्ते सप्तविंशत्यङ्गुलानि। एको यवः। एका यूका। द्वे वालाग्रे। चतुर्हस्त एकत्रिंशदङ्गुलानि। द्वौ यवौ। षड्यूकाः ६। षड्वालाग्राणि ६। पञ्चहस्ते पञ्चत्रिंशदङ्गुलानि ३५ तिस्रो यूकाः ३। षट् लिक्षाः ६। पञ्च वालाग्राणि ५। षड्ढस्तेऽष्टत्रिंशदङ्गुलानि ३८। यवद्वयम् २। एका यूका १। द्वे वालाग्रे २। सप्तहस्ते, एकचत्वारिंशदङ्गुलानि ४१। यवत्रयम् ३। सप्त यूकाः ७। अष्टहस्ते चतुश्चत्वारिंशदङ्गुलानि ४४। द्वौ यवौ २। यूकात्रयम् ३। षट् लिक्षाः ६। नवहस्ते सप्तचत्वारिंशदङ्गुलानि ४७। द्वे यूके २। नव लिक्षाः

९ । दशहस्त एकोनपञ्चाशदङ्गुलानि ४९ । पञ्च यवाः । चतस्रो यूकाः । सप्त लिक्षाः । द्वयमेकं वा वालाग्रम् । पञ्च रथरेणवः । षट् त्रसरेणवः । त्रयः परमाणवः' इति । भूस्तु तृतीयवृत्ताष्टमांशस्य ज्यारूपा । सा चैकहस्तादिक्रमेण दशहस्तान्तम् । नवाऽङ्गुलानि । एको यवः । तिस्रो यूकाः । षड लिक्षाः । त्रीणि वालाग्राणि ॥ १ ॥ द्वादशाङ्गुलानि । सप्तयवाः । सप्तयूकाः लिक्षाद्वयम् ॥ २ ॥ पञ्चदशाङ्गुलानि । यवत्रयम् । एका यूका । सप्तलिक्षाः । चत्वारि वालाग्राणि ॥ ३ ॥ अष्टादशाङ्गुलानि । यवत्रयम् । यूकात्रयम् । चतस्रोलिक्षाः । षड्वालाग्राणि॥४॥ विंशत्यङ्गुलानि । चत्वारो यवाः । द्वे यूके । तिस्रो लिक्षाः ॥ ५ ॥ द्वाविंशत्यङ्गुलानि । त्रयो यवाः । सप्तयूकाः । षड्लिक्षाः । षड्वालाग्राणि ॥ ६ ॥ चतुर्विंशत्यङ्गुलानि । यवद्वयम् । यूकात्रयम् । एका लिक्षा । त्रीणि वालाग्राणि ॥ ७ ॥ पञ्चविंशत्यङ्गुलानि । सप्त यवाः । षड्यूकाः । चतस्रो लिक्षाः ॥ ८ ॥ सप्तविंशत्यङ्गुलानि । चत्वारो यवाः। तिस्रो यूकाः । तिस्रो लिक्षाः ॥ ९ ॥ एकोनत्रिंशदङ्गुलानि । एको यवः । एका यूका । लिक्षात्रयम् । षड्वालाग्राणि ॥ एतत्पद्मकुण्डम् ॥ अथैतत्फलम् । तत्रैकस्मिन्पत्रे उपरितने महति त्र्यस्रे तावल्लम्बोऽङ्गुलानि दश । त्रयो यवाः । सप्त यूकाः । त्रीणि वालाग्राणि ॥ पञ्च रथरेणवः । पञ्च त्रसरेणवः । चत्वारः परमाणवः । इति ॥ भूस्तु नवाङ्गुलानि । एको यवः । तिस्रो यूकाः । षड्लिक्षाः । त्रीणि वालाग्राणि । द्वौ रथरेणू । त्रयस्त्रसरेणवः । सप्त परमाणवः इति ॥ लम्बेन तद्भूम्यर्धगणने फलम् ' पञ्चाशदङ्गुलानि । सप्त यवाः । द्वे यूके । षड्वालाग्राणि ॥ द्वौ रथरेणू । एकस्त्रसरेणुः । चत्वारः परमाणवः । इति ॥ अधस्तनेऽल्पत्र्यस्रे भूः सैव । लम्बस्तु चत्वार्यङ्गुलानि । चत्वारो यवाः । चतस्रो यूकाः । सप्त लिक्षाः । एकं वालाग्रम् । पञ्च रथरेणवः । एकस्त्रसरेणुः । सप्त परमाणवः । इति । पूर्वोक्तभूम्यर्धेनैतल्लम्बगणने फलम् ' एकविंशतिरङ्गुलानि । पञ्च यूकाः । पञ्च लिक्षाः । एकं वालाग्रम् । पञ्च रथरेणवः । षट् त्रसरेणवः । त्रयः परमाणवः । इति । त्र्यस्रद्वयफलैकीकरणे ' द्वासप्ततिरङ्गुलानि पत्राग्रवक्रतायां तु तावत्येव भूस्त्यज्यते, तावत्येव संगृह्यते इति गणितं क्षेत्रफलं विहितम् । अष्टानामपि पत्राणां क्षेत्रफलमेलनेऽङ्गुलानां षट्सप्तत्यधिका पञ्चशती॥५७६॥

अथाऽष्टास्रम् ॥ इष्टचतुरस्रव्यासश्चतुर्विंशतिभागः । तत्र द्वाभ्यां भागाभ्यामेकभागचतुर्थांशाधिकाभ्यां मध्यसूत्रं संवर्द्ध्य मध्याद्वृद्ध्यन्तधृतकर्कटेन वृत्तं कृत्वेशानपूर्वान्तरालमारभ्यैकादशभिरंशैर्मितेन सूत्रेणाऽष्टसु स्थानेष्वङ्कितेषु अष्टास्रं भवति । अत्र चैकादशांशः स्वाष्टमांशोनः कार्यः ॥ अत्रैकहस्तादावुपपत्तिः । मध्ये समचतुरस्रम् । तद्भुजमानं तु विंशत्यङ्गुलानि । एको यवः । यूकात्रयं च । चतुरस्रचतुर्भागेषु चत्वारि त्र्यस्राणि । तत्र भुवश्चतुरस्रभुजा एव । एवं पूर्वोक्ताङ्कसूत्रमितावेव च द्वौ भुजौ । लम्बानां तु चत्वार्य्यङ्गुलानि । एको यवः । द्वे यूके इति । तत्र चतुरस्रफलं चत्वारि शतानि सप्त चाङ्गुलानि । ४०७ । यवाश्च सप्त । प्रत्येकं त्र्यस्रफलं द्विचत्वार्यङ्गुलानि ४२ । त्र्यस्रचतुष्टयफलमष्टषष्ट्यधिकं शतम् ॥ १६८ ॥ रामोक्तं त्वष्टास्रं विषमवक्रभुजत्वात् षोडशास्रतापत्तेश्चोपेक्ष्यमिति दिक् ॥

अष्टास्रिभुजाङ्गुलानि । एकस्मिन् दशाङ्गुलानि सप्त यवाः । द्वयोः पञ्चदशाङ्गुलानि । त्रयो यवाः । त्रिष्वष्टादशाङ्गुलानि । सप्त यवाः । चतुर्ष्वेकविंशत्यङ्गुलानि । सप्त यवाः ॥ पञ्चसु चतुर्विंशत्यङ्गुलानि । यवत्रयम् । षट्सु षड्विंशत्यङ्गुलानि षड्यवाः ॥ सप्तस्वष्टाविंशत्यङ्गुलानि । सप्त यवाः । अष्टसु त्रिंशदङ्गुलानि सप्त यवाः । नवसु द्वात्रिंशदङ्गुलानि । षड्यवाः । दशसु चतुस्त्रिंशदङ्गुलानि । यवचतुष्टयम् । षोडशसु त्रिचत्वारिंशदङ्गुलानि । पञ्च यवाः ॥

अथ चतुर्विंशांशाः ।

एकस्मिन् एकाङ्गुलम् । द्वयोरेकाङ्गुलम् । त्रयो यवाः । त्रिष्वेकाङ्गुलम् । षड्यवाः । चतुर्ष्वङ्गुलद्वयम् । पञ्चस्वङ्गुलद्वयम् । षट्स्वङ्गुलद्वयम् । यवत्रयम् । सप्तस्वङ्गुलद्वयम् । पञ्च यवाः । षट्सु अष्टस्वङ्गुलद्वयम् । षड्यवाः नवस्वङ्गुलत्रयम् । दशस्वङ्गुलत्रयम् । एको यवः । षोडशसु चत्वार्यङ्गुलानि । एकहस्तादिषु चतुर्थांशाः । एकस्मिन्षडङ्गुलानि । द्वयोरष्टाङ्गुलानि । चत्वारो यवाः । त्रिषु दशाङ्गुलानि । यवत्रयम् । यूकाश्चतस्रः । चतुर्षु द्वादशाङ्गुलानि । पञ्चसु त्रयोविंशाङ्गुलानि । एको यवः । षोडशसु चत्वार्यङ्गुलानि । एकहस्तादिषु चतुर्थांशाः । एकस्मिन् षडङ्गुलानि । द्वयोरष्टाङ्गुलानि । चत्वारो यवाः । त्रिषु दशाङ्गुलानि । यव-

त्रयम्। यूकाश्चतस्रः। चतुर्षु द्वादशाङ्गुलानि। पञ्चसु त्रयोविंशाङ्गुलानि। त्रयो यवाः। यूकाश्चतस्रः। षट्सु चतुर्दशाङ्गुलानि। षट् यवाः। सप्तसु-पञ्चदशाङ्गुलानि। सप्त यवाः। अष्टसु षोडशाङ्गुलानि। सप्त यवाः। चतस्रो यूकाः। नवस्वष्टादशाङ्गुलानि। दशस्वष्टादशाङ्गुलानि। सप्त यवाः। षट् यूकाः। षोडशसु चतुर्विंशत्यङ्गुलानि।

अथाष्टमांशाः। एकस्मिन्नङ्गुलत्रयम्। द्वयोश्चत्वार्यङ्गुलानि। द्वौ यवौ। त्रिषु पञ्चाङ्गुलानि। द्वौ यवौ। चतुर्षु षडङ्गुलानि। पञ्चसु षडङ्गुलानि। षड् यवाः। षट्सु सप्ताङ्गुलानि। यवत्रयम्। सप्तस्वष्टाङ्गुलानि अष्टस्वष्टाङ्गुलानि। यवचतुष्कम्। नवसु नवाङ्गुलानि। दशसु नवाङ्गुलानि। चत्वारो यवाः। षोडशसु द्वादशाङ्गुलानि।

अथ षष्ठांशाः। एकस्मिन्नङ्गुलचतुष्टयम्। द्वयोः पञ्चाङ्गुलानि। पञ्च यवाः। तिस्रो यूकाः। त्रिषु षडङ्गुलानि। सप्त यवाः। चतस्रो यूकाः। चतुर्ष्वष्टाङ्गुलानि। पञ्चस्वष्टाङ्गुलानि। सप्त यवाः। पञ्च यूकाः। षट्सु नवाङ्गुलानि। षड् यवाः। चतस्रो यूकाः। सप्तसु दशाऽङ्गुलानि। चत्वारो यवाः। पञ्च यूकाः। अष्टस्वेकादशाङ्गुलानि। द्वौ यवौ। चतस्रो यूकाः। नवसु द्वादशाङ्गुलानि। दशसु द्वादशाऽङ्गुलानि। पञ्च यवाः। षोडशसु षोडशाङ्गुलानि।

अथ द्वादशांशाः। एकस्मिन्नङ्गुलद्वयम्। द्वयोर्द्वे अङ्गुले। सप्त यवाः। त्रिष्वङ्गुलत्रयं। यवचतुष्टयम्। चतुर्षु चत्वार्यङ्गुलानि। पञ्चसु चत्वार्यङ्गुलानि। चत्वारो यवाः। षट्सु चत्वार्यङ्गुलानि। सप्त यवाः। सप्तसु पञ्चाङ्गुलानि। द्वौ यवौ। अष्टसु पञ्चाङ्गुलानि पञ्च यवाः। नवसु षडङ्गुलानि। दशसु षडङ्गुलानि। यवत्रयम्। षोडशस्वष्टाङ्गुलानि।

अथ ध्वजायः।

स्थापने सर्वकुण्डानां ध्वजायः सर्वसिद्धिदः। इत्युक्तत्वात्सर्वेषु चैतेषु प्रोक्तमानादर्धाङ्गुलयवादिन्यूनमतिरिक्तं वा कृत्वा ध्वजायः साधनीयः। विस्तारे दैर्घ्यगुणितैरष्टभिर्विभक्ते यद्येकः परिशिष्यते तदा ध्वजाय इति।

तदुक्तम्—

ध्वजो धूम्रोऽथ सिंहश्च सौरमेयः खरो गजः।
ध्वाङ्क्षश्चेति क्रमेणैतदायाष्टकमुदाहृतम्। इति॥

भविष्यपुराणे—

मुनिमानं शतार्द्धे तु शते चारत्निमात्रकम् ।
सहस्रे त्वथ होतव्ये कुर्यात्कुण्डं करात्मकम् ॥
द्विहस्तमयुते तच्च लक्षहोमे चतुःकरम् ।
अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम् । इति ॥

यत्तु शारदातिलके—

एकहस्तमितं कुण्डमेकलक्षे विधीयते ।
लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत् ॥
दशहस्तमितं कुण्डं कोटिहोमेऽपि शस्यते । इति ॥

यत्तु स्कान्दे—

कोटिहोमे चतुर्हस्तं चतुरस्रं समन्ततः ।
योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलम् ।

इति च लक्षादिहोमेस्वेकहस्तादिकुण्डविधानं, कोटिहोमे दशहस्तस्य । तद्यथोचितव्रीह्यादिचिरदाहस्थूलद्रव्यविषयं घृतादिक्षिप्रदाहि द्रव्यविषयं च ज्ञेयम् ।

अथ खातम् ।

मोहचूडोत्तरे—

चतुर्विंशतिमं भागमङ्गुलं परिकल्प्य तु ॥
चतुर्विंशाङ्गुलं हस्तं कुण्डानां परिकल्पयेत् ।
हस्तमात्रं खनेत्तिर्यगूर्ध्वमेखलया सह ॥

पिङ्गलमते—

खातादेकाङ्गुलं त्यक्त्वा मेखलानां स्थितिर्भवेत् ।

तथा—

सर्वेषामेव कुण्डानामेका वा तिस्र एव वा ।

कुण्डलक्ष्मविवृत्तौ—

कण्ठाङ्गुलाद्बहिः कार्या मेखलैका षडङ्गुला । इति ॥
चतुस्त्रिद्व्यङ्गुला वाऽपि तिस्रः सर्वत्र शोभनाः । इति ॥
मेखलात्रितयं कार्यं कोणरामयमाङ्गुलैः ।

कोणाश्चत्वारः । रामास्त्रयः । यमौ द्वौ । चतुस्त्रिद्व्यङ्गुलत्वं च विस्तारे, उच्चतायां च । अत एव शारदातिलके मेखलामानं प्रकृत्य—

विस्तारोत्सेधनो ज्ञेया मेखलाः सर्वतो बुधैः । इति ॥

रामेण तु—

तिसृणामपि त्र्यङ्गुलोच्चैव । विस्तारस्तु चतुस्त्रिंशत्र्यङ्गुलः इत्युक्तम् ।

अथ योनिः ।

तत्र स्वायम्भुवे—

मेखलामध्यतो योनिः कुण्डार्द्धा त्र्यंशविस्तृता ।
अङ्गुष्ठमानोष्ठकण्ठा कार्याऽश्वत्थदलाकृतिः ॥

कुण्डार्द्धा दीर्घा । त्र्यंशविस्तृता मूले अग्रेऽश्वत्थदलवत्कुञ्चिता । अङ्गुष्ठमानौ ओष्ठकण्ठौ यस्याः सा अङ्गुष्ठमानोष्ठकण्ठा । ओष्ठः कुण्डमध्ये प्रविष्टं योन्यग्रम् । कण्ठो योनिमेखलेत्येके । तथा च भुवि वेष्टिता योनिः कार्येत्यर्थः । मेखलात उच्चो भागः इत्यपरे ।

त्रैलोक्यसारे—

दैर्घ्यात्सूर्याङ्गुला योनिस्त्र्यंशोना विस्तरेण तु ।
एकांगुलोच्छ्रिता सा तु प्रविष्टाभ्यन्तरे तथा ॥
कुम्भद्वयसमायुक्ता वाऽश्वत्थदलवन्मता ।
अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिक्षमा । इति ॥

त्र्यंशोना योनिर्दैर्घ्यात् । अष्टांगुलेति यावत् । कुम्भद्वयेन वृत्तार्द्धद्वयाकारेण मूलदेशे समायुक्ता ।

शारदातिलके—

मूलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकम् । इति ॥
प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी ॥
पूर्वामुखाः स्मृताः शेषा यथा शोभासमन्विताः ।

प्रागग्नियोनिकुण्डानामिति पूर्वोक्तस्वायम्भुववचनाद्योनिकुण्डे योनिः कार्या इति केचित् । वस्तुतस्तु नवानां चतुरस्रादि पक्ष एतस्य सावकाशत्वाद्विशेषनिषेधाच्च योनिकुण्डे योनिर्नैव कार्या इति ।

त्रैलोक्यसारे—

नवमस्यापि कुण्डस्य योनिर्दक्षदले स्थिता । इति ॥

तथा—

दक्षस्था पूर्वयामे तु जलस्था पश्चिमोत्तरे ।

दाक्षं दक्षिणम् । जलं पश्चिमम् । एवं च होतारोऽपि पूर्वदक्षिणकुण्डयोरुत्तराभिमुखाः । पश्चिमोत्तरयोः पूर्वाभिमुखाः सिध्यन्ति ।

होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवत् ।

इति तत्रैवोक्तेः । आसां मेखलानामुपरीत्यर्थः ॥ एवमेव रूपनारायणादयः । शारदायाम्—योनिकुण्डे योनिमब्जकुण्डे नाभिं च वर्जयेत् । इति ॥

सिद्धान्तशेखरेपि 'योनौ योनिं न कुर्वीत' इति ।

शारदातिलके—

कुण्डानां कल्पयेदन्ते नाभिमम्बुजसन्निभाम् ।
तत्तत्कुण्डानुरूपां च मानमस्या निगद्यते ॥
मुष्टिरत्न्येकहस्तानां नाभिरुत्सेधतो मता ।
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत् ॥
यवद्वयक्रमेणैव नाभिं पृथगुदारधीः । इति ॥

नेत्रवेदाङ्गुलोपेता उच्चतायां व्यंगुला विस्तारायामयोश्चतुरङ्गुलेत्यर्थः । द्वित्रिहस्तादिकुण्डेषु द्विद्वियववृद्धिस्तु विस्तारायामयोः षष्ठांशविस्तारपरा । उच्चतायां द्वादशांशपरेति रामादयः ।

शारदातिलके—

एकमेव भवेत्कुण्डमीशान्यां वैष्णवाध्वरे । इति ॥

विश्वकर्मा—

खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ॥
मेखलारहिते शोकोऽभ्यधिके वित्तसङ्क्षयः ।
भार्याविनाशनं प्रोक्तं कुण्डे योन्या विना कृते ।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत्कण्ठवर्जितम् । इति ॥

सिद्धान्तशेखरे—

मानहीने महाव्याधिरधिके शत्रुवर्द्धनम् ।
योनिहीने त्वपस्मारो वाक्कुण्ठः कण्ठवर्जिते ॥

तत्रैव—

स्थण्डिलं वाऽपि कुर्वीत सुसिद्धैः सिकतैः सितैः ।
हस्तमात्रं प्रविस्तारं सुसमे त्र्यङ्गुलोन्नतम् ॥

ग्रन्थान्तरेऽपि—

नित्यं नैमित्तिकं होमं स्थण्डिले वा समाचरेत् ।
हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनम् ।
त्र्यङ्गुलोत्सेधसंयुक्तं चतुरस्रं समन्ततः । इति ॥

इति श्रीशङ्करभट्टात्मजभट्टनीलकण्ठकृते दानमयूखे
कुण्डमेखलानिर्णयः ॥

अथ षोडशारचक्रम् ।

तत्र गुरुर्वेद्यां मध्ये त्रिहस्तव्यासं चतुरस्रं प्रसाध्य प्रागपरदक्षिणोत्तरनवनवरेखाभिस्तच्चतुःषष्टिकोष्ठकं कुर्यात् । तत्र कोष्ठानि प्रत्येकं नवाङ्गुलानि संपद्यन्ते । ततो बहिरन्त्यपङ्क्तिषु चतुर्दिक्षु मध्यकोष्ठानि चत्वारि चत्वारि मार्जयित्वा तदुपर्युपान्त्यपङ्क्तिषु पार्श्वयोस्तत्रयं त्रयं त्यक्त्वा प्रतिदिशं मध्यकोष्ठद्वयं मार्जयेत् । तेन चतुर्दिक्षु षट्षट्कोष्ठानि चत्वारि द्वाराणि सिद्ध्यन्ति । ततो मध्यस्थितषोडशकोष्ठानि मार्जयेत् । ततो बाह्य एकैकं कोणकोष्ठं विहाय कोणकोष्ठद्वारपीठान्तरालवर्तीन्यवशिष्टानि पञ्च पञ्च कोष्ठानि मार्जयेत् । तथाच मध्यचतुरस्रपीठस्य पादाः सिद्ध्यन्ति । ततो मध्याच्चत्वारि वृत्तानि कुर्यात् । तत्राद्ये चत्वार्यङ्गुलानि व्यासः । द्वितीयेऽष्टौ । तृतीये चतुर्विंशतिः । चतुर्थे षड्विंशतिरिति । तच्चतुरङ्गुलं वृत्तं कर्णिकारूपं पीतेन रजसा पूरयित्वा कर्णिकावधिरेखां सितेन रजसा निर्माय तद्बहिरष्टाङ्गुलात्मके वृत्ते पीतरक्तसितरजोभिः संपादितमूलमध्याग्राणि षोडश केशराणि संपाद्य तत्केसरावधिरेखां सितेनैव रजसाऽङ्गुलोन्नतां संपाद्य चतुर्विंशाङ्गुलात्मके तद्बहिर्वृत्ते सितरजसा अष्टदिक्ष्वष्टौ पत्राणि रक्ताग्राणि कुर्यात् । ततो दलान्तरे रेखां सितेन रजसा विधाय दलान्तराणि कृष्णेन रजसा पूरयित्वा तद्बहिरेकाङ्गुलान्तरं बहिर्वृत्तरेखां सितेनैव रजसा संपाद्य वृत्तद्वयान्तरं परितो दलाग्रतलात्सन्धिचिह्नैः षोडशधा विभज्य प्रतिभागं यवाकारान् षोडश कीटान्श्यामपीतारुणश्वेतरजोभिः कल्पयित्वा तदन्तरा यथायोगं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्यामहरिताः

पञ्च रेखा लिखेत् । तद्बहिः पीठक्षेत्रं चतुरस्रं यथाशोभं रजोभिरलंकृत्य पीठावधिरेखां सितेन रजसा चतुरस्रां रचयेत् । द्वारक्षेत्राणि पूर्वादितः पीतश्यामश्वेतहरितरजोभिः पूरयेत् । आग्नेयादिकोणकोष्ठचतुष्टयं लोहितहरितश्यामधवलैः पूरयेत् । आग्नेयादिपीठपादचतुष्टयं पञ्चकोष्ठात्मकं क्रमात्सितरक्तपीतकृष्णरजोभिः पूरयेत् । ततः सितेन रजसाङ्गुलोन्नतेन बहिश्चतुरस्ररेखां कुर्यादिति पितामहचरणाः, मदनाद्याश्च ।

ठक्कुरमते—

चतुर्हस्तं चतुरस्रम् । तत्र प्रत्येकं द्वादशाङ्गुलानि कोष्ठानि। वृत्तानि तु पञ्च । तत्राऽऽद्ये वृत्ते चत्वार्यङ्गुलानि व्यासः । द्वितीयेऽष्टौ, तृतीये विंशतिः, चतुर्थे चतुर्विंशतिः, पञ्चमे षट्त्रिंशदिति । पञ्चकोष्ठात्मकं पीठपादचतुष्टयमाग्नेयादिक्रमेण रक्तहरितश्यामसितैः पूरणीयम्। कोणकोष्ठचतुष्टयं त्वेकं त्रिभिस्त्रिभिर्वर्णैरिति विशेषः । इति षोडशारचक्रनिर्मितिः । इदमेव च वारुणं मण्डलम् ।

तथा—

वज्रं प्रागुत्तमे भागे आग्नेय्यां शक्तिमुज्ज्वलाम् ।
आलिखेद्दक्षिणे दण्डं नैर्ऋत्यां खड्गमालिखेत् ॥
पाशं तु वारुणे लेख्यं ध्वजं वै वायुगोचरे ।
कौबेर्यां तु गदां लिख्य ईशान्यां शूलमालिखेत् ॥
शूलस्य वामदेशे तु चक्रं पद्मं तु दक्षिणे । इति ॥

ततो महावेद्युपरि पञ्चवर्णफलपुष्पोपशोभितं वितानं बध्नीयादिति ततो महावेदीशानभागे आयामदैर्घ्योच्छ्रायैर्हस्तमिता ग्रहादिस्थापनार्था परा वेदिर्या विहिताऽस्ति । हेमाद्रिमते वितस्त्युच्छ्राया वा तस्यां सर्वतोभद्रं लिखेत् ।

तल्लेखनप्रकारोऽपीत्थम्—

प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिम् ।
खण्डेन्दुस्त्रिपदः कोणे शृङ्खला पञ्चभिः पदैः ॥
एकादशपदा वल्ली भद्रा तु नवभिः पदैः ।
चतुर्विंशत्पदा वापी परिधिर्विंशकैः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ।

श्वेतेन्दुः शृङ्खला कृष्णा वल्लीं नीलेन पूरयेत् ॥
भद्राऽरुणा सिता वापी परिधिः पीतवर्णकः ।
बाह्यान्तरदला श्वेता कर्णिका पीतवर्णिका ॥
परिध्यावेष्टितं पद्मं मध्ये सत्त्वं रजस्तमः ।
तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरासुरान् । इति ॥

अथ ग्रहपूजाप्रकारः ।

तत्र ग्रहा मात्स्ये—

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहा नव ॥

स्कान्दे—

जन्मभूर्गोत्रमेतेषां वर्णस्थानमुखानि च ।
योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः ॥

स्थानमधिष्ठानम् ।

एतद्विज्ञाय यः कुर्यात्तत्सर्वं सफलं भवेत् ।

वर्णजन्मनी आह वृद्धपराशरः—

रक्तः कश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी ।
रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः ॥
पीतो ब्राह्मः सुराचार्यः शुक्लः शुक्रो भृगूद्वहः ।
कृष्णः शनी रवेः पुत्रः कृष्णो राहुः प्रजापतेः ॥
कृष्णः केतुः कृशानूत्थः कृष्णाः पापास्त्रयोऽप्यमी ॥

भुवमाह स एव—

उत्पन्नोऽर्कः कलिङ्गेषु यमुनायां च चन्द्रमाः ।
अङ्गारकस्त्ववन्त्यां तु मगधायां हिमांशुजः ॥
सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा ।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिके पुरे ॥
अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः ।

गोत्रमाह स एव—

आदित्यः काश्यपो गोत्रादात्रेयश्चन्द्रमा भवेत् ।
भारद्वाजो भवेद्भौमस्तथाऽऽत्रेयश्च सोमजः ॥

शक्रपूज्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा ।
शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा ॥
केतवो जैमिनीयाश्च ग्रहा लोकहितावहाः ।

दामोदरीये ग्रहान् प्रक्रम्य—

वर्णरूपगुणैर्युक्तान्यथाहृत्याऽऽवाहयेत्तु तान् ।

तत्रैव—

भानुं तु मण्डलाकारमर्द्धचन्द्राकृतिं विधुम् ।
अङ्गारकं त्रिकोणं च बुधं बाणाकृतिं विदुः ॥
पद्माकारं गुरुं कुर्याच्चतुष्कोणं च भार्गवम् ।
दण्डाकृतिं शनिं राहुं मकराकारमेव च ॥
खड्गाकारांस्तथा केतून्स्थापयेदनुपूर्वशः ।

ग्रहादिरूपाणि मात्स्ये—

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥
श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः ।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥
रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ।
चतुर्भुजो मेषवाहो वरदः स्याद्धरासुतः ॥
पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः ।
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥
देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ।
दण्डिनौ वरदौ यौ हि साक्षसूत्रकमण्डलू ॥
इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः ।
बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥
करालवदनः खड्गचर्मशूली वरप्रदः ।
नीलसिंहासनस्थश्च राहुस्तत्र प्रशस्यते ॥
धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ।
गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥
सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ।
अङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा । इति ॥

केतूनां बहुत्वे एकमेव देवतात्वम्—

वृद्धपराशरः—

मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे।
दक्षिणेन धरासूनुं बुधं पूर्वोत्तरेण तु॥
उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्गवम्।
शनैश्चरं पश्चिमस्यां राहुं दक्षिणपश्चिमे॥
पश्चिमोत्तरतः केतून्स्थापयेदनुपूर्वशः।

मुखानि मात्स्ये—

देवानां तत्र संस्थाप्या विंशतिर्द्वादशाधिका।
आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः॥
शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ।
प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतो मुखाः॥

इति स्कान्दात्। सूर्यः प्राङ्मुखः। पूजायां संमुखतानुरोधात्। प्रत्यङ्मुखः इत्यन्ये।

अधिदेवताः प्रत्यधिदेवताश्च।

मात्स्ये—

भास्करस्येश्वरं विद्यादुमां च शशिनस्तथा।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम्॥
ब्रह्माणं च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम्।
शनैश्चरस्यापि यमं राहोः कालं तथैव च॥
केतूनां चित्रगुप्तं च सर्वेषामधिदेवताः।
अग्निरापः क्षितिर्विष्णुरिन्द्रश्चैन्द्री च देवता॥
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः।

एतेषां लक्षणानि विष्णुधर्मोत्तरे—

पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः।
कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः॥
अक्षसूत्रं च कमलं दर्पणं च कमण्डलुम्।
उमा बिभर्ति हस्तेषु पूजिता त्रिदशैरपि॥
कुमारः षण्मुखः कार्यः शिखण्डकविभूषणः।
रक्ताम्बरधरो देवो मयूरवरवाहनः॥

कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः ।
पताका वैजयन्ती स्याच्छक्तिः कार्या च वामयोः ॥
विष्णुः कौमोदकी पद्मशङ्खचक्रधरः क्रमात् ।
प्रदक्षिणं दक्षिणाधः करादारभ्य नित्यशः ॥
पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्मुखः ।
अक्षमालां स्रुवं बिभ्रत्पुस्तकं च कमण्डलुम् ॥
चतुर्दन्तगजारूढो वज्री कुलिशभृत्करः ।
शचीपतिः प्रकर्तव्यो नानाभरणभूषितः ॥
ईषन्नीलो यमः कार्यो दण्डहस्तो विजानता ।
रक्तदृक्पाशहस्तश्च महामहिषवाहनः ॥
कालः करालवदनो नीलाङ्गश्च बिभीषणः ।
पाशहस्तो दण्डहस्तः कार्यो वृश्चिकरोमवान् ॥
अपीच्यवेषस्वाकारं द्विभुजं सौम्यदर्शनम् ।
दक्षिणे लेखनीं चित्रगुप्तं वामे तु पात्रकम् ॥
पिङ्गलश्मश्रुकेशाक्षः पीनाङ्गोजवरोऽरुणः ।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः ॥
चिह्नितं चमरेणास्य करमन्यं प्रकल्पयेत् ।
आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः ॥
दधानाः पाशकलशौ मुक्ताभरणभूषिताः ।
शुक्लवर्णा मही कार्या दिव्याभरणभूषिता ॥
चतुर्भुजा सौम्यवपुश्चण्डांशुसदृशाम्बरा ।
रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम् ॥
पद्मं करे च कर्तव्यं भुवो यादवनन्दन ।
दिग्गजानां चतुर्णां सा कार्या पृष्ठगता तथा ॥

विष्णोरिन्द्रस्य चोक्तम् ।

वामे शच्याः करे कार्या सौम्या सन्तानमञ्जरी ।
वरदा मण्डिता कार्या द्विभुजा च तथा सती ॥
यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः ।
अक्षं स्रुचं स्रुवं बिभ्रत्कुण्डिकां च प्रजापतिः ॥

अक्षम् अक्षमालाम्, कुण्डिकां कमण्डलुम् ।

अक्षसूत्रधराः सर्पाः कुण्डिकापुच्छभूषणाः ॥
एकभोगास्त्रिभोगा वा सर्वे कार्याश्च भीषणाः।
ब्रह्मलक्षणमुक्तम्।
ग्रहाणां दक्षिणे पार्श्वे स्थापयेदधिदेवताः।
ग्रहाणामुत्तरे पार्श्वे न्यसेत्प्रत्यधिदेवताः॥

अथ विनायकादिलक्षणानि।

चतुर्भुजस्त्रिनेत्रश्च कर्तव्योऽत्र गजाननः।
नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः॥
दक्षे दन्तं करे दद्याद्द्वितीये चाक्षसूत्रकम्।
तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा॥
शक्तिं बाणं तथा शूलं खड्गं चक्रं च दक्षिणे।
चन्द्रबिम्बमधो वामे खेटमूर्ध्वे कपालकम्॥
सुकुक्कुटं च बिभ्राणा सिंहारूढा तु दिग्भुजा।
एषा देवी समुद्दिष्टा दुर्गा दुर्गार्तिनाशिनी॥
धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः।
वरदानकरो धूम्रवर्णः कार्यो विजानता॥
नीलोत्पलाभं गगनं तद्वर्णाम्बरधारि च।
चन्द्रार्कहस्तं कर्तव्यं द्विभुजं सौम्यखण्डवत्॥
द्विभुजौ सौम्यवरदौ कर्तव्यौ रूपसंयुता।
तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः॥
वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विजाः।
एकस्य दक्षिणे पार्श्वे वामे चास्य च यादव॥
नारीयुगं प्रकर्तव्यं सुरूपं चारुदर्शनम्।
रत्नभाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा॥

अथ लोकपालरूपाणि।

तत्रेन्द्राग्नियमब्रह्मरूपाणि प्रत्यधिदेवतोक्त्योक्तानि।
खड्गचर्मधरो बालो निर्ऋतिर्नरवाहनः॥
ऊर्ध्वकेशो विरूपाक्षः करालः कालिकाप्रियः।
नागपाशधरो रक्तभूषणः पद्मिनीपतिः॥

वरुणोऽम्बुपतिः स्वर्णवर्णो मकरवाहनः ।

वायुर्विनायकादिपञ्चके उक्तः । सोमो ग्रहेषु । अनन्तः प्रत्यधिदेवतासु । विनायकादिस्थापनं ग्रहेभ्य उत्तरतः इति संप्रदायः । दक्षिणपश्चिमवायव्योत्तरपूर्वेषु यथाक्रममित्यन्ये ।

राहुमन्दृदिनेशानामुत्तरस्यां यथाक्रमम् ।
गणेशदुर्गा वायुश्च राहुकेत्वोश्च दक्षिणम् ॥
आकाशमश्विनौ चेति पञ्चैतान्स्थापयेद्बुधः ।

इति वचनानुसारेणेति भट्टाः रूपनारायणश्च ।

पूजाप्रकारमाह याज्ञवल्क्यः—

यथावर्णं प्रदेयानि वासांसि कुसुमानि च ।
गन्धाश्च बलयश्चैव धूपो देयोऽत्र गुग्गुलुः ॥

मात्स्ये—

धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितम् ॥

धूपे विशेषो हेमाद्रौ स्कान्दे—

रवेः कुन्दुरुकं धूपं शशिनस्तु घृताक्षताः ।
भौमे सर्जरसं चैव अगरुं च बुधे स्मृतम् ॥
सिह्लकं गुरवे दद्याच्छुक्रे बिल्वागुरु स्मृतम् ।
गुग्गुलं मन्दवारे तु लाक्षा राहोश्च केतवे ॥

कुन्दुरुकं सल्लकीनिर्यासः । सर्जः शालः । सिह्लकं इति मध्यदेशे प्रसिद्धम् । बिल्वागुरु बिल्वफलनिर्याससहितमगुरु । । मन्दवारे शनैश्चराय । लाक्षा राहवे केतुभ्यश्च ।

गन्धे विशेषमाह—

दिवाकरकुजाभ्यां हि दापयेद्रक्तचन्दनम् ।
चन्द्रे च भार्गवे चैव सितवर्णं प्रदापयेत् ॥
कुङ्कुमेन च संयुक्तं चन्दनं जीवसौम्ययोः ।
अगुरुं चापि कस्तूर्या राहवे त्वर्कजेषु च ॥

अङ्गदेवतानां तु—

पुष्पाणि सितवर्णानि चन्दनं च विलेपनम् ।
एतेषां गुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ॥

वासांसि शुक्लानीति संप्रदायः।

ग्रहबलीनाह—

गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम्।
अङ्गारकाय सँयावं बुधाय क्षीरषष्टिके॥
दध्योदनं तु जीवाय शुक्राय च घृतौदनम्।
शनैश्चराय कृसरमाजं मांसं च राहवे॥
चित्रौदनं च केतुभ्यः सर्वभक्ष्यैरथार्चयेत्।

अत्र सर्वभक्ष्यैरथार्चयेत् इत्यन्यदपि मोदकादि देयम् इति दामोदरठक्कुरः। सँयावो गोधूमचूर्णसाधितो घाटाख्य इत्यपि स एव। तण्डुलमसूरान्नमिति रूपनारायणः। कृसरं तिलतण्डुलं दुग्धसाधितम्।

चित्रौदनम्—

तिलतण्डुलमिश्रं स्यादजाक्षीरं तु शोणितम्।
कर्णनासागृहीतं स्यादेतच्चित्रौदनं स्मृतम्। इति दामोदरः॥

याज्ञवल्क्यः—

शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम्।
पूजयन्तो ग्रहानेतॉंल्लभन्ते सकलं फलम्॥

यत्तु पृथ्वीचन्द्रोदयादौ वर्णरूपगुणैर्युक्तान्व्याहृत्याऽऽवाहयेत्तु तानितिवचनात् ॐ भूरादित्यमावाहयामि ॐ भुवः आदित्यमावाहयामि ॐ स्वः आदित्यमावाहयामि ॐ भूर्भुवःस्वरादित्यमावाहयामि इति व्यस्तसमस्तव्याहृतिभिरावाह्य, भगवन्नादित्य नक्षत्राधिपते काश्यपगोत्र कलिङ्गदेशेश्वर जपापुष्पोपमाङ्गद्युते द्विभुज पद्माभयहस्त सिन्दूरवर्णमाल्याम्बरानुलेपन ज्वलन्माणिक्यखचितसर्वाङ्गाभरण भास्वत्तेजोनिधे त्रिलोकप्रकाशक त्रिदेवतामयमूर्त्ते नमस्ते सन्नद्धारुणध्वजपताकोपशोभितेन सप्ताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छाऽग्निरुद्राभ्यां सहेत्यादिविशेषणैरपि युक्तान्ग्रहान् आवाहयेदिति तन्मूलं विमृश्य कार्यम्।

वामनग्रन्थे—

आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः।
समिदाज्यचरूणां च तिलहोमफलं ततः॥
ग्रहात्वे कुम्भपूजायां चार्चनस्य फलं च यत्।
लोकपालगणेशाद्यास्तत्र या अङ्गदेवताः॥

तासां जपफले तद्वद्गृह्णीयाज्जलपूर्वकम् ।
ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणा ततः । इति ॥

इति ग्रहपूजाविधिः ।

अथ पुण्याहवाचनम् ।

त्रिकाण्डमण्डनः—

गर्भाधानादिसंस्कारेष्विष्टापूर्तक्रतुष्वपि ।
वृद्धिश्राद्धं पुरा कार्यं कर्मादौ स्वस्तिवाचनम् ॥

व्यासः—

संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् ।
धर्मकर्मणि मङ्गल्ये सङ्ग्रामेऽद्भुतदर्शने । इति ॥

गृह्यपरिशिष्टे—

स्वस्तिवाचनमृद्धिपूर्तेषु तत्कर्मणश्चान्तयोः कुर्यात् ।

आश्वलायनः—

दैविके तान्त्रिके चादौ ततः पुण्याह इष्यते । इति ॥

तच्च रूपनारायणीये इत्थम् । त्रीनधिकान्ब्राह्मणान्भोजयित्वोदङ्मुखानुपवेश्य वस्त्रादिभिः परितोष्य पुण्याहं भवन्तो ब्रुवन्तु इति ब्राह्मणान्यजमानः प्राङ्मुखस्त्रिः श्रावयेत् । ततो ब्राह्मणाः ॐ पुण्याहमिति त्रिर्ब्रूयुः । ततः ' स्वस्ति भवन्तो ब्रुवन्त्विति ' इति त्रिःश्रावयेत् । ॐ स्वस्तीति त्रिर्ब्रूयुः । ततः ' ऋद्धिं भवन्तो ब्रुवन्तु ' इति त्रिः श्रावयेत् । ' ऋद्ध्यताम् ' इति त्रिः प्रतिवचनम् । एतच्च, ' ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्ति ऋद्धिरित्योङ्कारपूर्वं त्रिस्त्रिरेकैकामाशिषो वाचयित्वा इत्यादिना बौधायनेनोक्तम् ।

यमः—

पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्यात्क्षत्रियवैश्ययोः । इति ॥

बह्वृचगृह्यपरिशिष्टे तु ' अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा, दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनाऽऽयुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु । शिवा आपः सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टं चास्तु ।

गन्धाः पान्तु । सुमङ्गल्यं चास्तु । पुष्पाणि पान्तु । सुश्रियमस्तु । अक्षताः पान्तु । आयुष्यमस्तु । ताम्बूलानि पान्तु । ऐश्वर्यमस्तु । दक्षिणाः पान्तु । आरोग्यमस्तु । दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु । यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहृषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । वाच्यताम् । ॐ द्रविणोदा द्रविणसस्तुरस्य, सविता पश्चातात्, नवो नवो भवति जायमानः, उभा दिवि दक्षिणावन्तो अस्थुः इत्येता ऋचः पुण्याहे ब्रूयात् । व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । समाहितमनसः स्मः । प्रसीदन्तु भवन्तः । प्रसन्नाः स्मः । शान्तिरस्तु । पुष्टिरस्तु । तुष्टिरस्तु । वृद्धिरस्तु । अविघ्नमस्तु । आरोग्यमस्तु । आयुष्यमस्तु । शिवं कर्माऽस्तु । कर्मसमृद्धिरस्तु । धर्मसमृद्धिरस्तु । पुत्रसमृद्धिरस्तु । धनधान्यसमृद्धिरस्तु । इष्टसमृद्धिरस्तु । अरिष्टनिरसनमस्तु । यत्पापं तत्प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु । उत्तरे कर्मण्यविघ्नमस्तु । उत्तरोत्तरमहरहरभिवृद्धिरस्तु । उत्तरोत्तराः क्रियाः शुभाः शोभनाः प्रवर्तन्ताम् । तिथिकरणमुहूर्तनक्षत्रसंपदस्तु । तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । तिथिकरणे मुहूर्तनक्षत्रे सग्रहे सदैवते प्रीयेताम् । दुर्गापाञ्चाल्यौ प्रीयेताम् । अग्निपुरोगा विश्वे देवाः प्रीयन्ताम् । इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम् । ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । श्रीसरस्वत्यौ प्रीयेताम् । श्रद्धामेधे प्रीयेताम् । भगवती कात्यायनी प्रीयताम् । भगवती माहेश्वरी प्रीयताम् । भगवती ऋद्धिकरी प्रीयताम् । भगवती वृद्धिकरी प्रीयताम् । भगवती पुष्टिकरी प्रीयताम् । भगवती तुष्टिकरी प्रीयताम् । भगवन्तौ विघ्नविनायकौ प्रीयेताम् । भगवान्स्वामी महासे-

नः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयताम् । हरिहरहिरण्यगर्भाः प्रीयन्ताम् । सर्वा ग्रामदेवताः प्रीयन्ताम् । सर्वाः कुलदेवताः प्रीयन्ताम् । हता ब्रह्मद्विषः । हताः परिपन्थिनः । हता अस्य कर्मणो विघ्नकर्तारः । शत्रवः पराभवं यान्तु । शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्त्वीतयः । शुभानि वर्द्धन्ताम् । शिवा आपः सन्तु शिवा ऋतवः सन्तु । शिवा अग्नयः सन्तु । शिवा आहुतयः सन्तु । शिवा ओषधयः सन्तु । शिवा वनस्पतयः सन्तु । शिवा अतिथयः सन्तु । अहोरात्रे शिवे स्याताम् । निकामे निकामे नः पर्जन्यो वर्षतु । फलवत्यो न ओषधयः पच्यन्ताम् । योगक्षेमो नः कल्पताम् । शुक्राङ्गारकबुधबृहस्पतिशनिराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् । भगवान्नारायणः प्रीयताम् । भगवान्पर्जन्यः प्रीयताम् । भगवान्स्वामी महासेनः प्रीयताम् । पुण्याहकालं वाचयिष्ये । वाच्यताम् । उद्गातेव शकुने साम गायसि । याज्यया यजति । यत्पुण्यं नक्षत्रम् । तद्बट्कुर्वीतोपव्युषम् । यदा वै सूर्य उदेति । अथ नक्षत्रं नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत् । तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । तानि वा एतानि यमनक्षत्राणि । यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । मह्यं सहकुटुम्बिने महाजनान्नमस्कुर्वाणायाशीर्वचनमपेक्षमाणायामुककर्मणे पुण्याहं भवन्तो ब्रुवन्तु इति ब्राह्मणान्प्रार्थयेत् । ॐ पुण्याहम् ३ इति विप्रा ब्रूयुः । स्वस्तये वायुमुपब्रवामहै० आदित्य उदयनीयः० स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु इति । अष्टौ देवा वसवः सोम्यासः । चतस्रो देवीरजराः श्रविष्ठाः । ते यज्ञं पान्तु रजसः परस्तात् । संवत्सरीणममृतं स्वस्ति । मह्यमित्यादिपूर्ववत् । स्वस्ति भवन्तो ब्रुवन्तु । आयुष्मते स्वस्ति । इति विप्राः । ऋध्याम स्तोमम्० सर्वामृद्धिमृध्नुयामिति० ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । त्रीणि त्रीणि वै देवानामृद्धानि । त्रीणि छन्दांसि त्रीणि सवनानि । त्रय इमे लोकाः । ऋद्ध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति । मह्यम् इत्यादि० ऋद्धिं भवन्तो ब्रुवन्तु । इति विप्रान्प्रार्थयेत् ऋद्ध्यताम् ।

श्रिये जातः, श्रिय एवैनं० यस्मिन्ब्रह्माभ्यजयत्सर्वमेतदमुं च लोकमिदमुंच सर्वम् । तन्नो नक्षत्रमभिजिद्विजित्य । श्रियं दधात्वहृणीयमानम् । अहेबुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् । मह्यं० श्रीरस्त्विति भवन्तो ब्रुवन्तु । अस्तु श्रीः । पुण्याहवाचनफलसमृद्धिरस्तु । भगवान्प्रजापतिः प्रीयताम् । इति पुण्याहवाचनम् ।

ततो नीराजनमभिषेकं च यथाशाखं कारयेदिति । पुण्याहवाचनं चादिमध्यान्तेषु कार्यम् । 'आदावन्ते च मध्ये च कुर्याद्ब्राह्मणवाचनम्' इति वचनात् । ततोऽस्मिन्कर्मण्यमुकगोत्रममुकप्रवरममुकशर्माणं गुरुं त्वां वृणे इत्याचार्यं वृत्वा ऋग्वेदिनौ द्वौ पूर्वे कुण्डे होमं कर्तुं ऋत्विक्त्वेन त्वामहं वृणे ।

> ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
> अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥

इति प्रत्येकं वृणुयात् ।

सर्वत्र प्रथमं ब्रह्मणस्ततो होतुरिति क्रमः । वृतोऽस्मीत्येव प्रतिवचनम् ।

यजुर्वेदिनौ दक्षिणे—

> कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ।
> काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव । इति ॥

सामगौ पश्चिमे—

> सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।
> भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव । इति ॥

अथर्वणावुत्तरे—

> बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः ।
> वैशम्पायनगोत्रस्तु ऋत्विक् त्वं मे मखे भव । इति ॥

ततो जापकानाम् । ते च अष्टौ इति कल्पतरौ । चत्वार इति रूपनारायणादयः । एतन्मते अष्टौ ऋत्विजः चत्वारो जापकाः गुरुश्च इति त्रयोदश । अष्टौ ऋत्विजोऽष्टौ जापकाः गुरुश्चेति सप्तदश वा । अष्टौ ऋत्विजश्चत्वारो जापकाश्चत्वारो द्वारपालकाः गुरुश्चेति वा सप्तदश । एवं चरणान्तरं तत्क्रमेणैवाचार्यादीनां तच्छाखया मधुपर्क इति हेमाद्रौ ।

संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत् ।
अपूज्य कारयेत्कर्म किल्बिषैरेव युज्यते ॥

इति वचनात् । ततो यदाबध्नन् इति मन्त्रेण,

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामभिबध्नामि रक्षे मा चल मा चल । इति ॥

अनेन च पीतसूत्रं यजमानतत्पत्नीगुर्वृत्विग्द्वारपालानां हस्ते रक्षार्थं बध्नन्ति मध्ये देशे । ततो गौर्यादिषोडश ब्राह्म्यादिसप्त च मातृः श्रीश्च लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वतीति वसोर्द्धारादेवताश्च संपूज्य सपिण्डमपिण्डं वा वृद्धिश्राद्धं कुर्यात् ।

तत्र रूपनारायणीये विशेषः—

अग्नौकरणमर्घ्यं चाऽऽवाहनं चावनेजनम् ।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्तते ॥

तथा—

पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते ।
स्वधावाचनलोपोऽस्ति विकिरस्तु न लिप्यते ॥
अक्षय्यं दक्षिणा स्वस्ति सौमनस्यं यथास्थिति । इति ॥

तत्र संक्षिप्य प्रयोगः—

सत्यवसुसंज्ञका विश्वे देवाः । ॐभुर्भूवः स्वः इदं वः पाद्यम् । एवं सर्वत्र पाद्यम् । मातृपितामहीप्रपितामह्यः नान्दीमुख्यः, ॐभुर्भूवः स्वः इदं वः पाद्यम् । पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यम् । मातामहप्रमातामहवृद्धप्रमातामहाः नान्दीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः पाद्यम् । आचमनम् । सत्यवसुसंज्ञकानां विश्वेषां देवानां भूर्भुवः स्वः इदमासनम् । सुखासनम् । नान्दीश्राद्धे क्षणौ क्रीयेताम् । ॐ तथा । प्राप्नुतां भवन्तौ । प्राप्नवावः । मातृपितामहीप्रपितामहीनां नान्दीमुखीनां भूर्भुवः स्वः इदमासनम् । सुखासनम् । नान्दीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा । प्राप्नुतां भवन्तौ । प्राप्नवावः । पितृपितामहप्रपितामहानां नान्दीमुखानां भूर्भुवः स्वः इदमासनम् । सुखासनम् । नान्दीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा । प्राप्नुतां भवन्तौ । प्राप्नवावः । मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नान्दीमुखानां भूर्भुवः स्वः इदमासनम् । सुखासनम् । नान्दीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा । प्राप्नुतां भवन्तौ । प्राप्नवावः । ततो गन्धादिदानम् । सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य

इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्य इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्य इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नान्दीमुखेभ्यः पत्नीसहितेभ्य इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । ततः परिवेषणं कृत्वा गायत्र्या प्रोक्ष्य, 'पृथिवी ते पात्रम्' इति पात्रमालभ्य, सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नान्दीमुखेभ्यः सपत्नीकेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । 'स्वस्ति न इन्द्रो वृद्धश्रवाः' इति पाठः । अनेन नान्दीश्राद्धेन कर्माङ्गदेवताः प्रीयन्तां वृद्धिः । पुरुषसूक्तादिजपः । नान्दीश्राद्धं सुसंपन्नम् । सुप्रोक्षितमस्तु । शिवा आपः सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टं चास्तु । नान्दीमुख्यो मातरः पितामह्यः प्रपितामह्यः प्रीयन्ताम् । नान्दीमुखाः पितरः पितामहाः प्रपितामहाः प्रीयन्ताम् । नान्दीमुखा मातामहाः प्रमातामहा वृद्धप्रमातामहाः प्रीयन्ताम् । ततो गोत्रं नो वर्द्धताम् । वर्द्धतामित्युक्ते दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन' इति संप्रार्थ्य, विप्रैः 'दातारो वोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च वो मा व्यगमद्बहु देयं च वोऽस्तु । अन्नं च वो बहु भवेदतिथींश्च लभध्वम् । याचितारश्च वः सन्तु मा च याचिढ्वं कञ्चन' इति प्रत्युक्ते, द्राक्षामलकौ तन्निष्क्रयं वा दक्षिणां दत्त्वा विश्वे देवाः प्रीयन्ताम्, इति दैवे वाचयित्वा, वाजे वाजे इति मातृपूर्वं विसृज्य, आमा वाजस्येत्यनुव्रजेत् ॥

इति नान्दीश्राद्धम् ।

अथ वास्तुपूजा ।

मात्स्ये—

यज्ञोत्सवादौ च बलिस्तवाहारो भविष्यति ।

वास्तुपूजामकुर्वाणस्तवाहारो भविष्यति । इति ॥

तथा—

वास्तुयज्ञः समुद्दिष्टस्तदाप्रभृति शान्तयः ।

इति ज्ञानरत्नावल्याम् ।

चतुःषष्टिपदं वास्तु देवानां परमं हितम् ।
एकाशीति पदं वास्तु ग्रहाणां तु प्रकीर्त्यते ॥

प्रपञ्चसारे—

कृत्वाऽवनिं समतलां चतुरस्रसंख्या-
मष्टादिकोष्ठकपदां च हि कोणसूत्राम् ।
तस्यां चतुष्पदसमन्वितमध्यकोष्ठे
ब्रह्मा तु साधकवरेण समर्चनीयः । इत्यादि ॥

अत्र प्रयोगः—

मण्डपनिर्ऋतिभागे हस्तमात्रां वेदिं कृत्वा तस्यां तत्स्थापिते वस्त्रे वा सुवर्णादिशलाकया नव रेखाः प्राक्पश्चिमायता नव च दक्षिणोदगायताः कृत्वा मध्यकोष्ठचतुष्टयमेकीकृत्य प्रतिकोणं त्रिषु त्रिषु पदेषु सूत्रं दद्यात् । तथाच चतुर्विंशतिरर्द्धपदानि संपद्यन्ते । अथ कालादि सङ्कीर्त्य 'प्रारीप्सितस्यामुककर्मणः साङ्गतासिद्ध्यर्थं वास्तुपूजां करिष्ये' इति सङ्कल्प्य वास्तुमण्डलस्याग्नेयादिकोणेषु शङ्कुचतुष्टयम्,

विशन्तु भूतले नागा लोकपालाश्च सर्वतः ।
मण्डपेऽत्रावतिष्ठन्तु आयुर्बलकराः सदा ॥

इति मन्त्रेण निधाय,

अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः ।
तेभ्यो बलिं प्रयच्छामि पुण्यमोदनसंयुतम् ॥

इत्याग्नेय्यां दत्त्वा नैर्ऋत्यां—

नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः ।
बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णन्तु मन्त्रितम् ॥
ॐ नमो वायुरक्षेभ्यो ये चान्ये तान्समाश्रिताः ।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥

इति वायव्यां दत्त्वेशान्याम्—

रुद्रेभ्यश्चैव सर्पेभ्यो ये चाऽन्ये तान्समाश्रिताः ।

बलिं तेभ्यः प्रयच्छामि गृह्णन्तु सततोत्सुकाः ॥

इति मन्त्रैः शङ्कुपार्श्वे यथाक्रमं माषभक्तबलीन्दत्त्वा शान्तिर्यशोवती कान्तिर्विशाला प्राणवाहिनी। सती च सुमना नन्दा सुभद्रा नवमी मता। इति नव प्रागायतरेखादेवताः पूजयित्वा, हिरण्या सुप्रभा लक्ष्मी-र्विभूतिर्विमला प्रिया। जया काला विशोका च इति नव दक्षिणो-त्तरायतरेखादेवताश्च संपूज्य, मध्ये समस्तव्याहृतिभिर्वास्तुपुरुषमावाह्य, वास्तोष्पते इति मन्त्रेण संपूज्य बलिं च दत्त्वा मध्यपदचतुष्टये वास्तोर्हृदये ब्रह्मणे नम इति ब्रह्माणमावाह्य पूजयित्वा, ॐ ब्रह्मणे नमो बलिं समर्पयामीति पायसादिबलिं दद्यात्। ततः पूर्वपदद्वये दक्षि-णस्तने अर्यम्णे नमः, दक्षिणपदद्वये जठरदक्षिणभागे विवस्वते, पश्चि-मपदद्वये जठरवामभागे मित्राय, उदक्पदद्वये वामस्तने पृथ्वीधराय नमः, आग्नेयकोणसूत्रद्विधाकृतपदोत्तरार्द्धे दक्षिणहस्ते सावित्राय, दक्षिणार्द्धे सवित्रे च। एवं नैर्ऋत्यपदपूर्वार्द्धे वृषणयोर्विबुधाधिपाय, तत्पश्चिमार्द्धे मेढ्रे जयन्ताय, वायव्यपदद्वयदक्षिणार्द्धे वामहस्ते राजयक्ष्मणे उत्त-रार्द्धे रुद्राय च ईशानपदार्द्धे उरसि अद्भ्यः, दक्षिणार्द्धे मुखे आप-वत्साय, ततोऽन्त्यपङ्क्तिगते ईशानपददक्षिणार्द्धे शिरसि शिखिने, तद्दक्षिणसार्द्धपदे दक्षिणनेत्रे पर्जन्याय, तद्दक्षिणपदयोर्दक्षिणश्रोत्रे जयन्ताय, दक्षिणपदयोर्दक्षिणांसे कुलिशायुधाय, तद्दक्षिणयोर्दक्षिण-बाहौ सूर्याय, तद्दक्षिणयोर्दक्षिणबाहावेव सत्याय, तद्दक्षिणे सार्द्धे दक्षिणकूर्परे भृशाय, तद्दक्षिणपदार्द्धे दक्षिणप्रबाहौ आकाशाय, तत्प-श्चिमार्द्धे दक्षिणप्रबाहावेव वायवे, तत्पश्चिमे सार्द्धे दक्षिणमणिबन्धे पूष्णे, तत्पश्चिमयोर्दक्षिणपार्श्वे वितथाय, पश्चिमयोर्दक्षिणपार्श्वे एव गृहक्षताय, तत्पश्चिमयोर्दक्षिणोरौ यमाय, तत्पश्चिमयोर्दक्षिणजानौ गन्धर्वाय, तत्पश्चिमे सार्द्धे पदे दक्षिणजङ्घायां भृङ्गराजाय, तत्पश्चिमे नैर्ऋत्यपदार्द्धे दक्षिणस्फिजि मृगाय, तदुत्तरार्द्धे पादयोः पितृभ्यः। तदुत्तरे सार्द्धपदे वामस्फिजि दौवारिकाय। तदुत्तरयोर्वामजङ्घायां सुग्रीवाय। तदुत्तरयोर्वामजानौ पुष्पदन्ताय। तदुत्तरयोर्वामोरौ वरु-णाय। तदुत्तरयोर्वामपार्श्वे सुराय। तदुत्तरे सार्द्धपदे वामपार्श्वे एव शोषाय। तदुत्तरे वायव्यार्द्धे वाममणिबन्धे पापाय। तत्प्रागर्द्धे वाम-प्रबाहौ रोगाय। तत्प्राक्सार्द्धे वामप्रबाहावेवाहये। तत्प्राग्द्वये वामकू-

पैरे मुख्याय, तत्प्राग्द्वय वामबाहौ भल्लाटाय । तत्प्राग्द्वये वामबाहावेव सोमाय । तत्प्राग्द्वये वामांसे सर्पाय । तत्प्राक्सार्द्धे वामश्रोत्रे अदित्यै । तत्प्रागर्द्धे वामनेत्रे दित्यै । तदुत्तरे वास्तोष्पते इति वास्तोष्पतिम् , ततो मण्डलाद्बहिरीशानादिषु चरक्यै, विदार्यै, पूतनायै, पापराक्षस्यै । ततः पूर्वादिषु स्कन्दाय, अर्यम्णे, जृम्भकाय, पिलिपिच्छाय । पुनः पूर्वादिषु इन्द्रादीनावाह्य ततो मण्डलादीशाने कलशं संस्थाप्य, तत्र वरुणं, तत्त्वा यामि इत्यावाह्य पूजयेत् । 'यथा मेरुगिरेः शृङ्गं देवाना-मालयः सदा । तथा ब्रह्मादिदेवानां मम यज्ञे स्थिरो भवेत् , इति प्रार्थ-येत् । तत उदुम्बरादिसमित्तिलाज्यैः स्वतन्त्रस्थण्डिलेऽष्टाविंशतिरष्टौ वा प्रत्येकं तत्तन्नाममन्त्रैर्हुत्वा वास्तोष्पत इति चतुर्भिश्च ॐ वास्तोष्पते ध्रुवा-स्थूणाम् , इत्यनेन च पञ्च बिल्वफलानि हुत्वा स्विष्टकृदादिपूर्णाहुत्यन्तं कुर्यात् । ततो मण्डलदेवताभ्यः पायसबलिं दत्त्वा 'कृणुष्व पाजः' इति सूक्ता-दिना मण्डपं त्रिसूत्र्या वेष्टयित्वा वास्तुकलशोदकेन यजमानमभिषिच्य पुनः संपूज्य यथाशक्ति दक्षिणां दत्त्वा ब्राह्मणान्भोजयेदिति । शारदा-तिलके तु होमो नोक्तः । तिलाज्यादिद्रव्याणां विकल्प इति ग्रन्थान्तरे ।

इति वास्तुपूजा

मात्स्ये—

उपोषितास्ततः सर्वे कृत्वैवमधिवासनम् । इति ॥

पाद्मे—

उपवासो भवेदेवमशक्तौ नक्तमिष्यते । सद्योऽधिवासनं वाऽथ कुर्याद्यो विकलो नरः । इति । अधिवासनं चैवम् । शुक्लवेषः सपत्नीकः सऋत्विक्को यजमानः पूर्णकलशं गृहीत्वा, भद्रं कर्णेभिः इत्यादि-मन्त्रघोषेण मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य देशका-लादि स्मृत्वा करिष्यमाणैतत्कर्माङ्गतया मण्डपदेवतास्थापनादि करिष्य इति सङ्कल्प्य गणपतिं संपूज्य मण्डपान्तः सर्वतः सर्षपान् विकिरेत् । तत्र मन्त्राः—

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ इति ॥

ततः कुशैः पञ्चगव्येन सर्वत्र आपोहिष्ठा इति तृचेन प्रोक्षयेत्। ततः स्वस्ति न इति मन्त्रं पठेत्॥

अथ द्वारपूजा।

पूर्वद्वारे द्वारश्रियै नमः ऊर्ध्वं देहल्यै० अधः। वामदक्षिणस्तम्भयोः गणेशाय० स्कन्दाय नमः। द्वारस्थितकलशद्वये गङ्गायै० यमुनायै०। दक्षिणद्वारे द्वारश्रियै० ऊर्ध्वं देहल्यै० अधः। स्तम्भयोः पुष्पदन्ताय०। कपर्दिने०। कलशद्वये गोदायै० कृष्णायै०। पश्चिमे द्वारश्रियै० इत्यूर्ध्वम्। देहल्यै० अधः। स्तम्भयोः नन्दिने० चण्डाय०। कलशद्वये रेवायै० ताप्त्यै०। उत्तरे द्वारश्रियै० ऊर्ध्वम्। देहल्यै० अधः। स्तम्भयोः महाकालाय० भृङ्गिणे नमः। कलशद्वये वाण्यै० वेण्यै०। इति द्वारपूजा॥

ततः पूर्वे बहिर्हस्तमात्रे वटतोरणमाश्वत्थं वा सुदृढनामकं सुशोभननामकं वा शङ्खाङ्कितं अग्निमीळे इति मन्त्रेण न्यस्य संपूज्य राहुबृहस्पती तत्र न्यसेत्सम्पूजयेच्च। तत्रैकः कलशः स्थाप्यः। तत्र मही द्यौः इति भूमिप्रार्थना। ओषधयः सम् इति यवप्रक्षेपः। आजिघ्र कलशेषु इति कलशनिधानम्। इमं मे गङ्गे इति जलपूरणम्। गन्धद्वाराम् इति गन्धं प्रक्षिपेत्। या ओषधीः इति सर्वौषधीः। काण्डात्काण्डात् इति दूर्वाः। अश्वत्थे वः इति पञ्चपल्लवान्। स्योना पृथिवि इति सप्त मृदः। याः फलिनीः इति फलम्। स हि रत्नानि इति रत्नम्। हिरण्यरूपः इति हिरण्यम्। युवा सुवासाः इति वस्त्रादिना वेष्टयेत्। पूर्णा दर्वि इति धान्यपूर्णपात्रमुपरि निदध्यात्। तत्र ध्रुवावाहनं पूजनञ्च ध्रुवायनमः ध्रुवमा०। ततो दक्षिणे औदुम्बरं प्लाक्षं वा सुभद्रं विकटं वा चक्राङ्कितं तोरणम्, इषे त्वोर्जे त्वा इति निधाय चन्दनादिचर्चितं कृत्वा सूर्यं अङ्गारकं च तत्र न्यसेत्। ततः पूर्ववत्कलशं स्थापयित्वा तत्र धराभावाद्यार्चयेत्। ततः पश्चिमे प्लाक्षमौदुम्बरं वा सुकर्मसु भीमं वा गदाङ्कितं तोरणं अग्न आयाहि इति न्यस्य चन्दनादिना चर्चितं कृत्वा शुक्रं बुधं च तत्र न्यसेत्। ततः पूर्ववत्कलशं स्थापयित्वा तत्र वाक्पत्यावाहनपूजनादि। तत उत्तरे नैयग्रोधमाश्वत्थं पालाशं वा सुहोत्रं सुप्रभवपद्माङ्कितं तोरणं शंनो देवीरिति निधाय पूजितं कृत्वा सोमं केतुं शनिं च तत्र न्यसेत्। ततः कलशं स्थाप-

यित्वा तत्र विघ्नेशस्य आवाहनपूजनादि । ततः पूर्वद्वारे द्वारशाखा-द्वये कलशद्वयं दध्यक्षतादियुक्तं पूर्ववत्स्थापयेत् । ऐरावतं कलशद्वये न्यस्यार्चयेत् । तत्र पूर्वस्मिन् ऋग्वेदिनावृत्विजौ द्वावेकं वा शान्तिसूक्तजपार्थत्वेन त्वामहं वृण इति प्रत्येकं वृत्वा—ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः । अत्रिगोत्रस्तु विप्रेन्द्र शान्तिपाठं मखे कुरु । इति वृत्वाऽग्निमीळे इत्यादिना पूजयेच्च । ततः—एह्येहि सर्वाऽमरसिद्धसाध्यैरभिष्टुतो वज्रधराऽमरेश । संवीज्यमानोऽप्सरसां गणेन रक्षाऽध्वरं नो भगवन्नमस्ते । भो इन्द्र, इहाऽऽगच्छेह तिष्ठ इतीन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकं द्वारकलशे आवाह्य, त्रातारमिन्द्रमिति पूजयित्वा, आशुः शिशान इति मन्त्रेण पीतां पताकां पीतं ध्वजं च समुच्छ्रयेत् । ततः, ऐरावतस्थं पीतवर्णं सहस्राक्षं किरीटिनं । दक्षिणवामहस्तस्थवज्रोत्पलमिन्द्रं ध्यात्वा, इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः । यतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः । इति नत्वा, इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकायैतं माषभक्तबलिं समर्पयामि, इति बलिं दद्यात् । तत आचम्याऽऽग्नेयकोणे गत्वा पूर्ववत्कलशं स्थापयित्वा तत्र पुण्डरीकममृतं च संपूज्य—एह्येहि सर्वाऽमरहव्यवाह मुनिप्रवर्यैरभितोऽभिजुष्ट । तेजोवता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते । भो अग्ने इहागच्छेह तिष्ठ इति साङ्गादिकमग्निं कलशे आवाह्य, त्वं नो अग्ने इत्यग्निं संपूज्य, अग्निं दूतमिति रक्तां पताकां रक्तं ध्वजं चोच्छ्रयेत् । ततः, छागस्थं रक्तं दक्षिणवामकरधृतशक्तिकमण्डलुं यज्ञोपवीतिनमग्निं ध्यात्वा—आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः । धूमकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नमः । इति नत्वा, अग्नये साङ्गाय इत्यादि एतं माषभक्तबलिं समर्पयामि, इति बलिं दद्यात् । ततः कृताचमनो दक्षिणे गत्वा प्रतिद्वारशाखं पूर्ववत्कलशद्वयं स्थापयित्वा वामनं दिग्गजं तत्रार्चयेत् । ततो यजुर्वेदिनौ द्वावेकं वा दक्षिणद्वारे शान्तिसूक्तजपत्वेन त्वां वृणे इत्युक्त्वा—कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः । काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव । इति प्रत्येकं संप्रार्थ्य, इषे त्वोर्ज्जे त्वा इति पूजयेत् । ततः—एह्येहि वैवस्वत धर्मराज सर्वाऽमरैरर्चितधर्ममूर्ते । शुभाशुभानन्दशुचामधीश शिवाय नः पाहि मखं नमस्ते । भो यमेहागच्छेह तिष्ठ इति साङ्गादिं यममावाह्य, यमाय सोममिति संपूज्य कृष्णां

पताकां कृष्णं ध्वजं चायं गौरित्युच्छ्रयेत् । ततो महिषारूढं धृतदण्डपाशदक्षिणवामकरमञ्जनपर्वततुल्यरूपमग्निसमलोचनं यमं ध्यात्वा, महामहिषमारूढं दण्डहस्तं महाबलम् । आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम् । इति नत्वा, साङ्गाय यमायैतं माषभक्तबलिं समर्पयामि, इति बलिं दद्यात् । तत आचम्य नैर्ऋत्यां पूर्ववत्कलशं स्थापयित्वा कुमुदगजं दुर्जयं च संपूज्य—एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसङ्घैः । ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते । भो निर्ऋते इहागच्छेह तिष्ठ इति साङ्गमावाह्य, असुन्वन्तमिति संपूज्य नीलां पताकां नीलं ध्वजं च, मोषुणः इत्युच्छ्रित्य, नरारूढं खड्गहस्तं नीलवर्णं महाबलं महाकायं बहुराक्षसयुतं निर्ऋतिं ध्यात्वा—निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनम् । आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यताम् । इति नत्वा, साङ्गाय निर्ऋतये एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । तत आचम्य पश्चिमे गत्वा प्रतिद्वारशाखं कलशद्वयं निधायाञ्जनदिग्गजं न्यस्यार्चयेत् । ततः सामगावृत्विजौ ऋत्विजं वा वृत्वा, पश्चिमद्वारे शान्तिसूक्तजपार्थत्वेन त्वां वृणे इत्युक्त्वा—सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः । भारद्वाजस्तु विप्रेन्द्र शान्तिपाठं मखे कुर्विति प्रार्थयित्वा, अग्नआयाहि इति प्रार्थ्यततः—एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः । विद्याधरेन्द्राऽमरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते । इत्युक्त्वा भो वरुण इहागच्छेह तिष्ठ इति साङ्गं वरुणमावाह्य, तत्वा यामि इति संपूज्य श्वेतां पताकां ध्वजं च इमं मे वरुण इत्युच्छ्रित्य, मकरस्थं पाशहस्तं किरीटिनं श्वेतवर्णं वरुणं ध्यात्वा—पाशहस्तं च वरुणं यादसां पतिमीश्वरम् । आवाहयामि यज्ञेऽस्मिन् वरुणाय नमो नमः इति नत्वा साङ्गाय वरुणायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । तत उपस्पृश्य वायव्यां गत्वा पूर्ववत्कलशं स्थापयित्वा पुष्पदन्तं सिद्धार्थं च तत्र पूजयित्वा—एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसङ्घैः । प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते । भो वायो इहाऽऽगच्छेह तिष्ठ इति साङ्गादिं वायुमावाह्य, तव वायवृतस्पत इति संपूज्य, वायोः शतं इति धूम्रां पताकां ध्वजं चोच्छ्रित्य, मृगारूढं चित्राम्बरधरं युवानं वरध्वजधरं दक्षिणवामहस्तं वायुं ध्यात्वा,

वायुमाकाशगं चैव पवनं वेगवद्गतिम् ।
आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यताम् ॥
अनाकारो महौजाश्च यश्चादृष्टगतिर्दिवि ।
तस्मै पूज्याय जगतो वायवेऽहं नमामि ते ॥

इति नत्वा साङ्गाय वायवे एतं माषभक्तबलिं समर्पयामि, इति बलिं दद्यात् । तत आचम्योत्तरे गत्वा प्रतिशाखं कलशद्वयं स्थापयित्वा सार्वभौमं दिग्गजं न्यस्य पूजयित्वा अथर्वविदौ ऋत्विजौ ऋत्विजं वा वृत्वा उत्तरद्वारे शान्तिसूक्तजपार्थत्वे नाहं त्वां वृणे इति उक्त्वा,

बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः ।
वैशम्पायन विप्रेन्द्र शान्तिपाठं मखे कुरु ॥

इत्युक्त्वा प्रार्थ्य, शन्नो देवीरिति पूजयेत् ।

एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्द्धम् ।
सर्वौषधीभिः पितृभिः सहैव
गृहाण पूजां भगवन्नमस्ते ॥

भोः सोम इहागच्छेह तिष्ठेति साङ्गादिं सोममावाह्य, वयं सोम इति संपूज्य हरितां पताकां ध्वजं चाप्यायस्वेति न्यस्य, नरयुतपुष्पक-विमानस्थं कुण्डलकेयूरहारशोभितं वरदगदाधरदक्षिणवामहस्तं मुकुटिनं महोदरं स्थूलकायं ह्रस्वं पिङ्गलनेत्रं पीतविग्रहं शिवसखं विमानस्थं कुबेरं ध्यात्वा ।

सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः ।
तस्मै सोमाय देवाय नक्षत्रपतये नमः ॥

इति नत्वा साङ्गाय सोमायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । तत ईशान्यां गत्वाऽऽचम्य पूर्ववत्कलशं संस्थाप्य सुप्रतीकनामानं दिग्गजं मङ्गलं च तत्र पूजयित्वा,

एह्येहि विश्वेश्वर नस्त्रिशूल-
कपालखट्वाङ्गधरेण सार्द्धम् ।
लोकेन यज्ञेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन्नमस्ते ॥

भो ईशानेहागच्छेह तिष्ठेति तमावाह्य, तमीशानमिति संपूज्य, श्वेतां सर्ववर्णां वा पताकां ध्वजं च, 'अभि त्वा देव सवित:'इत्युच्छ्रित्य, वृषारूढं वरदत्रिशूलयुतदक्षिणवामहस्तद्वयं त्रिनेत्रं शुद्धस्फटिकवर्णमीशानं ध्यात्वा।

वृषस्कन्धसमारूढं शूलहस्तं त्रिलोचनम्।
आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यताम्॥
सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः।
शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः॥

इति नत्वा साङ्गायेशानायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्। तत आचम्येशानपूर्वयोर्मध्ये गत्वा।

एह्येहि पातालधरामरेन्द्र
नागाङ्गनाकिन्नरगीयमान।
यक्षोरगेन्द्रामरलोकसङ्घै-
रनन्त रक्षाध्वरमस्मदीयम्॥

भो अनन्त इहाऽऽगच्छेह तिष्ठेति साङ्गमनन्तमावाह्य, 'आयं गौः'इति संपूज्य, मेघवर्णां श्वेतां पताकां ध्वजं च 'आयं गौः'इत्युच्छ्रित्य,

अनन्तं शमनासीनं फणसप्तकमण्डितम्।

पद्मशङ्खधरोर्ध्वाधोदक्षिणकरद्वयं चक्रगदाधरोर्ध्वाधोवामकरद्वयं नीलवर्णमनन्तं ध्यात्वा,

योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः॥

इति नत्वा साङ्गायाऽनन्तायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्। तत आचम्य नैर्ऋतपश्चिमयोर्मध्ये गत्वा,

एह्येहि सर्वाधिपते सुरेन्द्र
लोकेन सार्द्धं पितृदेवताभिः।
सर्वस्य धातास्यमितप्रभावो
विशाध्वरं नः सततं शिवाय॥

भो ब्रह्मन्निहागच्छेह तिष्ठेति ब्रह्माणमावाह्य, 'ब्रह्मजज्ञानम्' इति संपूज्य, रक्तां पताकां ध्वजं च, 'ब्रह्मजज्ञानम्' इत्युच्छ्रित्य चतुर्मुखं

हंसारूढमक्षमालाकुशमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयं स्रुवकमण्डलुधरोर्ध्वाधोवामकरद्वयं श्मश्रुलं जटिलं लम्बोदरं रक्तवर्णं ब्रह्माणं ध्यात्वा,

पद्मयोनिश्चतुर्मूर्तिर्वेदावासः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥

इति नत्वा साङ्गाय ब्रह्मणे एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । 'नैर्ऋत्यपश्चिमान्तराले अनन्तबलिदानम्, ईशानपूर्वान्तराले ब्रह्मबलिदानं च' इति रूपनारायणः । तत आचम्य मण्डपमध्येऽत्युच्चदण्डो दशहस्तदीर्घस्त्रिहस्तविस्तृतः पञ्चहस्तदीर्घोहस्तविस्तारो वा महाध्वजः किङ्किण्यादियुक्तः इन्द्रस्य वृष्ण इति स्थाप्यः । तत्रैव ब्रह्मपूजनं च । ततो मण्डपषोडशस्तम्भेषु सर्वेभ्यो देवेभ्यो नमः, वंशेषु किन्नरेभ्यो नमः, पृष्ठे पन्नगेभ्यो नम इत्यर्चयेत् । ततः पूर्वभागे उपलिप्तभूमावुपविश्य—

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मनवो गावो देवमातर एव च ॥
सर्वे ममाऽध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ।
ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालो गणैः सह ॥
रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः ।

इति पठित्वा त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमस्त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः । ' ब्रह्मणे नमः विष्णवे० शिवाय० देवेभ्यो० दानवेभ्यो० गन्धर्वेभ्यो० राक्षसेभ्यो० पन्नगेभ्य० ऋषिभ्यो० मनुष्येभ्यो० गोभ्यो० देवमातृभ्यो नमः' इति प्रत्येकं संपूज्य भूमौ माषभक्तबलिं दद्यात् । ततो यजमानः सर्वैर्ऋत्विग्भिः सह प्रक्षालितपादपाणिः प्राग्द्वारेण मण्डपं प्रविश्य दक्षिणद्वारपश्चिमभागे उपविश्य गुर्वादयो यथाविहितं कर्म कुरुध्वमिति वदेत् । प्रतिकुण्डमेकैकः कलशः स्थाप्य ऋत्विग्भिरिति केचित् । गुरुणा स्थाप्य इत्यन्ये । तत ऋग्वेदादिक्रमात्प्रागादिकुण्डेषु ऋत्विजोऽग्निं स्थापयेयुः । ततो ' गुरुर्यजमानान्वितो ग्रहवेद्यां सर्वतोभद्रमण्डलदेवताः स्थापयेत्' इति पितामहचरणाः । यथा अद्येत्यादि मण्डलदेवतास्थापनं करिष्ये इति

सङ्कल्प्य स्थापयेत्। तत्र मध्ये ब्रह्माणं ‘ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्। ब्रह्मस्थापने पूजने च विनियोगः’ एवमुत्तरत्र। ‘ॐ ब्रह्मजज्ञानम्’ तत उदीचीमारभ्य वायवीपर्यन्तं कुबेरादीन् वाय्वन्तानष्टौ लोकपालान्। तत्र आप्यायस्व गौतमः सोमो गायत्री। ॐ आप्यायस्व। अभि त्वाऽजीगर्त्तः शुनःशेप ईशानो गायत्री। ॐ अभि त्वा देव सवितः। इन्द्रं वो मधुछन्दा इन्द्रो गायत्री। ॐ इन्द्रं वो विश्वतः। अग्निं काण्वो मेधातिथिरग्निर्गायत्री। ॐ अग्निं दूतं वृणीमहे। यमाय सोमं यमो यमोऽनुष्टुप्। ॐ यमाय सोमम्। मोषुणो घोरः काण्वो निर्ऋतिर्गायत्री। ॐ मोषुणः। तत्त्वा यामि शुनःशेपो वरुणस्त्रिष्टुप्। ॐ तत्वा यामि। वायोः शतं गौतमो वामदेवो वायुरनुष्टुप्। ॐ वायोः शतम्। वायुसोममध्येऽष्टौ वसून्। ज्मया अत्र मैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्। ॐ ज्मया अत्र। सोमेशानमध्ये एकादशरुद्रान्। आ रुद्रासः श्यावाश्व एकादश रुद्रा जगती। ॐ आरुद्रासः। ईशानेन्द्रमध्ये द्वादशादित्यान्। त्यान्नु सामदो मत्स्यो द्वादशादित्या गायत्री। ॐ त्यान्नु क्षत्रियान्। इन्द्राग्निमध्ये अश्विनौ, अश्विना राहूगणो गौतमोऽश्विनावुष्णिक्। ॐ अश्विनावर्तिः। अग्नियममध्ये विश्वेदेवान् सपैतृकान्। ॐ मासो मधुच्छन्दा विश्वेदेवा गायत्री। ॐ मासः। यमनिर्ऋतिमध्ये सप्त यक्षान्। अभित्यं वामदेवः सप्तयक्षाः प्रकृतिः। ॐ अभित्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभिप्रियं मतिं कविम्। ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः। निर्ऋतिवरुणमध्ये भूतनागान्। आयं गौः सार्पराज्ञी सर्पा गायत्री। ॐ आयं गौः। वरुणवायुमध्ये गन्धर्वाप्सरसः। अप्सरसामैतश ऋष्यशृङ्गो गन्धर्वाप्सरसोऽनुष्टुप्। ॐ अप्सरसां गन्धर्वाणाम्। ब्रह्मसोममध्ये स्कन्दनन्दीश्वरशूलमहाकालान्। कुमारं कुमारः स्कन्दस्त्रिष्टुप्। ॐ कुमारं माता। ऋषभं ऋषभो वैराजो ऋषभोऽनुष्टुप्। ॐ ऋषभंमा। कद्रुद्रायेति घोरः कण्वः शूलमहाकालौ गायत्री। ॐ कद्रुद्राय०। ब्रह्मेशानमध्ये दक्षादीन्सप्तगणान्। अदितिर्लोक्यो बृहस्पतिर्दक्षोऽनुष्टुप्। ॐ अदितिर्ह्यजनिष्ट। ब्रह्मेन्द्रमध्ये दुर्गां विष्णुं च। तामग्निवर्णां सौभरिर्दुर्गा त्रिष्टुप्। ॐ तामग्निवर्णाम्०। इदं विष्णुर्मेधातिथि-

थिर्विष्णुर्गायत्री । ॐ इदं विष्णुः । ब्रह्माग्निमध्ये स्वधाम् । उदीरतां शङ्खस्वधात्रिष्टुप् । ॐ उदीरताम् ० सूनृताः । ब्रह्मयममध्ये मृत्युरोगान् । परं मृत्योः सङ्कुसुको मृत्युरोगास्त्रिष्टुप् । ॐ परं मृत्यो अनुपरेहि । ब्रह्मनिर्ऋतिमध्ये गणपतिम् । गणानां त्वा गृत्समदो गणपतिर्जगती । ॐ गणानां त्वा । ब्रह्मवरुणमध्ये अपः । शंनोऽम्बरीष सिन्धुद्वीप आपो गायत्री । ॐ शन्नो देवीः । ब्रह्मवायुमध्ये मरुतः । मरुतो यस्य राहूगणो गौतमो मरुतो गायत्री । ॐ मरुतो यस्य । ब्रह्मणः पादमूले कर्णिकाधः पृथ्वीम् । स्योना मेधातिथिर्भूमिर्गायत्री । ॐ स्योना पृथिवि । तत्रैव गङ्गादिनद्यः । इमं मे सिन्धुक्षित्प्रैयमेधो गङ्गायमुनासरस्वत्यो जगती । ॐ इमं मे गङ्गे यमुने । तत्रैव सप्त सागरान् । धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च । यदापो अघ्न्या वरुणेति शपामहे ततो वरुण नो मुञ्च । मयि वायो मोषधीर्हिंसीरतो विश्वव्यचा भूस्त्वेतो वरुण नो मुञ्च । तदुपरि मेरुं नाम्ना । बाह्ये सोमादिसमीपे क्रमेणाऽऽयुधानि । गदां त्रिशूलं वज्रं शक्तिं दण्डं खड्गं पाशम् अङ्कुशम् । तद्बाह्ये उत्तरादितः । गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठम् अत्रिम् अरुन्धतीम् । तद्बाह्ये पूर्वादि ऐन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुण्डां वैष्णवीं माहेश्वरीं विनायकीम् इत्यष्टौ शक्तयः । एताः प्रतिष्ठाप्य प्रत्येकं सह वा पूजयेत् । ततस्तस्यामेव वेद्यां वस्त्रलिखितवक्ष्यमाणमण्डलेषु आदित्यादिदेवताः स्थापयेत्पूजयेच्च । 'अस्मिन्कर्मणि ग्रहादिस्थापनं पूजनं च करिष्ये' इति सङ्कल्प्य, प्रणवस्य ब्रह्मा ऋषिः । परमात्माऽग्निर्देवता दैवी गायत्री छन्दः । व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृगव ऋषयः । अग्निवायुसूर्या देवताः । दैवी गायत्री दैव्युष्णिक्दैवीबृहत्यश्छन्दांसि सूर्याद्यावाहने विनियोगः । केचित्तत्तन्मन्त्रानप्यावाहने आहुः । तत्र ग्रहपीठमध्ये वर्तुले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः । आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् । सूर्यावाहने विनियोगः । 'ॐ आकृष्णेन रजसा' । 'ॐ भूर्भुवः स्वः ' कलिङ्गदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छेह तिष्ठेत्यावाह्य, इह तिष्ठेति स्थापयेत् । एवं सर्वत्र मन्त्रान्ते व्याहृतीरुक्त्वा, 'इहागच्छेह तिष्ठ'इति स्थापयेत् । तत आग्नेये चतुरस्रे प्रत्यङ्मुखं

सोमं श्वेतपुष्पाक्षतैः। आप्यायस्व गौतमः सोमो गायत्री। सोमा-वाह०। ॐ आप्यायस्व० यमुनातीरोद्भव आत्रेयसगोत्र सोम० ततो दक्षिणे त्रिकोणे दक्षिणामुखं भौमं रक्तपुष्पाक्षतैः। अग्निर्मूर्द्धा विरूपोऽङ्गारको गायत्री०। ॐ अग्निर्मूर्धा० अवन्तीसमुद्भव भारद्वा-जसगोत्र भौम०। तत ईशाने बाणाकारे बुधमुदङ्मुखं पीतपुष्पाक्षतैः। उद्बुद्ध्यध्वं बुधः सौम्यो बुधस्त्रिष्टुप्०। ॐ उद्बुध्यध्वं० मगधदेशोद्भव आत्रेयसगोत्र बुध०। तत उत्तरतो दीर्घचतुरस्रे उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः। बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्०। ॐ बृहस्पते० सिन्धुदेशोद्भव आङ्गिरसगोत्र बृहस्पते०। ततः पूर्वे पञ्चकोणे प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः। शुक्रः पाराशरः शुक्रो द्विपदा विराट्०। ॐ शुक्रः शुशु०। भोजकटदेशोद्भव भार्गवसगोत्र शुक्र०। ततः पश्चिमे धनुषि प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैः। शमग्निरिरिंबिटिः शनिरुष्णिक्०। ॐ शमग्नि० सौराष्ट्रज काश्यपसगोत्र शनैश्चर०। ततो नैर्ऋत्ये शूर्पा-कारे दक्षिणामुखं राहुं कृष्णपुष्पाक्षतैः। कया नो वामदेवो राहुर्गा-यत्री राह्वावाहने०। ॐ कयानश्चित्र० राठिनापुरोद्भव पैठीनसि-सगोत्र राहो०। ततो वायव्ये ध्वजाकारे दक्षिणामुखं केतुं धूम्रपु-ष्पाक्षतैः। केतुं मधुच्छन्दाः केतवो गायत्री०। ॐ केतुं कृण्व०। अन्त-र्वेदिसमुद्भव जैमिनिसगोत्र केतो०। सर्वे वा आदित्याभिमुखाः॥

अथाऽधिदेवताः।

श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनां दक्षिणतः स्थाप्याः। 'त्र्यम्बकं वसिष्ठो रुद्रोऽनुष्टुप्'। विनियोगः सर्वत्र ज्ञेयः। 'ॐ त्र्यम्बकम्। ॐ भूर्भुवः स्वः ईश्वर०' 'गौरीमिमाय दीर्घतमा उमा जगती०'। सोमदक्षिणे० 'ॐ गौरीमिमाय०'। 'यदक्रन्दो दीर्घतमा स्कन्दस्त्रि-ष्टुप्'। 'ॐ यदक्रन्दः०'। विष्णोर्दीर्घतमा विष्णुस्त्रिष्टुप् 'ॐ विष्णो-र्नुकं०'। ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्। 'ॐ ब्रह्मज-ज्ञानं०'। इन्द्रं वो मधुच्छन्दा इन्द्रो गायत्री 'ॐ इन्द्रं वो०'। 'यमाय सोमं यमो यमोऽनुष्टुप्' 'ॐ यमाय सोमं०'। मोषुणो घोरः काण्वः कालो गायत्री 'ॐ मोषुणः परा०'। उषोवाजं स्कण्वश्चि-त्रगुप्तो बृहती 'ॐ उषोवाजं०'। एवमेव शुक्लपुष्पाक्षतैर्ग्रहाणां वामतो मन्त्रान्ते व्याहृतीरुच्चार्य 'इहाऽऽगच्छेह तिष्ठेति' चोक्त्वा प्रत्यधिदे-

वताः स्थापयेत्। 'अग्निं काण्वो मेधातिथिरग्निर्गायत्री०'। 'ॐ अग्निं दूतम्०'। 'अप्सु मे मेधातिथिरापोऽनुष्टुप्'। 'ॐ अप्सुमे०'। 'स्योना मेधातिथिर्भूमिर्गायत्री'। 'ॐ स्योना पृथिवि०'। 'इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री'। 'ॐ इदं विष्णुः०'। 'इन्द्रश्रेष्ठानि गृत्समद इन्द्रस्त्रिष्टुप्'। 'ॐ इन्द्रश्रेष्ठानि०'। 'इन्द्राणीं वृषाकपिरिन्द्राणी पङ्क्तिः'। 'ॐ इन्द्राणीमासु०'। 'प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्०'। 'ॐ प्रजापते०'। 'आयं गौः सार्पराज्ञी सर्पा गायत्री०'। 'ॐ आयं गौः पृश्नि०'। 'ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्०'। 'ॐ ब्रह्मजज्ञानं०'। ततः शुक्लपुष्पाक्षतैर्विनायकादीन् पश्च। 'गणानां त्वा गृत्समदो गणपतिर्जगती०'। 'ॐ गणानां त्वा०' राहोरुत्तरतो विनायकम्। 'जातवेदसे कश्यपो दुर्गा त्रिष्टुप्०'। शनेरुत्तरतो दुर्गाम्। 'तव वायोव्यश्व आङ्गिरसो वायुर्गायत्री०'। 'ॐ तव वायवृतस्पते०'। रवेरुत्तरतो वायुम्। एतान् मन्त्रान् पठन्ति सांप्रदायिकाः। तत्र केषुचिन्मन्त्रेषु मूलं चिन्त्यम्। 'आदित्प्रत्नस्य वत्स आकाशो गायत्री०'। 'ॐ आदित्प्रत्नस्य०'। राहोर्दक्षिण आकाशम्। 'एषो उषा प्रस्कण्वोऽश्विनौ गायत्री०'। 'ॐ एषो उषा०'। 'अश्विनाविहागच्छतमिह तिष्ठतम्' इति केतोर्दक्षिणेऽश्विनौ। 'एतानि विनायकादिस्थानानि' चिन्तामणौ। "विनायकादीन्पश्च उत्तरत एवेति संप्रदायः" इति। 'द्वात्रिंशद्देवताः' इति रूपनारायणादयः। हेमाद्रौ तु लोकपालादीनामपि सूर्याऽभिमुखानां दिक्षु स्थापनमुक्तम्। तद्यथा—'इन्द्रं विश्वा जेता माधुच्छन्दस इन्द्रोऽनुष्टुप्०'। 'ॐ इंद्रं विश्वा०'। इन्द्र इहागच्छेह तिष्ठेति पूर्वे इन्द्रमेवमुत्तरत्र 'अग्निं काण्वो मेधातिथिरग्निर्गायत्री०'। 'ॐ अग्निं दूतं०'। 'यमाय सोमं यमो यमोऽनुष्टुप्०'। 'ॐ यमाय सोमं'। 'मोषुणो घोरः काण्वो निर्ऋतिर्गायत्री०'। 'ॐ मोषुणः परा०'। 'त्वं नो अग्ने वामदेवो वरुणस्त्रिष्टुप्०'। 'ॐ त्वं नो अग्ने०'। 'तव वायो व्यश्वो वायुर्गायत्री०'। 'ॐ तव वायवृतस्पते०'। 'सोमो धेनुं गौतमः सोमस्त्रिष्टुप्०'। 'ॐ सोमो धेनुं०'। "तमीशानं गौतम ईशानो जगती०'। 'ॐ तमीशानं०'। 'सहस्रशीर्षा नारायणोऽनन्तोऽनुष्टुप्०'। 'ॐ सहस्रशीर्षा०'। ईशानपूर्वयोर्मध्येऽनन्तम्।

'ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्०'। 'ॐ ब्रह्मजज्ञानं०' नैर्ऋत्यपश्चिमयोर्मध्ये ब्रह्माणम्।

अथ वस्वाद्येकादश देवताः।

'उमया अत्र मैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्०'। 'ॐउमया अत्र०'। इन्द्राग्निमध्ये ध्रुवाऽध्वरसोमावनिलानलप्रत्यूषप्रभासाख्यानष्टौ वसून्। 'त्यान्नु सामदो मत्स्यो द्वादशादित्या गायत्री०'। 'ॐ त्यान्नुक्षत्रियां०' इन्द्रेशानमध्ये धात्रर्यममित्रवरुणांशभर्गेन्द्रविवस्वत्पूषपर्जन्यत्वष्टृजघन्याजघन्ययविष्ठाख्यान् द्वादशादित्यान्। 'आरुद्रासः श्यावाश्व एकादश रुद्रा जगती०'। 'ॐ आरुद्रासः०' अग्नियममध्ये वीरभद्रशम्भुमहाशयायुतगिरिशाऽजैकपादहिर्बुध्न्याऽपराजितपिनाकिभुवनाधीश्वरविट्पतिकपालिस्थभगवद्भगाख्यान् एकादश रुद्रान्। 'गौरीमिमाय दीर्घतमा गौर्यादयो जगती'। 'ॐ गौरीमिमाय०'। 'गौरीपद्माशचीमेधासावित्रीविजयाजयादेवसेनास्वधास्वाहामातृलोकमातृधृतिपुष्टितुष्ट्यात्मकुलदेवताख्याः षोडश मातॄः। निर्ऋतिवरुणमध्ये मातॄः। तत्रैव गणपतिं, । 'गणानां त्वा गृत्समदो गणपतिर्जगती०'। 'ॐ गणानां त्वा०'। 'मरुतो यस्य राहूगणो गौतमो मरुतो गायत्री०। 'ॐ मरुतो यस्य'। वायुसोममध्ये आवहप्रवहोद्वहसंवहविवहपरावहपरिवहानिलाख्यान् सप्त मरुतः। वेद्यामेव यथावकाशं ब्रह्मादीन् पञ्च स्थापयेत्। 'ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्०'। 'ॐ ब्रह्मजज्ञानं०'। 'इदं विष्णुर्मेधातिथिरच्युतो गायत्री०'। 'ॐ इदं विष्णु०' कद्रुद्राय घोरः कण्व ईशानो गायत्री०। ॐ 'कद्रुद्राय०' 'अग्निरस्मि विश्वामित्रोऽर्कस्त्रिष्टुप्०'। 'ॐ अग्निरस्मि०'। 'वनस्पते गर्गो वनस्पतिस्त्रिष्टुप्०'। 'ॐ वनस्पते शत०' एवं प्रतिष्ठाप्य पूजयेत्षोडशोपचारैः। पूजा च तत्तद्वर्णैर्गन्धपुष्पवासोभिस्तत्तन्मन्त्रैः। एवं सूर्यादिद्वात्रिंशद्दशदिक्पालान्वस्वादीनेकादश चावाह्य संस्थाप्य पञ्चभिः षोडशभिर्वोपचारैः संपूजयेत्। तत्र वस्त्राणि ग्रहवर्णानि। रविभौमयो रक्तचन्दनम्। चन्द्रशुक्रयोः श्वेतचन्दनम्। बुधगुर्वोः कुङ्कुमयुतम्। शनिराहुकेतूनां कृष्णागुरुम्। पुष्पाणि तद्वर्णानि। धूपास्तु, सल्लकीनिर्यासम्। घृताक्तयवान् रालमगुरुम्। सिह्लकम्।

बिल्वयुतागुरुम् । गुग्गुलुम् । लाक्षाम् । क्रमाद् गायत्र्या दत्त्वा, 'उद्दीप्यस्व' इति सर्वेभ्यो दीपान् दत्त्वा गुडौदनम्, पायसम्, नीवारौदनं, क्षीरयुतषष्टिकौदनं, दध्योदनं, घृतौदनम्, तिलमाषयुतमोदनम्, मांसौदनम्, चित्रौदनं च क्रमान्निवेदयेत् । अधिदेवतादिभ्यस्तु वासो गन्धपुष्पाणि श्वेतानि गुग्गुलुधूपः नैवेद्यं पायसादि यथालाभम् । सूर्यादिद्वात्रिंशतामन्येषां च सर्वेषां पूजापदार्थानुसमयेनैव । ततो ग्रहवेदीशान्यां कलशं संस्थाप्य तत्र वरुणमावाह्य संपूज्याभिमन्त्रयेत् । तद्यथा—

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
देवदानवसंवादे मथ्यमाने महोदधौ ॥
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥
आदित्या वसवो रुद्रा विश्वे देवाः सपैतृकाः ।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा । इति ॥

ततः फलपुष्पमालाशोभितं वितानं बृहस्पतिदैवत्यं सूर्यादिभ्य इदं न ममेति उत्सृज्य ग्रहवेद्युपरि बध्नीयात् । तत एको होता परो ब्रह्मेति पूर्वकुण्डे द्वौ ऋत्विजौ दक्षिणादिकुण्डेषु यथाशाखं होमात्प्राक्तनं कर्म कुर्युः । तत्र षोडशमहादानादौ प्रागादिक्रमेण ऋग्वेदादिविहितं कर्मजलाशयोत्सर्गादौ पञ्चकुण्डीपक्षेऽप्येवम् । तत्राऽऽचार्यकुण्डं त्वीशानपूर्वयोर्मध्ये वृत्तं चतुरस्रं वा तत्रैव नवकुण्ड्यामप्येवमेवाचार्यकुण्डम् ।

तस्मिन्विदिक्कुण्डेषु च 'चतुःपञ्चकुण्डीवद्धोमावृत्तिः' इति केचित्। युक्तं तु 'चतुःकुण्डीहोम एव विभज्य कार्यः' इति। तदा चैको होता परो ब्रह्मेति। विदिक्कुण्डचतुष्टये अष्टावधिका ऋत्विजः। 'तेत्वाग्नेयादिकोणक्रमेण ऋगादिशाखीयाः' इति केचित्। 'अनियताः' इत्यपरे। 'आचार्यकुण्डं तु प्रणयनयोग्याग्निस्थापनार्थम्' इति सांप्रदायिकाः। 'होमावृत्तिर्विभज्य होमानुष्ठानं वा' इति परे।

अथ ऋक्शाखीयानामन्वाधाने विशेषः। तत्र 'चक्षुषी आज्येन इत्यन्तमुक्त्वात्र प्रधानं सूर्यसोमभौमबुधगुरुशुक्रशनिराहुकेतून् ग्रहान् समिच्चर्वाज्यैः प्रतिद्रव्यम्। अष्टसहस्राऽष्टशताऽष्टाविंशत्यष्टान्यतमसंख्यया ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्ताख्या अधिदेवताः। अग्न्यब्भूमिविष्णिवन्द्रेन्द्राणीसर्पप्रजापतिब्रह्माख्याः प्रत्यधिदेवताः। विनायकदुर्गावाय्वाकाशाख्यान् पञ्च लोकपालान्। इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानन्तब्रह्माख्यान् दश दिक्पालान्। ध्रुवाध्वरसोमापानिलानलप्रत्यूषप्रभासाख्यान् अष्टौ वसून्। धात्रर्यममित्रवरुणांशभगेन्द्रविवस्वत्पूषपर्जन्यत्वष्टृविष्ण्वाख्यान्द्वादशादित्यान्। वीरभद्रशम्भुगिरिशाजैकपादहिर्बुध्न्यपिनाकिभुवनाऽधीश्वरकपालिविशाम्पतिस्थाणुभगाख्यानेकादश रुद्रान्, गौर्यादिषोडश मातॄः। गणपतिं प्रति होमो नोक्तः। आवहप्रवहोद्वहसंवहविवहपरावहपरिवहाख्यान्सप्त मरुतः। ब्रह्माच्युतेशार्कवनस्पतीन् पञ्च चामुकसंख्यया समिच्चर्वाज्यैर्यक्ष्ये' इति। 'वसून् आदित्यान् रुद्रान् मरुत इति समुदितानामेवोल्लेखो युक्तः' इति बहवः। अत्र 'ग्रहहोमसंख्यातोऽधिदेवताहोमेन्यूनसङ्ख्या' इति संप्रदायः। ततो यजमानो मण्डपमध्ये दक्षिणत उपविष्टः 'आघाराऽऽज्यभागदेवता अन्वाधानोक्तप्रधानदेवताः स्विष्टकृदाद्युत्तराङ्गदेवताश्चतुर्थ्यन्तेनादिश्यैताभ्य एतानि समित्तिलचर्वादिद्रव्याणि होतुमुत्सृज्ये' इति त्यजेत्। 'बहुकर्तृके होमे प्रत्याहुतित्यागस्याशक्यत्वादिति प्रयोगविदः'। ततो होतारः स्वस्वशाखीयैः प्रणवाद्यैः स्वाहान्तैस्तत्तन्मंत्रैर्ऋषिदेवताछन्दःस्मरणपूर्वकं सूर्यादिभ्यः समिच्चर्वाज्यादि जुहुयुः। 'तत्र वस्वादित्यरुद्रमरुतां प्रत्येकं मन्त्राऽभावात्प्रणवादिना चतुर्थीस्वाहान्तेन प्रत्येकं होमः' इति केचित्। समुदितानामेव विधौ श्रवणान्मन्त्रानुरोधाच्चेति तु युक्तम्। तत्र प्रत्येकदेवतात्वपक्षे पञ्चाशीतिर्देवताः। समुदितपक्ष एकपञ्चाशत्।

होमकाले ऋग्वेदिनौ द्वारपालौ पूर्वे द्वार उदङ्मुखौ रात्रिसूक्तं रौद्रं पवमानं सुमङ्गलं शन्न इन्द्राग्नी इति सूक्तानि पठेताम्। यजुर्विदौ दक्षिणे शाक्रं रौद्रं सौम्यं कौष्माण्डम् ऋचं वाचमित्यध्यायं च पठेताम्। पश्चिमे सामविदौ सुपर्णं विराजमाग्नेयं रुद्रसंहितां ज्येष्ठ सामर बोधयेति च पठेताम्। उत्तरेऽथर्ववेदिनौ सौरं शाकुनकं पौष्टिकं सुमहाराजं शन्न इन्द्राग्नी इति ऋक्त्रयं च पठेताम्। तत्र गुरुः सर्वकर्माध्यक्षो भवेत्॥

अथ होममंत्राः। तत्र ऋग्वेदिनां स्थापनमंत्राएवर्षिदेवतायुक्ताः। अथ तत्तद्दैवत्यानि सूक्तानि जप्यानि। ह्वयामीत्येकादशर्चस्य सूक्तस्य हिरण्यस्तूप ऋषिः सविता देवताऽऽद्यायाः आद्यपादत्रयेऽग्निमित्रावरुणौ रात्रिश्च देवता त्रिष्टुप्छन्दः आद्यनवम्योर्जगती सूर्यप्रीतये जपे विनियोगः। 'ॐ ह्वयाम्यग्निं० देवं'। त्वं सोमेति त्रयोविंशर्चस्य सूक्तस्य गौतमऋषिः सोमो देवता। पञ्चम्यादिद्वादश गायत्र्यः सप्तदश्युष्णिक् शेषास्त्रिष्टुभः सोमप्रीतये जपे विनियोगः। 'ॐ त्वं सोम० गविष्ठौ'। 'समिधाग्निमिति त्रिशर्चस्य सूक्तस्य विरूप अङ्गिरसोऽग्निर्गायत्री। भौमप्रीतये०'। 'ॐ समिधाग्निं० सोतिर'। 'उद्बुध्यध्वमिति द्वादशर्चस्य सूक्तस्य बुधो विश्वे देवा नवमी द्वादशी च जगती पञ्चमी वृहती चतुर्थी षष्ठी च गायत्री शेषास्त्रिष्टुभो बुधप्रीतये०'। 'ॐ उद्बुध्यध्वम्० पीतये'। 'यस्तस्तम्भेत्येकादशर्चस्य वामदेवो नवानां बृहस्पतिरन्त्ययोरिन्द्राबृहस्पती दश त्रिष्टुभ उपान्त्या जगती। बृहस्पतिप्रीतये०'। 'ॐ यस्तस्तम्भ० मरातीः'। 'शुक्रं त इति चतसृणां भरद्वाजः पूषा त्रिष्टुप् द्वितीया जगती शुक्रप्रीतये०'। 'ॐ शुक्रं ते अन्यत्० संस्वश्चम्'। 'आपो हिष्ठेति नवर्चस्याम्बरीषसिन्धुद्वीप-आपः सप्त गायत्र्यः पञ्चमी वर्द्धमाना सप्तमी प्रतिष्ठान्त्ये द्वे अनुष्टुभौ। शनिप्रीतये०'। 'ॐ आपो हिष्ठा० वर्चसा'। 'कया न इति पञ्चदशर्चस्य वामदेव इन्द्रो गायत्री तृतीया पादनिवृत्। राहुप्रीतये०'। 'ॐ कया नश्चित्र० मिवोपरि'। 'युञ्जन्तीति दशर्चस्य मधुछन्दा आद्यानां तिसृणामन्त्ययोरिन्द्रश्चतुर्थीषष्ठ्यष्टमीनां मरुतः पञ्चम्याः सप्तम्याश्चैन्द्रीमरुतः गायत्री। केतुप्रीतये०'। 'ॐ युञ्जन्ति ब्रध्नं रजस०

इति नवग्रहसूक्तानि।

अथ होममन्त्राः । तत्र ऋग्वेदी ।

अथाधिदेवतानाम् । 'इमा रुद्रायेत्येकादशर्चस्य कुत्सो रुद्रो जगती अन्त्ये त्रिष्टुभे रुद्रप्रीतये०'। 'ॐ इमा रुद्राय ० 'तद्यौः'। 'आपो हिष्ठेति नवर्चं पूर्ववत् । उमाप्रीतये०'। 'ॐ आपो हिष्ठा० वर्चसा'। प्रातर्युजेत्येकविंशत्यृचस्य सूक्तस्य मेधातिथिराद्यानां चतसृणामश्विनौ चतसृणां सविता द्वयोरग्निरेकादश्या देव्यो द्वादश्या इन्द्राणीवरुणान्याग्नेय्यो द्वयोर्द्यावापृथिव्यौ पञ्चदश्याः पृथिवी षण्णां विष्णुर्गायत्री स्कन्दप्रीतये० । 'ॐ प्रातर्युजा० पदम्'। 'अतो देवा इति षण्णां मेधातिथिर्विष्णुर्गायत्री हरिप्रीतये०'। 'ॐ अतो देवा० पदम्'। 'अग्न आयाहीति विंशत्यृचस्य सूक्तस्य भर्गोऽग्निः प्रगाथः ब्रह्मप्रीत्यर्थं०'। 'ॐ अग्न आयाह्यग्निभिः० स्विनः'। 'इन्द्रं विश्वा इत्यष्टर्चस्य जेता माधुछन्दस इन्द्रोऽनुष्टुप् इन्द्रप्रीतये०'। 'ॐ इन्द्रं विश्वा० यसीः'। 'आयं गौरिति तिसृणां सार्पराज्ञात्मा गायत्री यमप्रीतये०'। 'ॐ आयं गौः पृश्नि० द्युभिः'। 'परं मृत्योरिति चतसृणां संकुसुको मृत्युस्त्रिष्टुप् कालप्रीतये०'। 'ॐ परं मृत्यो० तेन'। 'सचित्रेत्यस्य भरद्वाजो मरुतस्त्रिष्टुप् चित्रगुप्तप्रीतये०'। 'ॐ सचित्र चित्रं० युवस्व'॥

अथ प्रत्यधिदेवतानाम् । 'अग्निं दूतमिति द्वादशर्चस्य मेधातिथिरग्निः षष्ठ्या आद्ये पादे निर्मथ्याहवनीयौ गायत्री अग्निप्रीतये०'। 'ॐ अग्निं दूतम्० स्वनः'। 'कस्येति पञ्चदशर्चस्याऽऽजीगर्त्तिः शुनःशेप आद्यायाः को द्वितीयाया अग्निस्तिसृणां सविता दशानां वरुणस्तृतीयाद्यास्तिस्रो गायत्र्यः शेषास्त्रिष्टुभः अप्प्रीतये०'। 'ॐ कस्य नूनम्० स्याम'। 'स्योना मेधातिथिः पृथिवी गायत्री भूमिप्रीतये०'। 'ॐ स्योना पृथिवि० प्रथः'। 'सहस्रशीर्षेति षोडशर्चस्य नारायणः पुरुषोऽनुष्टुबन्त्यात्रिष्टुप् विष्णुप्रीतये०'। 'ॐ सहस्रशीर्षा० देवाः'। 'इन्द्राय कश्यपः पवमानसोमो गायत्री । इन्द्रप्रीतये०'। 'ॐ इन्द्रायेन्दो० सदम्'। 'इमां खनामीति षण्णामिन्द्राणीन्द्राण्यनुष्टुभं त्वन्त्या पञ्चपदा पङ्क्तिः इन्द्राणीप्रीतये०'। 'ॐ इमां खनामि० धावतु'। 'प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापतिप्रीतये०'। 'ॐ प्रजापते० रयीणाम्'। 'कालिको वसिष्ठः

सर्पा अनुष्टुप् सर्पप्रीतये० ’। ‘ॐ कालिको नाम सर्पः० हनः ’। ‘ब्रह्मा देवानां दैवोदासिः प्रतर्दनो ब्रह्मा त्रिष्टुप् ब्रह्मप्रीतये० ’। ‘ॐ ब्रह्मा० रेभन् ’॥

अथ विनायकादिपञ्चानाम्। ‘आतून इति नवानां कुसीदः कण्वो गणपतिर्गायत्री विनायकप्रीतये० ’। ‘ॐ आतून इन्द्र० रन्तो ’। ‘जातवेदसे कश्यपो जातवेदास्त्रिष्टुप् दुर्गाप्रीतये० ’। ‘ॐ जातवेदसे० त्यग्निः ’। क्राणा त्रितो वायुरुष्णिक् वायुप्रीतये० ’। ‘ॐ क्राणा शिशु० द्विता ’। ‘आदिद्वत्स आकाशो गायत्री आकाशप्रीतये० ’। ‘ॐ आदित्प्रत्नस्य०। एषो उषा प्रस्कण्वोऽश्विनौ गायत्री अश्विनोः प्रीतये० ’। ‘ॐ एषो० हत् ’॥

अथ दशलोकपालानाम्। ‘इन्द्रं विश्वा इत्यष्टानां जेता मधुच्छन्दस इन्द्रोऽनुष्टुप् इन्द्रप्रीतये० ’। ‘ॐ इन्द्रं विश्वा० यसी ’। ‘अग्निः सप्तमिति सप्तानां सौचीकोऽग्निर्वैश्वानरोऽग्निस्त्रिष्टुप् अग्निप्रीतये० ’। ‘ॐ अग्निः सप्तिः० जस्व ’। ‘परेयिवांसमिति षोडशर्चस्य यमः पञ्चानां यमः षष्ठ्या आङ्गिरसस्तिसृणां पितरस्तिसृणां श्वानौ चतसृणां यमो द्वादशत्रिष्टुभौ द्वे अनुष्टुभौ पादनिवृत्तौ पञ्चदशी बृहती षोडश्यनुष्टुप् यमप्रीतये० ’। ‘ॐ परेयिवांसं० हिता ’। ‘वेत्था हि विश्वमरुयना वैश्वोनिर्ऋतिरुष्णिक् निर्ऋतिप्रीतये० ’। ‘ॐ वेत्था हि० सेव ’। ‘मोष्विति पञ्चानां वसिष्ठो वरुणो गायत्री अन्त्या जगती वरुणप्रीतये० ’। ‘ॐ मोषु० वरुणरीरिषः ’। ‘वात इति तिसृणां वातायन उलो वायुर्गायत्री वायुप्रीतये० ’। ‘ॐ वात आवातु० जीवसे ’। ‘त्वं सोमेति ग्रहवत् ’। ‘इमा रुद्राय इति पूर्ववत् ’। ‘सहस्रशीर्षा इति प्राग्वत् ’। ‘त्वमिद्रभोंऽग्निर्बृहती ब्रह्मप्रीतये० ’। ‘ॐ त्वमित्सप्रथा० घसः ’॥

अथ वस्वादिनवानाम्। ‘ज्मया अत्र ’ इति वसूनां होमवत्। ‘इमा गिर इति सप्तदशर्चस्य गार्त्समदः कूर्म आदित्यस्त्रिष्टुप् आदित्यप्रीतये० ’। ‘ॐ इमा गिरः० वीराः ’। ‘आत इति पञ्चदशर्चस्य गार्त्समदः कूर्मरुद्रस्त्रिष्टुप् ईशानप्रीतये० ’। ‘ॐ आतोपित० वीराः ’। ‘मरुतो यस्येति दशानां गौतमो गायत्री मरुत्प्रीतये० ’। ‘ॐ मरुतो यस्य० श्मसि ’। ‘हिरण्यगर्भ इति दशर्चस्य हिरण्यः प्रजापतिः

कस्त्रिष्टुप् ब्रह्मप्रीतये० ’। ‘ॐ हिरण्यगर्भः० रयीणाम् ’। ‘सहस्रशीर्षा इत्यचे...स्य प्राग्वत् ’। ‘आतेपितः० इतीशस्य प्राग्वत् ’। ‘चित्रमिति षण्णां कुत्सोऽर्कस्त्रिष्टुप् अर्कप्रीतये० ’। ‘ॐ चित्रं देवानाम्० उत द्यौः ’। ‘वनस्पत इति तिसृणां गर्गो वनस्पतिस्त्रिष्टुप् वनस्पतिप्रीतये० ’। ‘ॐ वनस्पते वीड्वङ्गो० गृभाय ’। आवाहितयोरपि मातृगणपत्योर्होमसूक्तजपौ न स्तः। एवं ऋग्वेदी हुत्वा स्विष्टकृदादिप्रायश्चित्ताहुत्यन्तं पूर्णाहुतिप्राग्भावि कर्म कुर्यात् ॥

अथ यजुर्वेदिनः। कुशकण्डिकानन्तरं प्रधानहोममन्त्राः। ‘आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यप्रीतये तिलाज्यहोमे विनियोगः ’। ‘ॐ आकृष्णेन० पश्यन्स्वाहा ’। ‘इदं सूर्याय ’। एवं सर्वत्र। ‘इमं देवा वरुणः सोमो यजुः ’। ‘ॐ इमं देवानां० राजा ’। ‘अग्निर्मूर्द्धा विरूपोऽङ्गारको गायत्री०’। ‘उद्बुध्यस्व परमेष्ठी बुधस्त्रिष्टुप्०’। ‘बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्० ’। ‘अन्नात्प्रजापतिरश्विसरस्वतीन्द्राः शुक्रो जगती० ’। ‘शन्नो दध्यङ्ङाथर्वणः शनिर्गायत्री० ’। ‘कया नो वामदेवो राहुर्गायत्री० ’। ‘केतुं मधुच्छन्दाः केतवो गायत्री० ’।

अथाधिदेवतानाम्। ‘त्र्यम्बकं वसिष्ठो रुद्रस्त्रिष्टुप् ’। अत्र प्रणीतोदकं स्पृशेत्। ‘श्रीश्चेत्युत्तरनारायण उमा त्रिष्टुप् ’। ‘यदक्रन्दो भास्करजमदग्निदीर्घतमसोः स्कन्दस्त्रिष्टुप् ’। ‘विष्णोरराटमुतथ्यो विष्णुर्यजुः ’। ‘ॐ विष्णोरराटम्० वे त्वा ’। ‘आ ब्रह्मन् प्रजापतिर्ब्रह्मा यजुः ’। ‘ॐ आ ब्रह्मन्० कल्पताम् ’। ‘सजोषा विश्वामित्र इन्द्रस्त्रिष्टुप् ’। ‘ॐ सजोषा इन्द्रः० तो नः ’। ‘असियमो भास्करजमदग्निदीर्घतमसो यमस्त्रिष्टुप् ’। अत्र प्रणीतोदकं स्पृशेत्। कार्षिरसि दध्यङ्ङाथर्वणः कालोऽनुष्टुप् ’। अत्रापि प्रणीतोदकस्पर्शः। चित्रापि प्रणीतोदकस्पर्शः। ‘चित्रावसोर्ऋषयश्चित्रगुप्तो जगती ’। ‘ॐ चित्रावसोः० शीय ॥

अथ प्रत्यधिदेवतानाम्। ‘अग्निं दूतं विरूपोऽग्निर्गायत्री ’। ‘अप्स्वन्तर्बृहस्पतिः आपः पुर उष्णिक् ’। ‘स्योना मेधातिथिः पृथिवी गायत्री ’। ‘इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री ’। ‘त्रातारं गार्ग्य इन्द्रस्त्रिष्टुप् ’। ‘अदित्यै दध्यङ्ङाथर्वण इन्द्राणीयजुः। अदित्यैरास्ना। ‘प्रजापते

वरुणः प्रजापतिस्त्रिष्टुप् '। ' नमोऽस्तु देवाः सर्पा अनुष्टुप् '। ' ब्रह्म प्रजापतिर्ब्रह्मा त्रिष्टुप् '।

अथ विनायकादिपञ्चानाम् । गणानां प्रजापतिर्गणपतिर्यजुः '। ' ॐ गणानां त्वा० । ' अम्बे प्रजापतिर्दुर्गाऽनुष्टुप् '। ' वातो वा गन्धर्वा वात उष्णिक् '। ' ऊर्ध्वा अस्य समिधो प्रजापतिराकाश उष्णिक् '। ' अश्विनो अश्विरश्विनौ यजुः '। 'ॐअश्विनोर्भै०चामि ॥

अथ दिक्पालानाम् । ' त्रातारं गार्ग्य इन्द्रस्त्रिष्टुप् '। अग्निं दूतं विरूपोऽग्निर्गायत्री '। ' असियमो भार्गवजमदग्निदीर्घतमसो यमस्त्रिष्टुप् '। अत्र प्रणीतोदकस्पर्शः । ' एष ते वरुणो निर्ऋतिर्यजुः '। ' ॐएष ते निर्ऋते० षस्व '। ' प्रणीतोदकस्पर्शः । ' इमं मे शुनःशेपो वरुणो गायत्री '। ' ॐइमं मे वरुण० '। ' वातो वा गन्धर्वा वात उष्णिक् '। ' वयं बन्धुः सोमो गायत्री '। ' तमीशानं गौतम ईशानो जगती '। प्रणीतोदकस्पर्शः । ' नमोऽस्तु देवा अनन्तोऽनुष्टुप् '। ' ब्रह्मप्रजापतिर्ब्रह्मा त्रिष्टुप् '॥

अथ वस्वादीनाम् । ' स्वर्गा देवा वसवस्त्रिष्टुप् '। ' यज्ञो देवानां कुत्स आदित्यस्त्रिष्टुप् '। ' य एतावन्तश्च परमेष्ठी रुद्रोऽनुष्टुप् '। ' मरुतो यस्य गौतमो मरुतो गायत्री '। ' आब्रह्मन्प्रजापतिर्ब्रह्मा यजुः '। ' इदं विष्णुर्मेधातिथिरच्युतो गायत्री '। ' मानस्तोके कुत्स ईशो जगती '। ' चित्रं देवानां कुत्सोऽर्कस्त्रिष्टुप् '। ' अयं हि प्रजापतिर्वनस्पतिर्यजुः '। ' ॐ अयं हि त्वा० रुहेम '। इति होममन्त्राः ।

अथ जपसूक्तानि । ' विभ्राडिति सप्तदशर्चस्यानुवाकस्य आद्याया विभ्राट् । ततस्तिसृणां प्रस्काण्वः । पञ्चम्या अवत्सारः काश्यपः । षष्ठ्या वेनः सप्तम्याः कुत्सोऽष्टम्या अगस्त्यः नवम्याः श्रुतकक्षसुकक्षौ दशम्याः प्रस्कण्वः । अथ द्वयोः कुत्सः । अथ द्वयोर्जमदग्निः । पञ्चदश्या नृमेधः । षोडश्याः कुत्सः । अन्त्याया हिरण्यरूप आङ्गिरसः । पञ्चम्या विश्वे देवाः। षष्ठ्याः सोमोऽन्यासां सूर्यः। आद्या पञ्चमी जगती । द्वितीयादितिस्रो नवमी दशमी च गायत्र्यः त्रयोदशीपञ्चदश्यौ पथ्याबृहत्यौ । चतुर्दशी सतो बृहती । शेषाः सप्त त्रिष्टुभः । सूर्यप्रीतये जपे विनियोगः'। ' ॐविभ्राड्बृहत्० पश्यन् '। ' आषाढं युत्स्विति चतसृणां गौतमसोमस्त्रिष्टुप् सोमप्रीतये० '। ' ॐआषाढं युत्सु० विष्टौ '। ' अग्नि-

मूर्द्धा विरूपाक्षोऽग्निर्गायत्री '। 'उद्बुद्धयस्व परमेष्ठ्यग्निस्त्रिष्टुप्' बुधप्रीतये०। 'बृहस्पते अतिगृत्समदो ब्रह्मा त्रिष्टुप्। बृहस्पतिप्रीतये०"। 'अन्नात्परिस्रुतः प्रजापत्यश्विसरस्वतीन्द्राइन्द्रो जगती'। 'शन्नो देवी दध्यङ्ङाथर्वण आपो गायत्री'। 'कयानो वामदेवो राहुर्गायत्री'। 'केतुं कृण्वन् मधुच्छन्दा अग्निर्गायत्री'। एते मन्त्रा एव सूक्तानि॥

अथाऽधिदेवतानाम्। 'षट्षष्टिमन्त्रात्मकरुद्राध्यायस्य परमेष्ठी ऋषिः। आद्यानां षोडशानामेकरुद्रस्ततो बहुरुद्र आद्यो गायत्री। तिस्रोऽनुष्टुभो द्वे जगत्यौ। नमो हिरण्यबाहव इत्यन्तस्त्रिंशद्यजूंषि द्राप इत्युपरिष्टाद्बृहती, इमा रुद्रायेति जगती, या ते रुद्रेत्यनुष्टुप्। ततो द्वे त्रिष्टुभौ। विकिरिदेत्याद्या द्वादशानुष्टुभः। शेषाणि त्रीणि यजूंषि। रुद्रप्रीतये०'। 'ॐ नमस्ते रुद्र० दध्मः'। 'हवामहे' इत्यन्ताः षोडशैव रुद्रसूक्तमिति रूपनारायणीये। प्रणीतोदकस्पर्शः। 'श्रीश्च ते उत्तरनारायणो नारायणस्त्रिष्टुप्। उमाप्रीतये०'। 'यद्-क्रन्दो भार्गवजमदग्निदीर्घतमसोऽश्वस्त्रिष्टुप्। स्कन्दप्रीतये०'। 'सहस्रशीर्षेति षोडशानां नारायणः पुरुषोऽनुष्टुबन्त्या त्रिष्टुप्। विष्णुप्रीतये०'। 'आब्रह्मन्निति प्रजापतिर्ब्रह्मा यजुः। ब्रह्मप्रीतये०'। 'आशुः शिशानमिति द्वादशानामप्रतिरथ इन्द्रस्त्रिष्टुप्। इन्द्रप्रीतये०'। 'यमाय त्वा दध्यङ्ङाथर्वणो यमो यजुः। यमप्रीतये०। 'ॐ यमाय० स्वाहा'। प्रणीतोदकस्पर्शः। 'कार्षिरसि दध्यङ्ङाथर्वण आपोऽनुष्टुप्। कालप्रीतये०'। प्रणीतोदकस्पर्शः। 'चित्रावसो ऋषयो रात्रिर्जगती। चित्रगुप्तप्रीतये०'॥

अथ प्रत्यधिदेवतानाम्। 'अस्या जरास इति सप्तदशर्चस्य आद्याया वत्सप्री इन्द्रवायू त्रिष्टुप्। द्वितीयाया विरूप इन्द्रवायू गायत्री। तृतीयाया गौतमो मित्रावरुणौ गायत्री। चतुर्थ्या विरूप इन्द्रावरुणौ गायत्री। पञ्चम्याः कुत्सः शुक्रस्त्रिष्टुप्। षष्ठ्या वामदेवोऽग्निर्जगती। सप्तम्या विश्वामित्र इन्द्राग्नी त्रिष्टुप्। अष्टम्या भरद्वाजोऽग्निस्त्रिष्टुप्। नवम्या भरद्वाजो विश्वेदेवा गायत्री। दशम्या मेधातिथिरग्निर्गायत्री। एकादश्याः शक्तयः पाराशरो मरुतस्त्रिष्टुप्। द्वादश्या अत्रिर्दुहिता विश्वेदेवा मरुतस्त्रिष्टुप्। त्रयोदश्या भरद्वाजोऽग्निस्त्रिष्टुप्। चतुर्दश्या वसिष्ठ आदित्यो बृहती। षोडश्या वामदेवोऽग्निस्त्रिष्टुप्। सप्तद-

श्याऽनुशोधातकः सविता त्रिष्टुप् । अग्निप्रीतये० ' । ' आपो हिष्ठेति तिसृणां सिन्धुद्वीप आपो गायत्री । अप्प्रीतये० ' । ' स्योना पृथिवि दध्यङ्ङाथर्वणः पृथिवी गायत्री । पृथिवीप्रीत्यर्थे० ' । ' सहस्रशीर्षा नारायणः पुरुषोऽनुष्टुबन्त्यात्रिष्टुप् । विष्णुप्रीत्यर्थे० ' । ' आशुः शिशानो द्वादशानामप्रतिरथ इंद्रस्त्रिष्टुप् इन्द्रप्रीत्यर्थम्० ' । ' अदित्यै रास्ना दध्यङ्ङाथर्वण इन्द्राणी यजुः । इंद्राणी प्रीत्यर्थे० ' । ' हिरण्यगर्भ इति चतुर्णां हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । प्रजापतिप्रीत्यर्थम्० ' । ' नमोऽस्तु सर्पेभ्य इति तृचस्य देवाः सर्पा अनुष्टुप् । सर्पप्रीत्यर्थे० ' । ' ब्रह्मजज्ञानं प्रजापतिरादित्यस्त्रिष्टुप् । ब्रह्मप्रीतये० ' ॥

अथ विनायकादिपञ्चानाम् । ' गणानां त्वा प्रजापतिर्गणपतिर्यजुः । गणपतिप्रीतये० ' । ' अम्बे अम्बिके प्रजापतिरश्वोऽनुष्टुप् । दुर्गाप्रीतये० ' । नियुत्वान्वा यति षण्णामाद्याया गृत्समदो द्वितीयायाः पुरुषमीढाजमीढौ तिसृणां प्रजापतिः षष्ठ्याव्यश्व आङ्गिरसो वायुर्द्वितीयाऽनुष्टुप् पञ्चमी त्रिष्टुप् शेषा गायत्र्यः । वायुप्रीतये० । ' ऊर्ध्वा अस्य समिध इति द्वादशानां प्रजापतिरग्निरुष्णिक् । आकाशप्रीतये० ' । ' या वां कश मेधातिथिरश्विनौ गायत्री । अश्विनोः प्रीतये० ' ॥

अथ दिक्पालानाम् । ' आशुः शिशान इति द्वादशर्चमैन्द्रम् ' प्राग्वत् । ' अस्या जरास इति सप्तदशर्चमाग्नेयं ' प्राग्वत् । ' यमाय दध्यङ्ङाथर्वणो यमो यजुः । यमप्रीतये०' । ' ॐ यमाय स्वाहा ' । प्रणीतोदकस्पर्शः । ' असुन्वन्तमिति तृचस्य प्रजापतिरग्निस्त्रिष्टुप् । निर्ऋतिप्रीत्यर्थम्० ' । प्रणीतोदकस्पर्शः । ' इमं मे वरुणेति द्वयोः शुनःशेपो वरुणो गायत्री त्रिष्टुभौ । वरुणप्रीतये० ' । ' नियुत्वा न्वायविति षडर्चं वायवीयम् ' प्राग्वत् । आषाढमिति सौम्यचतुष्टयं प्राग्वत् । रुद्राध्यायः षट्षष्टिमन्त्रावसानं प्राग्वत् । प्रणीतोदकस्पर्शः । नमोऽस्तु सर्पेभ्य इति तृचमनन्तसूक्तं प्राग्वत् । ब्रह्मजज्ञानं प्रजापतिरादित्यस्त्रिष्टुप् । ब्रह्मप्रीतये० ॥

अथ वस्वादीनाम् । सुगा वो देवा वसवस्त्रिष्टुप् । वसुप्रीतये० । ' ॐ सुगावोदेवा० ' । ' इमा गिरो गृत्समद आदित्यस्त्रिष्टुप् । आदित्यप्रीतये० ' । ' ॐ इमा गिरो० ' । रुद्राध्यायो सैन्द्रं प्राग्वत् । शुक्रज्योतिश्चेति षण्णां सप्तर्षयो मरुत आचतुर्थी वोष्णिक् पञ्चमी जगती

शेषा गायत्र्यो मरुत्प्रीतये० । 'ॐ शुक्रज्योतिश्च० ' । आब्रह्मन् प्रजापतिर्ब्रह्मा यजुः । ब्रह्मप्रीतये । 'ॐ आब्रह्मन्० ' । 'सहस्रशीर्षेति वैष्णवं' प्राग्वत् । 'रुद्राध्यायो रौद्रं ' प्राग्वत् । 'विभ्राडिति सप्तदशर्चमार्कं ' प्राग्वत् । 'वनस्पते वीड्वङ्गः प्रजापतिर्वनस्पतिस्त्रिष्टुप् । वनस्पतिप्रीतये० ' । 'ॐ वनस्पतेवीड्वङ्गो०' । ततो व्याहृतिहोमादिबलिहोमान्तं याजुषं पूर्णाहुतिप्राग्भावि कर्म कुर्यात् ।

अथ सामगानाम् । कुशकण्डिकानन्तरं प्रधानहोमे मन्त्राः । 'उदुत्यं प्रस्कण्वः सूर्यो गायत्री' । तिलाज्यहोमे विनियोगः । 'ॐ उदुत्यं० सूर्याय स्वाहा ' । 'संते पयांसि सोमः सोमो गायत्री ' । 'ॐ संतेपयांसि० ' । 'अग्निर्मूर्द्धा वरुणः भौमो गायत्री० ' । 'ॐ अग्निमूर्धा० ' । 'अग्ने विवस्वन्मण्डो जमदग्निर्बुधो बृहती० ' । 'ॐ अग्नेविवस्वत्० ' । 'बृहस्पते परिदीयाऽप्रतिरथो बृहतिस्त्रिष्टुप्० ' । 'बृहस्पतेपरिदीया० ' । 'शुक्रं ते भरद्वाजः शुक्रस्त्रिष्टुप् ' । 'ॐ शुक्रं तेअन्यत्० ' । 'शन्नो देवीः सिन्धुद्वीपः शनिर्गायत्री० ' । 'ॐ शं नोदेवी० ' । 'कया नो वामदेवो राहुर्गायत्री० ' । 'ॐ कयानश्चि० ' । 'केतुं कृण्वन्मधुच्छन्दाः केतुर्गायत्री० ' । 'ॐ केतुं कृण्वन्० ' ।

अथादिदेवतानाम् । 'आवो राजानं वामदेवो रुद्रस्त्रिष्टुप्० ' । 'ॐ आवो राजानं० ' । 'आपो हिष्ठा सिन्धुद्वीप उमा गायत्री० ' । 'ॐ आपो हिष्ठा० ' । 'स्योना पृथिवी मेधातिथिः स्कन्द उष्णिक्० ' । 'ॐ स्योना पृथिवी० ' । 'इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री० ' । 'ॐ इदं विष्णु० ' । 'त्वमित्सप्रथा गौतमो ब्रह्मा बृहती ' । 'ॐ त्वमित्सप्रथाः० ' । 'इन्द्रमिद्देवता उक्तस्तुगिन्द्रस्त्रिष्टुप्० ' । 'ॐ इन्द्रमिद्देवता० ' । 'आयं गौः सार्पराज्ञी यमो गायत्री० ' । 'ॐ आयं गौः० ' । 'ब्रह्मजज्ञानं ब्रह्मा कालस्त्रिष्टुप्०' । 'ॐ ब्रह्मजज्ञानं० ' । 'चित्र इच्छिशोश्चित्रगुप्तश्चित्रगुप्तो जगती० ' । 'ॐ चित्र इच्छिशो०' ।

अथ प्रत्यधिदेवतानाम् । अग्निं दूतं भरद्वाजोऽग्निर्गायत्री० । 'ॐ अग्निं दूतं० ' । 'उदुत्तमं गौतम आपस्त्रिष्टुप्० ' । 'ॐ उदुत्तमं०' । 'पृथिव्यन्तरिक्षं विष्णुः पृथिव्युष्णिक्० ' । 'ॐ पृथिव्यन्तरिक्षं० ' । 'सहस्रशीर्षा नारायणो विष्णुरनुष्टुप्० ' । 'ॐ सहस्रशीर्षा० ' । 'इन्द्रो वृषो वृधीय इन्द्रो गायत्री० ' । 'ॐ इन्द्र वृषो० ' । 'एका-

ष्टका वसिष्ठ इन्द्राणी त्रिष्टुप्० ’। ‘ ॐ एकाष्टका० ’। ‘ प्रजापते न त्वद्धिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ’ । ‘ ॐ प्रजापते न० ’। तवेदिन्द्रावमं वसिष्ठः सर्पास्त्रिष्टुप्० ’। ‘ ॐ तवेदिन्द्रावसु० ’ । ‘ एष ब्रह्मा प्रजापतिर्ब्रह्मा द्विपदा गायत्री० ’ । ‘ ॐ एष ब्रह्मा० ’।

अथ विनायकादिपञ्चानाम् । ‘ आतूनो गौरिवीतो गणपतिर्गायत्री० ’ । ‘ ॐ आतून० ’। ‘ इमं स्तोमं कुत्सो दुर्गा जगती० ’। ‘ ॐ इमं स्तोमं०’। ‘ क्षाणाशिशुरिन्द्रो वायुरुष्णिक्०’। ‘ ॐ क्षाणाशिशु०’ । ‘ आदित्प्रत्नस्य निधनकाम आकाशो गायत्री० ’। ‘ ॐ आदित्प्रत्नस्य० ’ । ‘ एषो उषा प्रस्कण्वोऽश्विनौ गायत्री० ’। ‘ ॐ एषो उषा० ’।

अथ लोकपालानाम् । ‘त्वामिद्धि भरद्वाज इन्द्रो बृहती०’। ‘ ॐ त्वामिद्धि०’। ‘अग्निर्वृत्राणि श्रौतोऽग्निर्गायत्री०’। ‘ ॐ अग्निर्वृत्राणि० ’। ‘नाकेसुपर्ण यमो यमस्त्रिष्टुप्’। ‘ॐ नाकेसुप० ’। ‘वेत्था हीत्यादित्यो निर्ऋतिरुष्णिक् ’ । ‘ ॐ वेत्था हि० ’ । ‘ इमं मे पुष्कलो वरुणो गायत्री० ’। ‘ ॐ इमं मे वरुण० ’ । ‘ वातआवातु प्रातीचीनेक्षाशीतो वायुर्गायत्री० ’। ‘ ॐ वातआवातु० ’। ‘ स्वादिष्टया गम्भीरः सोमो गायत्री० ’। ‘ ॐ स्वादिष्टया० ’। ‘ तद्रो गायत्रीचि रुद्र ईशानो गायत्री० ’ । ‘ ॐ तद्रोगाय० ’। ‘ समानो अध्वा उशना अनन्तस्त्रिष्टुप्० ’ । ‘ ॐ समानो अध्वा० ’ । ‘ ब्रह्मजज्ञानं ब्रह्मा ब्रह्मा त्रिष्टुप्० ’। ‘ ॐ ब्रह्मजज्ञानं० ’।

अथ वस्वादीनाम् ’। ‘ तमग्नि नमस्ते वामदेवो वसवो विराट्० ’। ‘ ॐ तमग्नि नमस्ते० ’। ‘ आदित्यैरिन्द्रभरद्वाज आदित्योर्विराट्०’ । ‘ ॐ आदित्यैरिन्द्र० ’ । आवो राजानं ‘ वामदेवो रुद्रास्त्रिष्टुप्० ’। ‘ॐ आवो राजानं०’। ‘पवमाना असृक्षत आदारसनमरुतो बृहती०’। ‘ ॐ पवमाना असृक्षत० ’। ‘ब्रह्मजज्ञानं ब्रह्मा ब्रह्मा त्रिष्टुप्० ’। ‘ ॐ ब्रह्मजज्ञानं० ’। ‘ इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री० ’। ‘ ॐ इदं विष्णु० ’। ‘ आत्वा सोमस्य सोम ईशानो बृहती० ’। ‘ ॐ आत्वा सोमस्य०’। ‘इन्द्रायमद्वने गौरीवितर्को गायत्री०’। ‘ॐ इन्द्रायमद्वने०’। ‘वनस्पते वीड्वङ्गो बाभ्रव्यो वनस्पतिस्त्रिष्टुप्०’। ‘ॐ वनस्पतेवीड्वङ्गो०’।

'इति सामगानां होममन्त्राः होममंत्राएव सामगानां जप्यानि सूक्तानि । विशेषस्तु ग्रहेषु सौम्ये प्रकीर्त्तितव्यमिति द्वादशर्चस्याद्यानां तिसृणां वाजस्त्रिष्टुप् । शेषाणामादित्यो गायत्री सोमो देवता सोमप्रीत्यर्थं० । ' ॐ प्रकाव्यमुश० ' । एकादशसामात्मिकायां रुद्रसंहितायाम् । आवो॰ राजानमिति वामदेवस्त्रिष्टुप् । तद्वो गायेति चतुःसाम्नो वर्गस्य रुद्रो गायत्री । त्रयाणामाज्यदोहसीम्नां वैश्वानरस्त्रिष्टुप् । त्रयाणां देवव्रतसाम्नां पूर्वयोरुद्रोन्त्यस्य विश्वेदेवा उत्कृतिः । सर्वेषां रुद्रो देवता । रुद्रप्रीत्यर्थम्० । ' ॐ आवोराजा एकादशसामात्मिकायां स्कन्दसंहितायाम् ' । ' आमन्द्रैरिति त्रयाणां त्वाप्रभनोविश्वा सुहव्यमिति त्रयाणां शक्त्यो बृहती । प्रसेनानीमिति त्रयाणां कुत्सस्त्रिष्टुप् । पवित्रं त इति द्वयोरादित्यो जगती । सर्वेषां स्कन्दो देवता । स्कन्दप्रीतये० ' । ' आमंद्रे ' । नवसामात्मिकायां विष्णु॰ संहितायाम् । इदं विष्णुर्विष्णुर्गायत्री । प्रक्षस्य वृष्ण्यो विष्णुर्जगती । प्रकाव्यमुशने इति वराहस्य वाजिस्त्रिष्टुप्० । सहस्रशीर्षा शङ्कचगीतयोः पुरुषव्रतयोः पुरुषोऽनुष्टुप् । सर्वेषां विष्णुर्देवता । विष्णुप्रीत्यर्थम्० । ' इमे विष्णुः ' । विनायकस्य ' अदर्दरिति दशसामात्मिकायां विनायकसंहितायाम् । अदर्दरिति द्वयो रुद्रद्रक्षस्त्रिष्टुप् । सुश्राणास इति द्वयोः पृथिवी त्रिष्टुप् ' । आतून इति चतुःसामवर्गे आद्ययोर्गौरिवीत अन्त्ययोरपालवैणवश्चतुर्णां गायत्री । मृष्यमाणा इति द्वयोराद्यस्योक्ष्णोराध्नोद्वितीयस्य वर्गस्य षष्ठस्याऽग्निर्बृहती । सर्वेषां विनायको देवता । विनायकप्रीत्यर्थम्० ' । "अदरुपत् ' । ' सोमस्य प्रकाव्यमुशनमिति प्राग्वत् । द्वादशर्चम् ' ईशानस्य रुद्राणाम् ' आवो राजानमिति रुद्रसंहिता प्राग्वत् । अच्युतस्य वैष्णवीसंहिता प्राग्वत् । अन्येषां तु होममन्त्रा एव ' इति भट्टचरणमदनोमापतिरूपनारायणदानसागराद्याः । 'येषां गीतिरस्ति ते गीतिसंहिता एव जप्या' इत्यपित एव । सूक्तजपानन्तरं व्याहृतिहोमादिर्बर्हिर्जुडिकाहोमान्तं पूर्णाहुतिप्रागभावित्वशाखोक्तं सामवेदी कुर्यात् ।

अथाथर्ववेदिनः । प्रधानहोमे मन्त्राः । ' विषासहिमथर्वादित्यो ... । होमे विनियोगः ' । एवं सर्वत्र । ' शकधूममथर्वा सोमोऽनुष्टुप् ' । ' त्वया मन्यो ब्रह्मा भौमस्त्रिष्टुप् ' । 'यद्राजानो विभजन्त

विष्णुर्बुधः पङ्क्तिः ' । ' बृहस्पतिर्नो ब्रह्मा बृहस्पतिस्त्रिष्टुप् ' । ' शुक्रोऽस्यथर्वा शुक्रोऽनुष्टुप् ' ' सहस्रबाहुर्नारायणः शनिस्त्रिष्टुप् ' । ' दिव्यं वित्तं कौशिको राहुस्त्रिष्टुप् ' । ' यस्ते पृथुरथर्वा केतव-स्त्रिष्टुप् ' ॥

अथाधिदेवतानाम् । ' मा नो विदन्ब्रह्मा ईश्वरोऽनुष्टुप् ' । आपो-हिष्ठा सिन्धुद्वीप उमा गायत्री । ' अग्निरिवमन्यो ब्रह्मा स्कन्द-स्त्रिष्टुप् ' । ' प्रतद्विष्णुरथर्वा विष्णुर्गायत्री ' । ' ब्रह्मजज्ञानमथर्वा ब्रह्मा त्रिष्टुप् ' । ' इन्द्रेमं ब्रह्मेन्द्रोऽनुष्टुप् ' । ' यः प्रथमो ब्रह्मा यमस्त्रि-ष्टुप् ' । ' रोहितः कालोऽथर्वा कालोऽनुष्टुप् ' । ' यदाज्ञातं कौशिक-श्चित्रगुप्तोऽनुष्टुप् ' ।

अथ प्रत्यधिदेवतानाम् । ' सामस्त्वाग्ने ब्रह्माऽग्नि त्रिष्टुप् ' । ' शंनो-देवी ब्रह्मा आपो गायत्री ' । ' भूमेर्मातर्ब्रह्मा भूमिरनुष्टुप् ' । ' इदं विष्णुरथर्वा विष्णुर्गायत्री ' । ' इन्द्रा जुषस्व ब्रह्मेन्द्रोऽनुष्टुप् ' । ' प्रेत-पादावथर्वेन्द्राण्यनुष्टुप् ' । ' नक्तं जातास्यथर्वा प्रजापतिरनुष्टुप् ' । ' सर्पानुसर्पाथर्वा सर्पाः पङ्क्तिः ' । ' ये दिशामथर्वा ब्रह्मा त्रिष्टुप् ' ।

अथ विनायकादिपञ्चानाम् । ' निर्लक्ष्म द्रविणोदा विनायकोऽनु-ष्टुप् ' । ' पृतनाजितमथर्वा दुर्गा त्रिष्टुप् ' । ' अन्तरिक्षे वायवे ब्रह्मा वायुरनुष्टुप् ' । ' शाम्यन्ताथर्वा आकाशस्त्रिष्टुप् ' । ' संवेत्रपथ्यो-ऽङ्गिरा अश्विनावनुष्टुप् ' ।

अथ दिक्पालानाम् । ' इन्द्रमिन्द्रब्रह्मेन्द्रस्त्रिष्टुप् ' । ' अग्नेर्मन्वेति-ब्रह्माग्निस्त्रिष्टुप् ' । ' परो मृत्युक्तब्रह्मा यमस्त्रिष्टुप् ' । ' अभितं निर्ऋ-तिरथर्वा निर्ऋतिरनुष्टुप् ' । ' ये पश्चाज्जुह्वत्यथर्वा वरुणस्त्रिष्टुप् ' । ' वायोः सवितुरथर्वा वायुस्त्रिष्टुप् ' । ' य उत्तरतो ब्रह्मा सोमस्त्रिष्टुप् ' । ' धाता ददात्वङ्गिरा ईशानो गायत्री ' । य अनन्तं विततमथर्वा अनन्तः पङ्क्तिः ' । ' ब्रह्मा परं युज्यताम् । अथर्वा ब्रह्मा त्रिष्टुप् ' ।

अथ वस्वादीनाम् । ' यानवह्वस्त ब्रह्मा वसवस्त्रिष्टुप् ' । ' आदित्यो ब्रह्मा आदित्यस्त्रिष्टुप् ' । ' रुद्रं जलाष ब्रह्मा रुद्रस्त्रिष्टुप् ' । ' मरुतां-मन्वेऽथर्वा मरुतस्त्रिष्टुप् ' । ' इमा ब्रह्म ब्रह्मा ब्रह्मत्रिष्टुप् ' । ' तद्वि-ष्णोर्ब्रह्माऽच्युतो ब्रह्मा गायत्री ' । ' रुद्रजलाष ब्रह्मेशस्त्रिष्टुप् ' । ' वत्सो

विराजो ब्रह्माऽर्कस्त्रिष्टुप्'। 'वनस्पते वीड्वङ्गोऽथर्वा वनस्पतिस्त्रिष्टुप्'। इत्यथर्वविदो होममन्त्राः।

अथ सूक्तानि । 'विषासहिं सनेहमामति षण्णाम् अथर्वा सूर्यो जगती। सूर्यप्रीतये जपे विनियोगः' एवमग्रेऽपि । 'शकधूममिति चतुर्णामथर्वा सोमोऽनुष्टुप्' । 'त्वया मन्यो इति सप्तानां ब्रह्मा भौमस्त्रिष्टुप्' । 'सोमस्यांशो इति चतुर्णामथर्वा बुधोऽनुष्टुप्' । 'भद्रादधिश्रेय इत्यस्य ब्रह्मा बृहस्पतिस्त्रिष्टुप्' । 'शुक्रोऽसीत्यथर्वा शुक्रोऽनुष्टुप्'। 'प्राणाय नम इति तिसृणां ब्रह्मा शनिस्त्रिष्टुप्'। 'राहुराजानं ब्रह्मा राहुस्त्रिष्टुप्'। 'यस्ते पृथुरिति तृचस्याथर्वा केतवः त्रिष्टुबाद्ययोरन्त्याऽनुष्टुप्'।

अथाधिदेवतानाम्। 'मा नो विदन्निति चतसृणां ब्रह्मा रुद्रस्त्रिष्टुप्'। 'अग्निरिव मन्यो ब्रह्मास्कन्दस्त्रिष्टुप्'। 'यत इन्द्र इति पञ्चानामथर्वा विष्णुस्त्रिष्टुप्० अन्त्या गायत्री। विष्णुप्रीतये'। 'ब्रह्मजज्ञानमिति सप्तानामथर्वा ब्रह्मा त्रिष्टुप्'। 'इन्द्रो जयातीति तृचस्य ब्रह्मेन्द्रविष्णुस्त्रिष्टुप्। इंद्रप्रीतये०'। 'यमो मृत्युरिति तृचस्य ब्रह्मा यमस्त्रिष्टुप्। यमप्रीतये०' । 'ओहितः काल इति द्वयोरथर्वा कालोऽनुष्टुप्' । 'अथर्वाङ्परस्तादिति चतसृणामथर्वा चित्रगुप्तस्त्रिष्टुप्'।

अथ प्रत्यधिदेवतानाम्। 'अग्नेर्मन्व इति तृचस्य ब्रह्माग्निस्त्रिष्टुप्'। 'शन्नो देवीति चतसृणां ब्रह्माऽऽपो गायत्री'। 'सत्यं बृहद्वृतामिति ब्रह्मा क्षितिस्त्रिष्टुप्'। 'यत इन्द्र इति पञ्चर्चं वैष्णवं प्राग्वत्'। 'इन्द्रा जुषस्वेत्येकस्य ब्रह्मेन्द्रोऽनुष्टुप्' । 'प्रेतपादावित्यस्य अथर्वेन्द्राण्यनुष्टुप्'। 'प्रजापते न त्वदिति द्वयोर्ब्रह्मा प्रजापतिस्त्रिष्टुप्'। 'शेरभकेत्यष्टानामथर्वा सर्पाः पङ्क्तिः'। 'ब्रह्मजज्ञानमिति सप्तर्चं ब्राह्मं प्राग्वत्।

अथ विनायकादिपञ्चानाम् । 'निर्लक्ष्ममिति चतसृणां द्रविणोदा विनायकोऽनुष्टुप्' । 'पूतनाजितमथर्वा दुर्गात्रिष्टुप्' । वायोः सवितुरिति द्वयोरथर्वा वायुस्त्रिष्टुप्'। 'पुरं यो ब्रह्मण इति चतसृणां ब्रह्माकाशोऽनुष्टुप्'। 'अश्विना ब्रह्मणेत्यस्य ब्रह्माऽश्विनौ त्रिष्टुप्'।

अथ लोकपालानाम्। तत्रेन्द्राग्नियमानां त्रयस्तृचाः प्रागुक्ता एव। 'यस्यासो आसनीति तिसृणां ब्रह्मा निर्ऋतिस्त्रिष्टुप्' । 'उदुत्तमं ब्रह्मा वरुणस्त्रिष्टुप्'। 'वायोः सवितुरिति वायवीयो द्व्यृचः' प्राग्वत्

'शकं धूममिति चतस्रः। सोमस्य मानो विदन्निति चतस्र ईशस्य'। 'शेवनकेत्यष्टानां, रभंतस्य'। 'ब्रह्मजज्ञानमिति ब्रह्मणः सप्त'। एतानि पूर्ववत्।

अथ वस्वादीनाम्। वस्वादित्यरुद्रमरुतां होममन्त्रा एव। 'ब्रह्मजज्ञानमिति सप्त ब्रह्मणः'। 'यत इन्द्र इति पञ्चाच्युतस्य'। 'मानोऽविदन्निति चतस्र ईशस्य' 'विषासहिमिति षडर्कस्य'। एतानि पूर्ववत्। वनस्पतेर्होममन्त्रा एव। ततः स्वस्वशाखीयं स्विष्टकृदभ्यातानहोमादिपूर्णाहुतिप्राग्भावि शेषं कर्म कुर्युः। ततो यजमानो मण्डपप्राग्द्वारकलशसमीपे 'त्रातारमिन्द्रं गर्ग इन्द्रस्त्रिष्टुप्'। इन्द्रप्रीत्यर्थं बलिदाने विनियोगः। 'ॐ त्रातारमिन्द्रम्०'। 'इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकायामुं सदीपं माषभक्तबलिं समर्पयामि न मम' इति माषभक्तबलिं दत्त्वा, 'भो इन्द्र दिशं रक्ष, बलिं भक्ष, मम सकुटुम्बस्य आयुःकर्त्ता क्षेमकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्ता भव' इति प्रार्थयेत्। एवमाग्नेय्यादिषु होमोक्तैरग्न्यादिमन्त्रैर्बलिदानं प्रार्थनं च। एवमधिदेवताप्रत्यधिदेवतासहितेभ्यः सूर्यादिग्रहेभ्योऽपि होमोक्तैस्तत्तन्मन्त्रैर्विनायकदुर्गावाय्वाकाशवास्तोष्पतिक्षेत्राधिपतिभ्यस्तत्तन्मन्त्रैर्होमोक्तैरेव। तत आचार्यो यजमानान्वारब्धः स्रुचिस्रुवेण द्विवारं चतुर्वारं वा नालिकेरादिफलयुक्तमाज्यं गृहीत्वा पूर्णाहुतिं जुहुयात्। तत्र मन्त्राः। 'समुद्रादूर्मिरिति तृचस्य गौतमो वामदेवोऽग्निस्त्रिष्टुप्। पूर्णाहुतौ विनियोगः'। एवमग्रेऽपि विनियोगः। 'मूर्द्धानं दिवो भरद्वाजो वैश्वानरस्त्रिष्टुप्। पुनरग्निर्वसुरुद्रादित्यास्त्रिष्टुप्। पूर्णा दर्विर्विश्वेदेवाः शतक्रतुरनुष्टुप्। सप्त ते अग्ने सप्तवानग्निर्जगती। धामं ते वामदेव आपो जगती'। 'ॐ समुद्रादूर्मि०। ॐ मूर्धानं दिवो० ॐ पुनस्त्वारुद्रा० ॐ पूर्णादर्वि०। ॐ सप्तते अग्ने०। ॐ धामं ते० ऊर्मिं स्वाहा' इति। यजमानस्तु 'इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नयेऽद्भ्यश्च न मम' इति त्यजेत्। कातीयानां तु 'मूर्द्धानं दिव इत्येव पूर्णाहुतिमन्त्रः'। 'अग्नय इदं न मम' इति त्यागः। सामगानां तु प्रजापतिर्ऋषिर्गायत्रीछन्द इन्द्रो देवता। यशस्कामस्य यज्ञीयप्रयोगे विनियोगः'। 'पूर्णहोमं यशसा जुहोमि योऽस्मै जुहोति वरमस्मै ददाति। वरं वृणे यशसा भामि लोके स्वाहा' इत्यनेन स्रुवेणैव

होमः । इन्द्राय इदं न ममेति त्यागः । ततो वसोर्धारया होष्यामीति सङ्कल्प्य यजमानो वसोर्द्धारां जुहुयात् । मन्त्रास्तु, अग्निमीळ इति नवानां मधुच्छन्दा अग्निर्गायत्री । वसोर्द्धारायां विनियोगः । विष्णोर्नुकमिति षण्णां दीर्घतमा विष्णुस्त्रिष्टुप् । आते पितरिति पञ्चदशानां गृत्समदो रुद्रस्त्रिष्टुप् । स्वादिष्टयेति नवानां मधुच्छन्दः पवमानसोमो गायत्री । महावैश्वानरसाम्नो वैश्वानरऋषिर्वैश्वानरो देवता पथ्याबृहतीछन्दः । ज्येष्ठसाम्नो भरद्वाजऋषिर्वैश्वानरो देवता त्रिष्टुप् छन्दः । वसोर्धारायां विनियोगः ' । ' वसोर्धारां जुहोति ' इत्यनुवाकमपि पठन्ति शिष्टाः । ' वसोर्द्धाराहोमस्तु महादानजलाशयोत्सर्गादौ नास्तीति बहवः । ततः पूर्णपात्रविमोकादि च यथाशाखं समाप्य आचार्यसहिता ऋत्विजः सर्वौषधीभिरनुलिप्ताङ्गपत्नीपुत्रादिसहितं यजमानं स्वस्वशाखीयैर्मन्त्रैर्नवग्रहपीठसमीपस्थकलशोदकेन सम्पातकलशोदकेन च अभिषिञ्चेयुः पौराणैश्च । ते च—

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
[illegible]ताः सागराः शैलास्तीर्थानि जलदा नदाः ।

एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

'ॐ तच्छंयोरावृणीमहे' इति ।

ततो यजमानः स्नात्वा शुक्लमाल्यगन्धाम्बरधर आचार्यादीन्सम्पूज्य तेभ्यो दक्षिणां दद्यात् । तत्राचार्याय धेनुः । ब्रह्मणे कृष्णोऽनड्वान् । एवं सदस्यर्त्विग्द्वारपालादिभ्यो यथाशक्ति ।

तथा—

धेनुः शङ्खस्तथाऽनड्वान् हेम वासो हयः क्रमात् ।
कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात् ॥

ग्रहानुद्दिश्य देयाः । ततः शक्त्या ब्राह्मणान् भोजयेत् । सङ्कल्पयेद्वाऽशक्तौ । ततो दीनानाथेभ्यो भूयसीं दक्षिणां दद्यात् । मण्डलदेवतानां ग्रहपीठदेवतानां चोत्तरपूजां कृत्वा, यान्तु देवगणाः, अभ्यारमिदद्वयो० 'उत्तिष्ठ ब्रह्मणस्पते०' इति ता उत्थाप्य विसृज्य मण्डपादीन् प्रतिमादींश्च सर्वान् सम्भारानाचार्याय प्रतिपाद्य, 'यस्य स्मृत्या०,' प्रमादात् कुर्वतां कर्मेति पठित्वा कर्मेश्वरार्पणं कृत्वा विप्राशिषो गृहीत्वा तान्नमस्कृत्य सुहृद्युतो भुञ्जीतेति सर्वं शिवम् ॥

इति श्रीभट्टशङ्करात्मजनीलकण्ठकृते दानमयूखे दानपरिभाषाप्रयोगः ।

अथ दानानि ।

मात्स्ये–'अथातः सम्प्रवक्ष्यामि' इत्यादिना षोडश महादानानि उक्तानि । यथा–

आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितम् ।
हिरण्यगर्भदानं च ब्रह्माण्डं तदनन्तरम् ॥
कल्पपादपदानं च गोसहस्रं च पञ्चमम् ।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च ॥
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा ।
पञ्चलाङ्गलकं तद्वद्धरादानं तथैव च ॥
द्वादशं विश्वचक्रं च ततः कल्पलतात्मकम् ।
सप्तसागरदानं च रत्नधेनुस्तथैव च ॥
महाभूतघटस्तद्वत् षोडशः परिकीर्त्तितः ।
तस्मादाराध्य गोविन्दमुमापतिविनायकौ ॥
महादानमखं कुर्याद्विप्रैश्चैवानुमोदितः । इति ॥

तथा—

षोडशारत्निमात्रं तु दश द्वादश वा करान्।
मण्डपं कारयेद्विद्वान् चतुर्भद्रासनं बुधः॥

'भद्रासनानि द्वाराणि' इति केचित्। 'कुण्डसमीपान्यासनानि' इति परे।

तथा—

सप्तहस्ता भवेद्वेदी मध्ये पञ्चकराऽथवा।
तन्मध्ये तोरणं कुर्यात्सारदारुमयं दृढम्॥

षोडशहस्तपक्षे सप्तहस्तदशद्वादशहस्तयोः पञ्चहस्तेति। सा च पूर्वमेव निर्णीता। तस्यां मध्यगतप्राक्सूत्रे पूर्वपश्चिमयोः शाकेङ्गुदीदेवदारुश्रीपर्णीबिल्वकदम्बकाञ्चनादीनामन्यतमनिर्मितं सप्तहस्तं चतुरस्रं स्तम्भद्वयं निखेयम्। हस्तद्वयं भूमौ स्तम्भयोरन्तरालं तु हस्तचतुष्टयम्। तयोरुपरि हस्तमिता चूडा। हस्तमितं त्यक्त्वा च्छिद्रं वा कार्यम्। एवमुत्तरङ्गोऽपि स्तम्भसजातीयकाष्ठघटितः पञ्चहस्तः। तयोर्वितस्तिमात्रं त्यक्त्वा कृतबिलः स्तम्भचूडयोर्वितस्तिमात्रचूडास्वकराभ्यां वा स्तम्भबिलयोर्निवेश्यः। तदेतत्तोरणम्। उत्तरङ्गमध्येऽधोभागे लौहं कटकमंकुशं वा कीलेन निवेश्य तदुत्तरङ्गकाष्ठात्षडङ्गुलावलम्बितुलावलम्बनाय। तुला तु पूर्वोक्ता काष्ठमयी दशाङ्गुलसूत्रवेष्टनस्थूला चतुर्भिः सार्द्धैर्वा चतुर्भिर्हस्तैर्दीर्घा वर्तुला प्रान्तयोर्मध्ये च षडङ्गुलोन्मिता चतुरस्रा कार्या। तस्यां च तुलावद्दीर्घं पट्टद्वयं चतुष्टयं वा निवेश्यान्तयोर्मध्ये च पट्टत्रयं षडङ्गुलं निवेश्य मध्ये चान्ये चतुर्विंशतिर्बन्धा निवेश्याः सौवर्णाढ्याः। तस्याः षडङ्गुलयोरन्तयोरधोभागे बडिशकृति कटकद्वयं निवेश्य तन्मध्ये चोर्ध्वभाग एकम्। ततस्ताम्रपलानां दशाष्टषट्शतैः क्रमात्पञ्चचतुःसार्द्धत्रिप्रादेशव्यासवर्तुले पञ्चचतुरुयङ्गुलोच्छ्रितप्रान्ते ताम्रचतुर्वलयान्विते फलके लौहाभिस्त्रिहस्ताभिश्चतसृभिः शृङ्खलाभी रज्जुभिर्वर्तुलान्तयोरवलम्बयेत्। यथा फलकयोर्भूमेश्च वितस्तिमितमन्तरं भवति। हेमाद्रिरूपनारायणादिभिश्च काष्ठमये फलके उक्ते। तथा—

कुर्यात्कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः। सुमेखलायोनियुतानि तानि सम्पूर्णकुम्भानि सहासनानि। सुताम्रपात्रद्वयसंयुतानि सयज्ञपात्राणि सविष्टराणि। हस्तप्रमाणानि तिलाज्यपुष्पधूपोपहाराणि सुशोभ-

नानि। पूर्वोत्तरेहस्तमिताऽथ वेदी ग्रहादिदेवेश्वरपूजनाय। 'विस्तारायामो-च्छ्रायैर्हस्तमिता' इति केचित्। 'वितस्त्युच्छ्राया' इति हेमाद्रिः। तदुक्तं—

गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् ।
वप्रद्वययुतां वेदीं वितस्त्युच्छ्रायसंयुताम् ॥

मात्स्ये—

द्विरङ्गुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः ।
अङ्गुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि ॥
त्र्यङ्गुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः । इति ॥

तथा—

अनेन विधिना यस्तु तुलापुरुषमाचरेत् ॥
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ।
विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ।
कल्पकोटिशतं यावत्तस्मिँल्लोके महीयते ॥
कर्मक्षयादिह पुनर्भुवि राजराजो
भूपालमौलिमणिरञ्जितपादपीठः ।
श्रद्धान्वितो भवति यज्ञसहस्रयाजी
दीप्तप्रतापजितसर्वमहीपलोकः ॥
यो दीयमानमपि पश्यति भक्तियुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानलोकं
प्राप्नोति धाम स पुरन्दरदेवजुष्टम् । इति ॥

अथ तुलापुरुषदानप्रयोगः । तत्र अधिवासनात्पूर्वदिने कृतैकभक्तादिरधिवासनदिने यजमानो देशकालौ सङ्कीर्त्य ब्रह्महत्यादिसर्वपापनाशपूर्वकसर्वमन्वन्तरकालावच्छिन्नसर्वलोकपालस्थानाधिकरणकवासोत्तरकालाप्सरोगणाधिष्ठितकालरणत्किङ्किणीगणमण्डितार्कवर्णविमानकरणवैकुण्ठभुवनगमनानन्तकल्पकोटिशतावधिपूजायुक्तविष्णुपुरवासोत्तराखिलभूपालमौलिमणिमाणिक्यमालोपरञ्जितचरणपीठत्वविशेषितराजराजत्वश्रद्धानुविद्धयज्ञसहस्रयाजित्वप्रदीप्तप्रतापाशेषमहीपालविजयकामो विष्णुप्रीतिकामो वा श्वः तुलापुरुषदानमहं प्रतिपादयिष्ये इति सङ्कल्प्य,

एकस्यां प्रतिमायां गोविन्दं, परायामुमापतिविनायकौ च गोविन्दाय नम उमापतिविनायकाभ्यां नम इति संपूज्य, विप्रत्रयं च संपूज्य, विप्राज्ञां गृहीत्वा, षोडश मातृः सप्त वसोर्धाराश्च संपूज्य, नान्दीश्राद्धपुण्याहवाचनगुर्वृत्विग्द्वारपालवरणतदीयमधुपर्कपूजनानि पूर्वाह्णे कृत्वाऽपराह्णे गुरुसहितो मण्डपपूजां कुर्यात् । तत ऋत्विजः प्रतिकुण्डमेकैकं कलशमपि पूर्वोक्तैर्मन्त्रैः स्थापयेयुः । ' कलशस्थापनं गुरुः कुर्यात् ' इति परे । तत ऋत्विजः स्वस्वकुण्डेऽग्निं स्थापयेयुः । गुरुस्तु महावेद्यां षोडशारं ग्रहवेद्यां च सर्वतोभद्रं विलिख्य तद्देवतास्तस्यामेव वेद्यां प्रतिमासु वा सूर्यादिवनस्पत्यन्तैकपञ्चाशद्देवताश्च संपूज्य नवग्रहवेदिकलशस्थापनतदभिमन्त्रणानि प्राग्वत्कृत्वा सर्वकर्माध्यक्षतया तिष्ठेत् । ऋत्विजस्तु ग्रहादिहोमसूक्तजपद्वारा सूक्तपाठान्प्राग्वत्कृत्वा स्विष्टकृदादिपूर्णाहुतिप्राक्तनं कर्म कुर्युः ।

भूमिर्भूमिमगान्माता भूमिर्मातरमप्यगात् ।
भूयाम पुत्रैः पशुभिर्योऽस्मान्द्वेष्टि स भिद्यताम् ॥

इति भूमिं स्पृशेत् । ततस्तोरणस्पर्शः ।

तुलायज्ञस्य पूर्वस्यां सुप्रभं नाम तोरणम् ।
महावीर्यं महाकायं सुवर्णसदृशप्रभम् ॥
अत्र द्वारे स्थितः शैलो माल्यवांश्च महाद्युतिः ।

एह्येहि सुप्रभ तोरण, तुलायज्ञं रक्ष, विघ्नं नाशय । 'अग्निमीळे' इत्यावाहनम् ।

दक्षिणाशां गतं यस्य भीमाख्यं नाम तोरणम् ।
महावीर्यं महाकायं भिन्नाञ्जनसमप्रभम् ॥
अत्र द्वारे स्थितः शैलो विन्ध्यो नाम महाचलः ।

एह्येहि भीमतोरण इत्यादि पूर्ववत् । ' इषे त्वा ' इत्यावाहनम् ।

पश्चिमां दिशमाश्रित्य सुदंष्ट्रं नाम तोरणम् ।
तत्र द्वारि स्थितः शैलो गन्धमादनसंज्ञकः ॥

एह्येहि सुदंष्ट्रतोरण इत्यादि । ' अग्न आयाहि ' इत्यावाहनम् ।

उत्तरस्यां दिशि तथा विकटं नाम तोरणम् ।
महावीर्यं महाकायं शुद्धस्फटिकसन्निभम् ॥
तत्र द्वारि स्थितः शैलो हिमवांश्च महाद्युतिः ।

एह्येहि विकटतोरण इत्यादि। 'शं नो देवीः' इत्यावाहनम्। पूर्वादिद्वारनामानि—

पूर्वं द्वारं वितानं स्याद्दक्षिणं पुष्पकं भवेत्।
पश्चिमं तु घनं नाम कामदं चोत्तरं स्मृतम्। इति॥

ततः एह्येहि वितानद्वार इति तत्तन्नामभिश्चतुर्द्वारावाहनं कार्यम्। अथ कुङ्कुमपुष्पधूपदीपनैवेद्यबलीनादाय पूर्वभागे सुभद्राय ऋग्वेदमूर्तये इन्द्रदैवत्याय माल्यवत्पर्वतसहिताय वितानाख्यपूर्वद्वाराश्रिताय द्वारपालसहिताय सुप्रभनाम्नेऽश्वत्थतोरणाय नम इति पूजयेद्बलिं च दद्यात्। दक्षिणे शोभनाय यजुर्वेदमूर्तये यमदैवत्याय विन्ध्यपर्वतयुताय पुष्पकाऽऽख्यदक्षिणद्वारमाश्रिताय द्वारपालसहिताय भीमनाम्ने औदुम्बरतोरणाय नम इति। पश्चिमे सुधर्माय सामवेदमूर्तये वरुणदैवत्याय गन्धमादनसहिताय घननामपश्चिमद्वाराश्रिताय सुदंष्ट्रप्लक्षतोरणाय नम इति पूजयेत्। उत्तरे अथर्ववेदमूर्तये सोमदैवत्याय हिमवत्पर्वतसहिताय कामदद्वारमाश्रिताय द्वारपालसहिताय विकटाऽऽख्यवटतोरणाय नम इति पूजयेत्। मण्डपस्तम्भेषु सर्वेभ्यो देवेभ्यो नम इति पूजयेत्। वंशेषु 'किन्नरेभ्यो नमः' पृष्ठे 'पन्नगेभ्यो नमः'। ततः 'क्षेत्रपालाय' मण्डपाधः पूजयेद्बलिं दद्यात्।

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः॥
ब्रह्मा नागश्च पूर्वादिशैलेषु ध्वजनायकाः।

'कुमुदसहिताय पूर्वध्वजाय नमः' इति गन्धादि दद्यात्। एवं कुमुदाक्षसहिताय, इत्यादिदश ध्वजान् सदेवान् पूजयेत्। गुरुर्यजमानसहितः पुष्पधूपौ माषभक्तबलिं चादाय तूर्यनादं कारयेन्मण्डपपूर्वद्वारदेशे।

एह्येहि सर्वामरसिद्धसाध्यै-
रभिष्टुतो वज्रधराऽमरेश।
संवीज्यमानोऽप्सरसां गणेन
रक्षाध्वरं नो भगवन्नमस्ते॥

इतीन्द्रमावाह्य 'इन्द्राय नमः' इति संपूज्य, इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय एष पुष्पादिसहितो माषभक्तबलिर्न ममेति बलिं दद्यात्। एवमाग्नेय्यादिष्वग्न्यादिभ्यः। मन्त्रास्तु—

एह्येहि सर्वाऽमरहव्यवाह मुनिप्रवीरैरभितोऽभिजुष्ट।
तेजोवता लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे नमस्ते ॥
एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित दिव्यमूर्ते।
शुभाशुभानन्दशुचामधीश शिवाय नः पाहि मखं नमस्ते ॥
एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसङ्घैः।
ममाध्वरं पाहि शुभाऽधिनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥
एह्येहि यादोगणवारिधीनां गणेन पर्जन्य सहाप्सरोभिः।
विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥
एह्येहि यज्ञे मम रक्षणाय मृगाऽधिरूढः सह सिद्धसङ्घैः।
प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते ॥
एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम्।
सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥
एह्येहि विश्वेश्वर नः त्रिशूलकपालखट्वाङ्गकरेण सार्धम्।
लोकेन भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥
एह्येहि पातालधरामरेन्द्र नागाङ्गनाकिन्नरगीयमान।
यक्षोरगेन्द्रामरलोकसार्द्धमनन्त रक्षाध्वरमस्मदीयम् ॥
एह्येहि विश्वाधिपते मुनीन्द्र लोकेन सार्द्धं पितृदेवताभिः।
सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवाय ॥

ततः पूर्वस्यां दिशि किञ्चिद्भूमिमुपलिप्य तत्र—

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च ॥
एते ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः।
ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालो गणैः सह ॥
रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः।

त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमस्त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः। देवेभ्यः, दानवेभ्यः, गन्धर्वेभ्यः, यक्षेभ्यः, राक्षसेभ्यः, पन्नगेभ्यः, ऋषिभ्यः, मनुष्येभ्यः, गोभ्यः, देवताभ्यः, ब्रह्मणे, विष्णवे, रुद्राय, क्षेत्रपालाय, गणेभ्यो नम इति संपूज्य माषभक्तबलिं दद्यात्। ततः साचार्यऋत्विक्को यजमानश्चरणौ प्रक्षाल्य वेद्यामुपविश्य षोडशारे

तुलां संस्थाप्य तस्यां दक्षिणप्रान्तादारभ्य सुवर्णादिधातुबन्धेषु सूत्रबन्धेषु वा चतुर्विंशतिदेवता आवाह्य पूजयेत्। ताश्च— ईशः, शशी, मारुतः, रुद्रः, सूर्यः, विश्वकर्मा, गुरुः, अङ्गिरोऽग्निः, प्रजापतिः, विश्वेदेवाः, जगद्विधाता, पर्जन्यशम्भू, पितृदेवताः, सौम्यः, धर्मः, अमरराजः, अश्विनौ, तुलेशः, मित्रावरुणौ, मरुद्गणः, धनेशः, गन्धर्वः, जलेशः, विष्णुः इति। ततस्तिसृषु प्रतिमासु गोविन्दसूर्यधर्मराजानावाह्य संपूज्य गोविन्दप्रतिमां द्वादशाङ्गुलमुक्तादाम्ना सुवर्णशृङ्खलया वा तुलामध्ये च लम्बयेत्। सूर्यधर्मराजौ तु तुलासमीप एव स्थाप्यौ। ततः सर्वे ऋत्विजः शान्तिं पठेयुः। ततो यजमानः कृताधिवासनास्य साङ्गतासिद्धये गुर्वृत्विग्जापकेभ्य इमां दक्षिणां संप्रददे इति शक्त्या दक्षिणां कुण्डलोपवीतकटकाङ्गुलीयवासांसि च दद्यात्। द्विगुणं गुरवे। तद्दिने यजमानगुर्वृत्विग्द्वारपालानामुपवासोऽशक्तौ नक्तम्। जागरश्च नृत्यगीतादिना। एवं पूर्वेद्युरशक्तौ सद्यो वाऽधिवासनं कृत्वा परेद्युः कृतनित्यकर्मा यजमानः स्वस्ति वाचयेत्। ऋत्विजः पूर्ववत्स्वस्वकुण्डे पूर्णाहुतिं स्वस्वशाखया जुहुयुः कर्मशेषं समापयेयुश्च। अत्र ब्रह्मदक्षिणा पूर्णपात्ररूपा नास्ति। 'अधिवासनदक्षिणातुलाद्रव्यदानेनान्यतिसद्धेः' इति पितामहचरणानामाशयः। ततो ऋत्विजः पुत्रपत्नीयुतं यजमानं प्राङ्मुखमुदङ्मुखं वा कुण्डद्वारग्रहसमीपस्थकलशोदकैरभिषिञ्चेयुः स्वस्वशाखीयैर्मन्त्रैः पौराणैश्च। ते तु प्रदर्शिताः 'सुरास्त्वाम्' इत्यादयः। यजमानस्तु सर्वौषध्यनुलिप्तः स्नात्वा शुक्लमाल्याम्बरधरः पुष्पाञ्जलिं गृहीत्वा सफलकां तोरणाऽवलम्बितां तुलां त्रिः प्रदक्षिणीकृत्यानुमन्त्रयेत्।

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता।
साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥
एकतः सर्वसत्यानि तथाऽनृतशतानि च।
धर्माधर्मकृतां मध्ये स्थापिताऽसि जगद्धिते॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते॥
योऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः।
स एषोऽधिष्ठितो देवि त्वयि तस्मान्नमो नमः॥

ततः—

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक।
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात्॥

इति तत्प्रतिमामनुमन्त्र्य सतुलं गोविन्दं संपूज्य पुनस्तं प्रदक्षिणीकृत्य सखड्गचर्मकवचालंकृतौ हैमौ धर्मराजसूर्यौ तयोर्वामदक्षिणकराभ्यामादाय तुलामध्यावलम्बितं गोविन्दं पश्येत्। तुलोत्तरशिक्य आरुह्योपविशेत्तत्र प्राङ्मुखः।

मात्स्ये—

ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः।
समादभ्यधिकं यावत्काञ्चनं चातिनिर्मलम्॥
पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नराधिप।

यत्तु 'पूर्वं द्रव्यन्यासः पश्चात्तदारोहणम्' इति गोपथे तन्नानापुराणवचनविरोधात् अथर्वशाखीयविषयम् इति दानसौख्यादौ। गोदोहं यावत्स्थित्वैतदुदीरयेत्।

नमस्ते सर्वभूतानां साक्षिभूते सनातनि।
पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥
त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम्।
सर्वभूतात्मभूतेशे नमस्ते सर्वधारिणि। इति॥

वह्निपुराणे तु मुहूर्तमात्रावस्थानमुक्त्वा—

जपेन्मन्त्रांस्तु पौराणान्पुनन्तु नेति च तृचम्।
यथा पवित्रमतुलमपत्यं जातवेदसः॥
तथा स्वेन पवित्रेण सुवर्णं तु पुनातु माम्॥
रुद्रस्य सुमहत्तेजः कार्तिकेयस्य संभवः।
यथाग्निर्देवताः सर्वाः सुवर्णं च तदात्मकम्॥

तथा—

यत्कृतं मे स्वकायेन मनसा वचसा तथा।
दुष्कृतं यत्सुवर्णस्थं यातु मुक्तिं परां शुभाम्। इति॥

मात्स्ये—

ततोऽवतीर्य गुरवे पूर्वमर्द्धं निवेदयेत्।
ऋत्विग्भ्योऽपरमर्द्धं च दद्यादुदकपूर्वकम्॥
गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत्।

अत्रेत्थं प्रयोगः। वेदिपश्चिमत उपविश्य सुवर्णादिकुशोदकेन प्रोक्ष्य जलाक्षतकुशानादाय मासपक्षतिथ्याद्युल्लिख्य 'एकैकमन्वन्तरकाल इत्यादिराजराजत्वकामोऽहम्' इत्यन्तं प्रागुक्तं महाप्रयोगमुक्त्वा

पापक्षयकामो वा विष्णुप्रीतिकामो वा इत्याद्युल्लिख्यामुकगोत्रायामुकशर्मणे गुरवेऽमुकशर्मेदं तुलापुरुषसुवर्णार्द्धमग्निदैवतं संप्रददे न मम इति गुरवेऽर्द्धं सुवर्णं दद्यात् । एवमपरार्द्धमृत्विग्भ्यः । दानसागरादिमते तु वरणक्रमेणाऽऽचार्यकराधःस्थितोत्तानकरेभ्यः सर्वेभ्यो युगपदेव गोत्राद्युच्चारपूर्वकमुत्सृज्याऽऽचार्यादिभ्यो यथाविभागं प्रतिपादयेत् । 'अदक्षिणं तु यद्दानं तत्सर्वं निष्फलं भवेत्' इत्युक्तत्वादत्र दक्षिणापेक्षया 'गुरवे ग्रामरत्नादि' इति श्रुतं दक्षिणात्वेनान्वेति । ग्रामरत्नदक्षिणाऽपि क्षत्रियकर्तृके दाने । अन्यकर्तृके तु सुवर्णदक्षिणा इति हेमाद्रिः । ततः पुनर्मासाद्युल्लिख्य 'कृतैतत्तुलापुरुषमहादानप्रतिष्ठासिद्ध्यर्थं शतं सुवर्णदक्षिणाग्रामरत्नानि गुर्वृत्विग्भ्योऽहं संप्रददे' इति तद्धस्ते जलं क्षिपेत् । पश्चादाचार्यादिभ्यो भागशः प्रतिपादयेत् ।

रूपनारायणादयस्तु 'गुरवेऽर्द्धदानानन्तरं सुवर्णमात्रं दक्षिणां दत्त्वा पुनस्तेभ्योऽष्टऋत्विग्भ्योऽर्द्धदानानन्तरमेकैकं सुवर्णं दक्षिणां दद्यात्' इत्याहुः । अन्ये तु, 'अन्येषामपि तुलाद्रव्यदानानुज्ञार्थं ग्रामरत्नानि निवेदयेत्' दक्षिणा तु 'सर्वेषामेव दानानाम्' इति सामान्यन्यायेन सुवर्णं तत्रापि सङ्ख्याकाङ्क्षायां गोपथोक्तसहस्रसङ्ख्यान्वयः, सोऽपि कृष्णलादिभिर्निर्वाह्य इत्याहुः ।

अत्र दानसारे त्रयः पक्षाः । आद्येऽर्द्धं गुरवेऽर्द्धमृत्विग्भ्य इति । तत्र 'अदक्षिणं तु यद्दानं तत्सर्वं निष्फलं भवेत्' इति वचनाद्दक्षिणापेक्षायां 'गुरवे ग्रामरत्नादि' इत्युक्तम् । जापकेभ्यः पुनरन्यद्द्रव्यं देयम् । तेषु ऋत्विक्त्वाभावात् । द्वितीयस्तु 'प्राप्य तेषामनुज्ञां तु तथाऽन्येभ्योऽपि दापयेत्' इति । तत्र गुरवे तुलाद्रव्यस्याऽर्द्धश्चतुर्थो वांशः । तुलाविकृतिभूते धरादाने धरार्द्धं तु चतुर्भागं गुरवे तु निवेदयेदिति श्रुतमत्रापि परिमाणापेक्षायाऽन्वेति । सत्रोक्तेर्वाद्विपादिव्यवस्था ज्योतिष्टोमे, येन वा तुष्यते गुरुरिति सामान्योक्तं वा । दीनानाथविशिष्टादीन्पूजयेद् ब्राह्मणैः सहेत्यनेन तृतीयः पक्षः । तत्रापि गुरवे दाने द्वितीयपक्षोक्तैव व्यवस्थेति 'विशिष्टा ब्राह्मणा अपि' । अनयोः पक्षयोर्जापकादिभ्योऽप्येतन्मध्यस्थसुवर्णदाने न क्षतिरिति । अत्र पक्षत्रयेऽपि 'गुरवे ग्रामरत्नादि' । 'सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते' इत्यादिनोक्तं सुवर्णमेव प्रत्येकं समुदायेन वा देयमिति ।

मदनरत्ने 'गुर्वृत्विगनुज्ञयाऽन्येभ्योऽपि देयम्' इति द्वितीयपक्षे 'तुलाद्रव्यं त्रेधा विभज्यैकोंऽशो गुरवे देयोऽन्य ऋत्विग्भ्यः, परो द्वारपालेभ्यो दीनानाथेभ्यश्च'। तृतीयपक्षे तु 'एतत्तुलितसुवर्णं गुरवे ऋत्विग्भ्यो द्वारजापकेभ्योऽन्येभ्यश्च दीनानाथेभ्यो ब्राह्मणेभ्यश्च दातुमहमुत्सृज्य' इत्युत्सृज्य दद्यात्। सर्वपक्षे 'दक्षिणा गुर्वृत्विग्भ्य एव नान्येभ्यः' इत्युक्तम्। अत्र 'प्रतिग्रहे ब्राह्मणे यजमाने सप्रणवं स्वस्तीति शब्दमुच्चैः पठेयुः। क्षत्रिये निरोङ्कारं मन्द्रम्। वैश्ये उपांशु। शूद्रे मनसा। ततो द्रव्यं स्पृष्ट्वा स्वशाखोक्तां कामस्तुतिं पठेत्' इति रूपनारायणीये। अथर्वणानां तु 'क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते भूमिस्त्वा प्रतिगृह्णात्वन्तरिक्षमिदं महत्। माऽहं प्राणेन मात्मना प्रजया प्रतिगृह्य विराधिषीय' इति। ततः सहस्रं विप्रान्भोजयेत्सङ्कल्पयेद्वा। ततः पुण्याहवाचनं कृत्वा स्थापितदेवतापूजनं कुर्याद्यजमानः। गुरुस्तु 'यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च' इत्याद्युक्त्वा पीठादिदेवता विसर्जयेत्। ततः मण्डपादिसामग्रीमाचार्याय प्रतिपादयामि, इत्युक्त्वा गुरुसात्कुर्यात्। मात्स्ये—

न चिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः।
तिष्ठेद्भयावहं यस्माच्छोकव्याधिकरं नृणाम्॥
शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलम्। इति॥

इति तुलापुरुषदानविधिः।

अथ रजतादितुलाविधिः।

भविष्योत्तरे—

अनेनैव विधानेन केचिद्रूप्यमयं पुनः।
कर्पूरेण तथेच्छन्ति केचिद्ब्राह्मणपुङ्गवाः॥

अनेनेति मुख्यतुलापुरुषदानकथितेनेत्यर्थः। रजतादितुलापुरुषफलं च—

यत्पापं स्वकुले जातं त्रिःसप्तपुरुषैः कृतम्।
तत्सर्वं नश्यति क्षिप्रमग्नौ तूलं यथा तथा॥

इत्यादिना गोपथब्राह्मणादौ पापविशेषक्षयसूर्यलोकावाप्त्यादिरूपमुक्तम्।

तथा सिततृतीयायां नार्यः सौभाग्यदास्तुलाः ।
कुङ्कुमेन प्रयच्छन्ति लवणेन गुडेन वा ॥
न तत्र मन्त्रा होमो वा एवमेव प्रदापयेत् ।

विश्वामित्रः—

आदित्ये राहुणा ग्रस्ते सुवर्णैस्तोलयेत्तनुम् ।
सोमग्रहे तु रौप्येण यथा दानं तथा शृणु ॥
प्रवर्ग्यस्य मुखे युक्त उत्पन्नः पक्षिदेहतः ।
सर्वपापहरायैतद्ददामि प्रीयतां विधुः ॥
इत्युच्चार्य जलं त्वप्सु निक्षिपेद्द्विजसत्तमः ।
प्रीयन्तां पितरः कांस्ये ताम्रे चैव पितामहः ॥
लवणे सिन्धुजे लक्ष्मीः प्रीयतां पार्वती गुडे ।
गन्धैर्गुडैर्वा वासोभिः सौभाग्यं लवणे परम् ॥
प्रीयतां विश्वधात्रीति दानमंत्रोऽभिधीयते ।
तुलापुरुषतो राजन्याति तत्परमं पदम् ॥
सर्वपापविशुद्धात्मा मुक्तिं यात्यपुनर्भवाम् ।

अत्र 'सर्वपापहरायैतदभिप्रीयतां विधुरिति रूप्ये । पितरः प्रीयन्तामिति कांस्ये । गन्धगुडवासस्तुलायां पार्वती । लवणे विश्वधात्री ।

आत्मतुल्यं सुवर्णं वा रजतं रत्नमेव वा ।
यो ददाति द्विजाग्र्येभ्यस्तस्याप्येतत्फलं भवेत् ॥

इत्युक्तत्वाद्रत्नतुलायामपि सुवर्णतुलाफलमेव । इति कर्तव्यताऽपि सैवेति केचित् ।

इति रूप्यादितुलापुरुषः ।

अथ नानारोगघ्नादिस्तुलाविधिः ।

गारुडे—

तुलापुरुषदानस्य शृणु मृत्युञ्जयोदकम् ।
अथ लोहं प्रदातव्यं सर्वरोगोपशान्तये ॥
कांस्यं च यक्ष्मके देयं त्रपुं चार्शोविकारके ।
अपस्मारे च सीसं स्यात्ताम्रं कुष्ठे सुदारुणे ॥
पित्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः ।
सौवर्णं सर्वरोगेषु प्रदद्यान्मृत्युनोदनम् ॥

फलोद्भवं तथा देयं ग्रहणीदारुणे रुजि ।
गौडं भस्मकरोगे च पौगं तु गण्डमालके ॥
जाङ्गलं चाग्निमान्द्ये च रोमोत्पाते तु पौष्यकम् ।

जाङ्गलं काष्ठजम् ।

मधूद्भवं तथा देयं कासश्वासजलोदरे ।
घृतोद्भवं तथा देयं छर्दिरोगोपशान्तये ॥
क्षीरं पित्तविनाशाय दाधिकं भगवारणे ।
लावणं वेपनाशाय पैष्टं दद्रुविनाशने ॥
अन्नं च सर्वरोगस्य नाशने स्मृतमेव च ।

अत्र तत्तत्तुलादाने तास्ताऽधिदेवताः पूज्याः । ताश्च गारुडे—लोहे महाभैरवः। कांस्येऽश्विनौ पूषा च । सीसके वायुः । ताम्रे सूर्यः। पैत्तले कुजः । रौप्ये पितरः । सुवर्णे सर्वदेवताः । फले सोमः । गुडे आपः । ताम्बूले विनायकः । कुसुमे गन्धर्वाः । जाङ्गलेऽग्निः । मधुनि यक्षः । घृते मृत्युञ्जयः । क्षीरे तारागणाः । दध्नि सर्पाः । पिष्टे प्रजापतिः । अन्ने सर्वदेवता इति ।

अथ घृतादितुलाविधिः ।

विष्णुधर्मोत्तरे—

पुण्यं दिनमथासाद्य तृतीयायां विशेषतः ।
गोमयेनानुलिप्तायां भूमौ कुर्याद्धटं शुभम् ॥
दारवं शुभवृक्षस्य चतुर्हस्तं प्रमाणतः ।
सुवर्णं तत्र बध्नीयात्स्वशक्त्या घटितं घटे ॥
सौवर्णं स्थापयेत्तत्र वासुदेवं चतुर्भुजम् ।
शिक्यद्वयं तु बध्नीयात्स्थापयेत्पिटके ततः ॥
तत्रारुहेत्सवस्त्रास्त्रः पुष्पालङ्कारभूषितः ।
अभीष्टां देवतां गृह्य स्नापयित्वा घृतादिभिः ॥
तुलादानस्य सर्वस्य विधिरेष प्रकीर्तितः ।
प्रथमा तु घृतस्योक्ता तेजोवृद्धिकरी तुला ॥
माक्षिकेण तु सौभाग्यं तैलेन बहुलाः प्रजाः ।
वस्त्रस्य दिव्यवस्त्राणां प्राप्नोति तुलया ध्रुवम् ॥
लवणस्य तु लावण्यमरोगित्वं गुडस्य तु ।
असामान्यं शर्करया सुरूपं चन्दनेन च ॥

अवियुक्ता भवेद्भर्त्रा तुलया कुङ्कुमस्य च ।
न संतापो हृदि भवेत्क्षीरस्य तुलया सदा ॥
सर्वकामप्रदाः सर्वाः सर्वपापक्षयङ्कराः ।
यो ददाति तुलाः सर्वाः स गौर्यालयमाप्नुयात् ॥
मन्त्रेण दद्यादभिमन्त्रितां तु सकृत्तुलामेकतमां द्विजेभ्यः ।
स याति गौर्याः सदनं सुपुण्यं न शोकदौर्गत्यमुपाश्नुते पुमान् ॥
त्वं तुले सर्वभूतानां प्रमाणं परिकीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥
इत्यारुह्य क्षणं स्थित्वा चिन्तयित्वा हरप्रियाम् ।
अवरुह्य ततो दद्यादर्घ्यपाद्यमथापि वा ॥
गुरुं संपूज्य विधिवत्सर्वालङ्कारभूषणैः ।
विसर्जयेन्नमस्कृत्य भोजयित्वा विधानतः ॥
शेषं द्विजेभ्यो दातव्यं स्त्रीभ्योऽन्येभ्यस्तथैव च ।
इष्टबन्धुविशिष्टानामाश्रितानां कुटुम्बिनाम् ॥
कदलीदलसंस्थां तु पञ्चपिण्डां हिमाद्रिजाम् ।
कर्पूरस्य तुलां पूज्य कुङ्कुमेन लभेत्तु ताम् ॥
गुडं वा यदि वा खण्डं लवणं वाऽपि तोलितम् ।
यो दद्यादात्मना तुल्या नारी वा पुरुषोऽपि वा ।
पुमान्प्रद्युम्नवत्स स्यान्नारी स्यात्पार्वतीसमा ॥
तुलादानस्य सर्वस्य विधिरेष उदाहृतः ॥

इति रूप्यादितुलादानविधिः ।

अथ रूप्यादितुलादानप्रयोगः ।

अत्र कस्मिंश्चित्पुस्तके भिन्नानुपूर्वी दृश्यते सा चेत्थम् । अथ सुवर्णभिन्नद्रव्याणां तुलादानप्रयोगः । तत्र द्रव्यभेदेन फलभेदः । तत्र रूप्येण तुलायां सुवर्णतुलाफलमेव । इति कर्तव्यताऽपि पक्षे सैव । रत्नतुलायामपि तदेव फलम् । रूप्येण प्रदरमेहनाशोऽपि । पित्तलेन रक्तपित्तनाशः । ताम्रेण कुष्ठनाशः । कांस्येन यक्ष्मनाशः । त्रपुणाऽर्शोनाशः । सीसेनापस्मारनाशः । लोहेन सर्वरोगनाशः । घृतेन छर्दिनाशस्तेजश्च । गुडेन भस्मकसर्वरोगनाशः सौभाग्यं च । अत्र च योगसिद्ध्यधिकरणन्यायेनैकस्मात्प्रयोगादेकमेव फलम् । अत एकस्मिन्प्रयोग एकस्यैवोल्लेखः । एवमग्रेऽपि

द्वित्रिफलोक्तौ ज्ञेयम्। लवणेन सौभाग्यं लावण्यं च। मधुना सौभाग्यं कासश्वासजलोदरनाशश्च। तैलेन प्रजाप्राप्तिः। क्षीरेण पित्तनाशः सन्तापनिवृत्तिश्च। दध्ना भगन्दरनाशः। शर्करयाऽसापत्न्यम्। अन्नेन सर्वरोगनिवृत्तिः। पिष्टेन दद्रुनाशः। आम्रादिफलेन सङ्ग्रहणीनाशः। पूगफलैर्गण्डमालानाशः। कुङ्कुमेन सौभाग्यम्। तिलैः पापनाशः। पुष्पैर्बहुरोगनाशः। ताम्बूलेन मुखसौगन्ध्यम्। चन्दनेन सौन्दर्यम्। गन्धेन सौभाग्यम्। वस्त्रैः सौभाग्यं वस्त्रप्राप्तिश्च। काष्ठैरग्निमान्द्यनाशः। सर्वैर्विष्णुप्राप्तिर्वा। इति फलोद्देशः॥ अथ तत्तद्द्रव्यदेवताः। रूप्यस्य पितरः। रत्नानां विष्णुः। पित्तलस्य भौमः। ताम्रस्य सूर्यः। कांस्यस्य पूषाश्विनौ। त्रपुणो विष्णुः। सीसस्य वायुः। लोहस्य महाभैरवः। घृतस्य मृत्युञ्जयः। गुडस्याऽऽपः। लवणस्य विश्वधात्री। मधुनो यक्षः। तैलस्य विष्णुः। क्षीरस्य तारागणः। दध्नः सर्पाः। अन्नस्य सर्वदेवताः। पिष्टस्य प्रजापतिः। फलानां सोमः: पूगफलानामपि सोमः। कुङ्कुमस्य गौरी। तिलानां विष्णुः। पुष्पाणां गन्धर्वाः। ताम्बूलस्य विनायकः। चन्दनस्य गन्धस्य च गन्धर्वाः। वस्त्राणां बृहस्पतिः। काष्ठानां वनस्पतिः। इति देवताः। [तत्र रूप्यकर्पूरतुलयोः सुवर्णतुलाफलमेव, इतिकर्त्तव्यताऽपि पक्षे सैव। रत्नतुलायामपि तदेव फलम्। फलेषु रोगेषु च विशेष इति केचित्। तत्र वस्त्रे गन्धे कुङ्कुमे लवणे गुडे मधुनि च सौभाग्यम्। वस्त्रेषु वस्त्रप्राप्तिश्च। लवणे लावण्यं च। कुङ्कुमे भर्त्रेऽवियोगश्च। तैले बहुलाः प्रजाः। सर्वरोगेषु लोहम्। यक्ष्मणि कांस्यम्। अर्शःसु त्रपुः। अपस्मारे सीसम्। कुष्ठे ताम्रम्। रक्तपित्ते पित्तलम्। प्रदरमेहयो रूप्यम्। सर्वरोगेषु मृत्युनिवारणार्थं च सुवर्णम्। ग्रहण्यां फलम्। भस्मके सर्वरोगेषु च गुडः। गण्डमालासु पूगफलम्। अग्निमान्द्ये काष्ठम्। वायुजे रोमनाशे पुष्पम्। कासश्वासजलोदरेषु मधु। छर्दौ घृतं तेजोवृद्ध्यर्थं च। पित्ते क्षीरं सन्तापनिवृत्त्यर्थं च। भगन्दरे दधि। कम्पे लवणम्। दद्रुणि पिष्टम्। सर्वरोगेष्वन्नम्। शर्करयाऽसापत्न्यम्। चन्दने सौन्दर्यम्। सर्वासु वा तुलासु सर्वाणि फलानि। अत तत्तत्फलकामस्य तत्तद्रोगनिवृत्तिकामस्य वा तत्तद्द्रव्यतुला ज्ञेया।

अथ तत्तद्द्रव्येषु देवताः। लोहे महाभैरवः। कांस्ये पूषाऽश्विनौ च। सीसे वायुः। ताम्रे सूर्यः। पित्तले कुजः। रूप्ये पितरः। सुवर्णे सर्वदेवताः। फले सोमः। गुडे आपः। ताम्बूले विनायकः। पुष्पे

गन्धर्वाः । काष्ठेष्वग्निः । मधुनि यक्षः । घृते मृत्युञ्जयः । क्षीरे तारागणः । दध्नि सर्पाः । पिष्टे प्रजापतिः । अन्ने सर्वदेवताः ।]

तुला तु शाकेङ्गुदीदेवदारुश्रीपर्णीबिल्वकदम्बकाञ्चनादिकाष्ठमयी सार्द्धचतुरस्रहस्ता दशाङ्गुलसूत्रवेष्टनस्थूला वर्तुला प्रान्तयोर्मध्ये च षडङ्गुलमिता चतुरस्रा कार्या । तस्याः षडङ्गुलयोरन्तरयोरधोभागे बडिशाकृतिकटकद्वयं निवेश्यम् । मध्ये चोर्ध्वभागे एकं तस्याः समान्तराश्चतुर्विंशतिबन्धा धातुमया निवेश्याः । एकं फलकद्वयमपि पञ्चचतुःसार्द्धत्रिप्रादेशमितं व्यासवृत्तं चतुरस्रं वा पञ्चचतुरुयङ्गुलोच्छ्रितप्रान्तबन्धनार्थं त्रिभिश्चतुर्भिर्वा कटकैर्युतं कार्यम् ।

अथ सांप्रदायिकः प्रयोगः । अथ कर्ता मासपक्षाद्युल्लिख्य अमुककामोऽमुकरोगनिवृत्तिकामः सर्वत्र 'गौरीसदनसुपुण्यप्राप्तिशोकदुर्गतिनिवृत्तिकाम ईश्वरप्राप्तिकामो वाऽमुकतुलादानं करिष्ये इति सङ्कल्प्य गणेशपूजाचार्यवरणतत्पूजनानि कुर्यात् । स्वस्तिवाचनमातृकापूजनाभ्युदयिकश्राद्धान्यपीति केचित् । तत आचार्यो दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य करिष्यमाणतुलादाननिर्विघ्नतासिध्यर्थं गणपतिपूजनं स्वस्तिवाचनं च करिष्ये इति सङ्कल्प्य गणेशपूजनं कृत्वा स्वस्तिवाचनं ब्राह्मणैर्वाचयित्वा पुनर्देशकालौ स्मृत्वा पूर्वोक्ततत्तद्द्रव्येषु तां तां कामनां रोगनाशं चोल्लिख्य 'अमुकफलकामोऽमुकद्रव्यतुलादानं करिष्ये' इति सङ्कल्पयेत् । सर्वत्र 'विष्णुप्रीतिकामो वा' 'अस्मिन्कर्मण्याचार्यकर्म कर्तुमाचार्यं त्वां वृणे' इत्याचार्यं वृत्वा गन्धालङ्कारादिभिः पूजयेत् । तत आचार्यः–यदत्रसंस्थितं भूतम्० इति सर्षपान्विकीर्य, 'शुची वो हव्या' इति तृचेन, 'एतोन्विन्द्रम्' इति तृचेन, 'आपो हिष्ठा इत्यादिभिः कर्मभुवं संप्रोक्ष्य, 'स्वस्त्ययनं तार्क्ष्यमिति मन्त्रद्वयं जप्त्वा पूर्वोक्तां महाभैरवादिकां तत्तद्द्रव्यदेवतां गोविन्दं सूर्यं धर्मराजं च प्रतिमाचतुष्टयं संपूज्य तुलां गन्धादिभिरलङ्कृत्य तस्यां धातुमयेषु सूत्रमयेषु वा चतुर्विंशतिबन्धेषु देवतास्तत्तन्नामभिश्चतुर्थ्यन्तनमोऽन्तैरावाह्य पूजयेत् । ताश्च ईशः १ शशी २ मारुतः ३ रुद्रः ४ सूर्यः ५ विश्वकर्मा ६ गुरुः ७ अङ्गिरोग्नी ८ प्रजापतिः ९ विश्वेदेवाः १० जगद्विधाता ११ पर्जन्यशम्भू १२ पितृदेवताः १३ सौम्यः १४ धर्मः १५ अमरराजः १६ अश्विनौ १७ तुलेशः १८ मित्रावरुणौ १९ मरुद्गणाः २० धनेशः २१ गन्धर्वः २२ जलेशः २३ विष्णुः २४ इति । ततस्तुला-

मुत्तरङ्गादिषु बद्ध्वा फलकद्वयं तथाऽवलम्बयेद्यथा भूमेर्वितस्तिमात्रमुच्चं भवेत्। गोविन्दप्रतिमा च हेमशृङ्खलया मुक्तादाम्ना सूत्रान्तरेण वा द्वादशाङ्गुलेन तुलामध्येऽवलम्बनीया। ततो यजमानः पुष्पाञ्जलिं गृहीत्वा तुलां त्रिःप्रदक्षिणीकृत्यानुमन्त्रयेत्।

नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता।
साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥
एकतः सर्वसत्यानि तथाऽनृतशतानि च।
धर्माधर्मकृतां मध्ये स्थापिताऽसि जगद्धिते॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते॥
योऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशतिः।
स एषोऽधिष्ठितो देवि त्वयि तस्मान्नमो नमः। इति॥
नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक।
त्वं हरे तारय त्वस्मानस्मात्संसारसागरात्॥

इति गोविन्दमनुमन्त्र्य पुनस्तुलां गोविन्दं च संपूज्य पुनः प्रदक्षिणीकृत्य सूर्यं दक्षिणे करे धर्मराजं च वामे आदाय तुलावलम्बितं गोविन्दं पश्यन्नुत्तरशिक्ये प्राङ्मुख उपविशेत्। ततोऽपरे शिक्ये आचार्यादयो द्रव्यं न्यसेयुः। ततो मुहूर्तं गोदोहनमात्रं वा स्थित्वा पठेत्—

नमस्ते सर्वभूतानां साक्षिभूते सनातनि।
पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥
त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम्।
सर्वभूतात्मभूतेशे नमस्ते सर्वधारिणि। इति॥

ततोऽवतीर्य देशकालौ स्मृत्वा अमुकफलकामोऽमुकरोगनिवृत्तिकामः सर्वत्र गौरीसदनपुण्यप्राप्तिशोकदुर्गतिनिवृत्तिकाम ईश्वरप्रीतिकामो वा इदमात्मसमतोलितममुकद्रव्यममुकदैवतमाचार्याय ब्राह्मणेभ्यश्च संप्रददे इति दद्यादेतैर्मन्त्रैः।

[ते च—

अगम्यागमनं चैव परदाराभिमर्शनम्।
रौप्यस्यास्य प्रदानेन तानि नश्यन्तु मे सदा॥
असुरेषु समुद्भूतं रजतं पितृवल्लभम्।
तस्मादस्य प्रदानेन रुद्रः संप्रीयतां मम॥

इति रजतस्य।

परापवादपैशून्यादभक्ष्यस्य च भक्षणात् ।
तत्प्रजातं च यत्पापं ताम्रदानात्प्रणश्यतु ॥

इति ताम्रस्य ।

यानि पापान्यनेकानि मया कामकृतानि च ।
कांस्यस्यास्य प्रदानेन तानि नश्यन्तु मे सदा ॥

इति कांस्यस्य ।

यानि पापान्यनेकानि मया कामकृतानि च ।
लोहस्य तु प्रदानेन तानि नश्यन्तु मे सदा ॥

इति लोहस्य ।

घृतं गावः प्रसूयन्ते घृतं गोभ्यः प्रतिष्ठितम् ।
घृतमग्निश्च देवश्च घृतं मे संप्रगृह्यताम् ॥
घृतमग्निर्घृतं सोमस्तन्मयाः सर्वदेवताः ।
घृतं प्रयच्छतः प्रीता भवन्त्यखिलदेवताः ॥
आज्यं तेजो यदुद्दिष्टं प्राज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥
आज्यं तेजोमयं चैव आज्यं तेजोमयं सदा ।
तस्मादाज्यप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

इति घृतस्य ।

तथा रसानां प्रवरः सदैवेक्षुरसो मतः ।
मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा ॥

इति गुडस्य ।

यस्मादन्नरसाः सर्वे लवणेन विनाऽपि हि ।
अस्वादवस्तुतद्दानादतः शान्तिं प्रयच्छ मे ॥

इति लवणस्य ।

यस्मात्पितॄणां श्राद्धे च पीतं मध्वमृतोपमम् ।
तस्मात्तस्य प्रदानेन रक्ष मां दुःखसागरात् ॥

इति मधुनः ।

तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमाङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे ॥

इति तैलस्य ।

अलक्ष्मीवारणं नित्यं सुसौभाग्यविवर्धनम् ।
क्षीरमङ्गलमायुष्यमतः शान्तिं प्रयच्छ मे ॥

इति क्षीरस्य ।

कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परम् ।
दधि तुभ्यं प्रदास्यामि बलं पुष्टिं च देहि मे ॥

इति दध्नः ।

अमृतस्य कुलोत्पन्ना इक्षुधारा हि शर्करा ।
सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥

इति शर्करायाः ।

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माऽखिलत्राणमस्तु मे जन्मजन्मनि ॥

इत्यन्नस्य ।

पिष्टेऽन्नमन्त्रएव

इदं फलं मया विप्र प्रभूतं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

इति फलस्य ।

यदभूदङ्गसंलग्नं कुङ्कुमादिविलेपनम् ।
पार्वत्याः पार्वतिप्रीत्यै तुभ्यं दास्ये तदक्षयम् ॥

इति कुङ्कुमस्य ।

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानेन सर्वं मे पापं नाशय केशव ॥

इति तिलानाम् ।

ह्लादयन्ति मनो यस्मात्तस्मात्सुरभयः स्मृताः ।
दत्ता ददतु मे नित्यमत्याह्लादं सतीं श्रियम् ॥

इति पुष्पाणाम् ।

ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ।
अस्य प्रदानाद्ब्रह्माद्याः शिवं ददतु पुष्कलम् ॥

इति ताम्बूलस्य ।

चन्दनावासमन्दारसंवेष्टं दारकार्चित ।
चन्दनस्य प्रदानान्मे सान्द्रानन्दकरो भव ॥

इति चन्दनस्य ।

जटामांस्युद्भवां देवीमेणनाभिसमुद्भवाम् ।
भक्त्याऽहं संप्रदास्यामि मम सन्तु मनोरथाः ॥

इति कस्तूर्याः ।

शरण्यं सर्वभूतानां लज्जाया वारणं परम् ।
सुवेषधारित्वं यस्माद्वासः शान्तिं प्रयच्छ मे ॥

इति वस्त्रस्य ।

सोमोद्भवानि दारूणि जातवेदःप्रियाणि च ।
तस्मादेषां प्रदानेन श्रियं देहि विभावसो ॥

इति काष्ठानाम् । इत्येतैर्मन्त्रैस्तत्तद्द्रव्याणि दत्त्वा तत्तद्देवताभ्यः संकल्पयेत् ।

यथा—

अनेन रूप्यदानेन पितरः प्रीयन्तामिति वदेत् ।

तथा—

रत्नैर्विष्णुः । पित्तलेन भौमः । ताम्रेण सूर्यः । कांस्यदानेन पूषाश्विनौ । त्रपुणो दानेन विष्णुः । सीसस्य दानेन वायुः । लोहदानेन महाभैरवः । घृतदानेन मृत्युञ्जयः । गुडदानेनाऽऽपः । लवणदानेन विश्वधात्री । मधुदानेन यक्षाः । तैलदानेन विष्णुः । क्षीरदानेन तारागणः । पूगफलैरपि सोमः । आम्रादिफलैः सोमः । कुङ्कुमदानेन गौरी । तिलदानेन विष्णुः । पुष्पदानेन गन्धर्वाः । ताम्बूलदानेन विनायकः । चन्दनदानेन गन्धदानेन च गन्धर्वाः । वस्त्रदानेन बृहस्पतिः । इन्धनदानेनाऽग्निः । एवं देवताभ्यः सङ्कल्पयेत् । आचार्यादयस्तु कामस्तुतिं पठित्वा गृह्णीयुः । तत आचार्यः पूर्वावाहितदेवतानामुत्तरपूजां कृत्वा 'यान्तु देवगणाः' इति मन्त्रेण विसर्जयेत् । ततो यजमानस्ताः प्रतिमा आचार्याय दद्यात् । आचार्यानुमत्या तोलितं द्रव्यमन्येभ्यो दीनानाथेभ्यो दद्यात् । तत आचार्यादिभ्यो दक्षिणां दत्त्वा भूयसीं च दत्त्वा त्रीन्ब्राह्मणान्भोजयेत् । ततो विष्णुस्मरणं कृत्वाऽच्छिद्रं वाचयित्वा सुहृद्युतस्तुष्टो भुञ्जीत ।] आचार्यस्तु तत्तद्देवतां गोविन्दं सूर्यं धर्मराजमीशादींश्च संपूज्य, 'उत्तिष्ठ ब्रह्मणस्पते' इत्युत्थाप्य, 'यान्तु देवगणाः' इति विसृजेत् । ततो यजमानः प्रतिमादिमाचार्यकरे प्रतिपाद्य त्रीन्विप्रान्संभोज्य भूयसीं दक्षिणां दद्यात् । इति श्रीमीमांसकशङ्करभट्टात्मजनीलकण्ठकृते दानमयूखे रूप्यादितुलादानप्रयोगः ॥

अथ हिरण्यगर्भदानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि हेमदानमनुत्तमम् ।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥
कुर्यादुपोषितस्तद्वच्छ्लोकेनावाहनं ततः ।

उपोषितः उपक्रान्तोपवासः ।

पुण्याहवाचनं कृत्वा तद्वत्कृत्वाऽधिवासनम् ।
ब्राह्मणैरुन्नयेत्कुण्डं तपनीयमयं शुभम् ॥
द्वासप्तत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत् ।
त्रिभागहीनविस्तारं प्रशस्तं मुरजाकृति ॥

'ब्राह्मणैर्गुर्वृत्विग्भिः सह यजमानः' इति रूपनारायणः । ठक्कुरश्च 'तैरेवानयेत्' इति मदनरत्नादौ । कुण्डं हिरण्यगर्भं हेमपङ्कजेति अधोभागमध्यस्थिताष्टदलहेमकमलयुतम् । त्रिभागेति, अष्टाचत्वारिंशदङ्गुलविस्तारम् । मुरजो मृदङ्गः । तदाकृति मध्ये किञ्चित्स्थूलम् इति ठक्कुरः । 'मूलमध्याग्रेषु समम्' इति वाचस्पतिमिश्राः । दानसागरे तु विस्तारमित्यस्याग्रे 'आज्यक्षीराभिपूरितम्' इति पाठः । तत्र तुल्याभ्यामाज्यक्षीराभ्यामेकदेशे पूरितमित्यर्थः । 'अभिरभागे' इत्यभेरेकदेशवाचित्वात् ।

दशास्त्राणि सरत्नानि दात्रं सूची तथैव च ।
हेमनालं सपिटकं बहिरादित्यसंयुतम् ॥
तथैवावरणं नाभेरुपवीतं च काञ्चनम् ।
पार्श्वतः स्थापयेत्तद्वद्धैमं दण्डं कमण्डलुम् ॥

दशास्त्राणि दशखण्डानि । अभ्राणीति वा पाठः । 'तत्र अभ्राकाराणि सुवर्णखण्डानि' इति हेमाद्रिः 'अस्त्राणि' इति दामोदरः, तानि च तत्रैव । 'खड्गश्चक्रशक्तिदण्डपाशध्वजगदाशूलपरशुकुलिशाख्यानि दश । रत्नानि पञ्च प्रसिद्धानि । 'पिटकं मञ्जूषा' इति हेमाद्रिः । 'स्थलाकार उपवेशनपट्टः' इति दामोदरः । 'दात्रं नालच्छेदनार्थम्, सूची कर्णवेधार्था, नाभेरावरणं वस्त्राकारम्, उपवीतमुपल-

थनार्थम्, दण्डकमण्डलू समावर्तनार्थौ, एतानि दशाखण्डादीनि हैमानि' इति हेमाद्रिः। 'नालोपवीतदण्डा एव हैमाः, अन्यत्तु प्रकृत्समेव ग्राह्यम्' इति तु युक्तम्। रत्नेषु सर्वैरप्यहैमत्वाङ्गीकारात्। अत्र 'अस्त्राणीत्यनेन रत्नादिदशकमेवोच्यते' इति दानसागरः। 'दशास्त्राणि च' इति रूपनारायणः। 'दशान्तानि' इति भूपालः। 'दशार्द्धानि' 'इति पाठे रत्नविशेषणं चेदम्। पञ्च रत्नानीत्यर्थः' इति विद्याधरः। आदित्यसंयुतमादित्यप्रतिमायुतम्।

तथा—

पद्माकारं पिधानं स्यात्समन्तादङ्गुलाधिकम्।
मुक्तावलीसमोपेतं पद्मरागदलान्वितम्॥
तिलद्रोणोपरिगतं वेदीमध्ये ततोऽर्चयेत्।

पात्रमुखादेकाङ्गुलेन समन्तादधिकमष्टदलकमलाकारं पिधानं स्यात्। द्रोणः परिभाषायां ज्ञेयः। कुण्डहेममानं तु यावता तदुक्तप्रमाणं संपद्यते तावद्ग्राह्यम्। लैङ्गे तु—

कुर्यात्सहस्रकर्षेण अधःपात्रं हिरण्यतः।
तदर्द्धेनार्द्धपात्रं तु सहस्रेण द्वयं तु वा॥
त्रिपादं वार्द्धपादं वा सपादं सार्द्धमेव वा।
द्विगुणं वा प्रकर्तव्यं यथालाभं तु वा भवेत्॥
सद्वृक्षजं वा तत्कृत्वा स्वर्णपादैस्तु वेष्टयेत्।

इति हेममानमुक्तम्।

ततो मङ्गलशब्देन ब्रह्मघोषरवेण च।
सर्वौषध्युदकेनैव स्नापितो वेदपुङ्गवैः॥
शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः॥

उच्चार्यामन्त्रणमन्त्राः प्रयोगे ज्ञेयाः।

एवमामन्त्र्य तन्मध्ये आविश्यास्त उदङ्मुखः॥
मुष्टिभ्यां संपरिगृह्य धर्मराजचतुर्मुखौ।
जानुमध्ये शिरः कृत्वा तिष्ठेदुच्छ्वासपञ्चकम्॥

तथा—

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।

कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः ॥

गर्भाधानादिग्रहणमनवलोभस्योपलक्षणम् ।

प्रजावज्जीवपुत्राभ्यां सेचनं तच्च आचरेत् ।
दूर्वारसेन कर्तव्यं व्याहृत्या च घृताहुतिः ।

इति हेमाद्रौ वातुलोक्तिः ।

गीतमङ्गलशब्देन गुरुरुत्थापयेत्ततः ।
जातकर्मादिकाः कुर्यात्क्रियाः षोडश चापराः ॥

जातकर्मादिका अपराश्च क्रियाः कुर्यात् । तेन षोडश संपद्यन्ते इत्यर्थः । एवमेव हेमाद्रिरूपनारायणादीनामाशयः । तेन गर्भाधानपुंसवनसीमन्तोन्नयनानवलोभनानि गुर्वाद्यन्यतमः कुर्यात् । ततो गुरुर्यजमानमुत्थापयेत् । ततो जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडोपनयनवेदव्रतचतुष्टयसमावर्तनोद्वाहाः कार्याः । हेमाद्रौ तु जातकर्मादिषु प्राजापत्यैन्द्राग्नेयसौम्यव्रतचतुष्टयगोदानसाहित्येनोद्वाहत्यागेन द्वादशत्वमुक्तम् । जातकर्मादिषु विवाहपितृयज्ञभिन्नपञ्चयज्ञप्रवेशेन श्राद्धत्यागेन च षोडश चापरा इति यथाश्रुतमेव योज्यमिति मदनदामोदरौ । एते च जातकर्माद्याः संस्कारा यजमानशाखयेति तयोराद्यो गुरोः कर्तव्यत्वात्तच्छाखयेति परः । युक्तं तु–'समावर्तनोद्वाहपञ्चयज्ञा यजमानेनैव स्वशाखया कार्याः । इतरे तु गुरुणा यजमानशाखयैव' इति । फलिशाखेतिकर्तव्यतयैव तेषां फलजनकत्वस्य क्लृप्तत्वात् । कर्मान्तरत्वे तु जातकर्मादीनां मानाभावः । सर्वेभ्यः कर्मभ्यो दर्शपूर्णमासावित्यत्रेवाऽऽख्याताभावेन प्रकरणान्तरायोगात् । त्रैधातवीया दीक्षणीयेतिवत्तु तान्येव जातकर्मादीनि दानाङ्गतया विनियुज्यन्ते । कर्मान्तरत्वेऽपि चैतेषां जातकर्मादिविकृतित्वेन फलिशाखीयैवेतिकर्तव्यता प्राप्नोति न गुरुशाखीया तेन गुरुरेव यजमानशाखीयो भवत्यस्मिन्दाने । अध्ययनसिद्धज्ञानवत्त्वात्, अवैगुण्याय । सत्र इव समानकल्पा यजमानाः । ते च संस्कारास्तत्कर्मानुध्यानपूर्वं तत्तत्प्रधानमन्त्रपाठमात्रेण कार्याः । स्त्रीशूद्रकर्तृके मन्त्रवर्जमनुध्यानमात्रम् । तत्र स्त्रिया जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाकर्मविवाहाख्यसंस्कारषट्कम् । तत्राऽपि विवाहः समन्त्रकः । शूद्राणां तु एते षट्पञ्च महायज्ञाश्चेत्येकादशानुध्यानरूपा एव इति सर्वे निबन्धकृतः । शिष्टास्तु त्रैवर्णिककर्तृकेऽप्यमन्त्रकानुध्यानमेवाचरन्ति । युक्तमेव चेदम् । सर्व-

पदार्थत्यागे मन्त्रमात्रपाठे मानाभावात् । न्याय्यं तु स्वरूपत एवाऽनुष्ठानं सर्वेषाम् । यत्तु दामोदरो 'गर्भाधानादीनां कुण्डे विवाहस्य च तत्का-लेऽसंभवात् समन्त्रकानुध्यानमेव कार्यम्' इति तन्न ।

दूर्वारसेन कर्तव्यं सेचनं दक्षिणे पुटे ।
औदुम्बरफलैः सार्द्धमेकविंशत्कुशान्सदा ॥
शक्त्याऽथ तावदेवात्र कुर्यात्सीमन्तकर्मणि ।
अन्नप्राशनके विद्वान्भोजयेत् पायसादिभिः ॥ इति ॥
एवं विश्वजिदन्ताश्च गर्भाधानादिकाः क्रियाः ।
शक्तिबीजेन कर्तव्या ब्राह्मणैर्वेदपारगैः ॥

इति लिङ्गपुराणात् । दक्षिणपुटे अधःपात्रगतरन्ध्रयोर्मध्ये दक्षिण-रन्ध्रे । यत्तु हेमाद्रौ टोडरानन्दे च—'उपरिपात्रगतरन्ध्रयोः' इति । तन्न ।

अधःपात्रे स्मरेद्दिव्यां गुणत्रयसमन्विताम् ।
चतुर्विंशतिकां देवीं ब्रह्मविष्ण्वग्निरूपिणीम् ॥
ऊर्ध्वपात्रे गुणातीतं षट्त्रिंशाख्यमुमापतिम् ।
आत्मानं पुरुषं ध्यायेत्पञ्चविंशकमन्त्रजम् ॥

इति लैङ्गे अधःपात्रस्यैव स्त्रीरूपतोक्तेः । तावदेवेत्येवकारेण अङ्गान्तर-परिसंख्या । 'अत्र ह्येवावपन्ति' इतिवत् । तेन गृह्याग्नेरपि निवृत्तिः ।

उद्वहेत्कन्यकां कृत्वा त्रिंशन्निष्केण शोभनाम् ।
अलंकृत्य तथा हुत्वा शिवाय विनिवेदयेत् ॥

अत्र 'चतुःसौवर्णिको निष्कः' इति केचित् । 'षट्पञ्चाशदधिक-द्विशतपणमितः' इति भास्कराचार्याः । 'दीनारोऽपि च सुवर्णनिष्कः' इत्यमरः । 'सुवर्णपर्यायः' इत्यन्ये । तेषां शक्त्या व्यवस्था । दूर्वारस-सेको यजमानस्य पितरौ तत्स्थानीयं वा मिथुनमानीय तयोरन्य-तरेण कारयेद्गुरुः—

कर्तारं भार्यया युक्तं सर्वालङ्कारशोभितम् ।
आनीय कुर्यात्तत्स्थस्य गर्भाधानादिकाः क्रियाः ॥
भार्यादक्षपुटे दूर्वारससेचनमाचरेत् ।
एकविंशतिसंख्यातानुदुम्बरफलान्वितान् ॥
कुशानानीय शक्त्याऽथ कुर्यात्सीमन्तकर्म च ।

इति कामिकोक्तेः ।

प्रजावज्जीवपुत्राभ्यां सेचनं तत आचरेत् ।
दूर्वारसेन कर्तव्यं व्याहृत्या च घृताहुतिः ॥

इति हेमाद्रौ वातुलोक्तेश्च । प्रजावत्–'आ ते गर्भः' इत्यादि । जीवपुत्रम्–'अग्निरैतु प्रथमः' इत्यादि । सत्यपि वा केषाञ्चिदसंभवेन सर्वेषामनुध्यानं युक्तम् । यत्तु 'अन्नप्राशने भुक्तवतः कर्मानुष्ठानविरोधः' इति सोऽपि हविःशेषभोजनवद्विहितत्वादपास्तः । किञ्च सर्वैरपि प्रयोगे न सर्वे संस्कारमन्त्रा उक्ताः । चौलादौ होममन्त्रा उक्ताः । अथ प्रधानकरणीभूता एव मन्त्रा अभिप्रेतास्ततो गर्भाधाने 'अपनः शोशुचदघम्' इति मूर्द्धाभिमर्शनार्थसूक्ताद्यङ्गमन्त्रस्य । समावर्तने होमसाधनस्य 'ममाग्ने वर्चः' इति सूक्तस्य तत्रैव, 'स्मृतं च मे' इत्यादेर्लिखनं विवाहादौ च भार्यात्वोत्पादकप्रधानभूतहोमसप्तपदीमन्त्राणामलिखनमिति कथमिदं पूर्वापरविरुद्धं प्रमाणशून्यमेतेषां लिखनमादर्तव्यम् । अतः स्वरूपत एव कार्याः सर्वे । तत्र पूर्वादिकुण्डेष्वेव क्रमादृगादिशाखीययजमानसंस्कारप्रधानहोमाः कार्याः । उल्लेखनोपलेपनेध्माधानाघाराज्यभागाः स्विष्टकृदाद्युत्तराङ्गाणि च न कार्याणि । तदुपकाराणां सिद्धत्वात् । पशुतन्त्रान्तःपातिपुरोडाशे प्रयाजानुयाजनाननुष्ठानवत् । प्राशुकैरेव तैरुपकारसिद्धेः । अत्र गर्भाधानादित्रयनिष्क्रमणश्राद्धसहितषोडशसंस्कारपक्षे निष्क्रमणश्राद्धत्यागेन पञ्चयज्ञसाहित्येनोनविंशतिपक्षे वा गर्भाधानसीमन्ते तावत्कर्मान्तरे यावदुक्ते । कामिकलैङ्गादिष्वनेकगुणश्रुतेः प्रधानबाधाच्च । पुंसवनं तु ध्यानमात्रेण कार्यम् । स्वरूपानुष्ठानबाधान्मन्त्रपाठे मानाभावाच्च । तथा ऋक्शाखीयैश्चौल एव 'अग्न आयूंषि' इत्याद्याहुतिचतुष्टयं कार्यं, नोपनयनव्रतचतुष्टयसमावर्तनविवाहेषु । चौलीयैरेवादृष्टैरुपकारसिद्धेः । उपनयने विशेषमाहाश्वलायनः–'अथोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तम् । परिदानकालश्च तत्सवितुर्वृणीमह इति सावित्रीं पूर्वमुपेत उपेतपूर्वस्तस्य पुनरुपनीयमानस्येति यावत् । कृताकृतं वैकल्पिकम् । अनिरुक्तं वर्जितम् । परिदानकालावप्यनिरुक्तौ । परिदानम् 'आदित्याय व्रतपतये बटुं ते ददामि' इति । गायत्र्याः स्थाने 'तत्सवितुर्वृणीमहे' इति ऋच उपदेशः । मनुश्च–

अजिनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च ।
निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि । इति ॥

अन्यत्कार्यम् । विवाहे सप्तपदीक्रमणपरिणयनयोर्निवृत्तिः प्रतिमाया असंभवात् । अन्येष्वपि संस्कारेषु बाधितं लुप्यत इति दिक् । षोडशक्रियाभावात् 'स्त्रीशूद्रयोर्हिरण्यगर्भदाने अनधिकारः' इति केचित् । तन्न ।

नरो वा यदि वा नारी एवं ब्रह्मात्मसंभवम् ।
यः करोति महापुण्यं तस्यापि शृणु यत्फलम् ॥

इति हेमाद्रौ हिरण्यगर्भप्रकरणे विष्णुधर्मोक्तेः स्त्रीणामधिकारावगमात् । आत्मसंभवं हिरण्यगर्भम् । 'स्त्रीशूद्रास्तु सधर्माण' इति वाक्याच्च शूद्रस्येति । तथा 'सूच्यादिकं च गुरवे दत्त्वा मन्त्रमिमं जपेत्' । मन्त्रः प्रयोगे ज्ञेयः ।

चतुर्भिः कलशैर्भूयस्ततस्ते द्विजपुङ्गवाः ।
स्नानं कुर्युः प्रसन्नाङ्गा दिव्याभरणभूषिताः ॥
देवस्य त्वेति मन्त्रेण स्थितस्य कनकासने ।

चतुर्भिः कुण्डसमीपस्थैः कुर्युः कारयेयुः । मन्त्रः प्रयोगे ।

ततो हिरण्यगर्भं च तेभ्यो दद्याद्विचक्षणः ।

अत्रापि सर्त्विगाचार्याणां दानद्रव्यविभागस्तुलापुरुषवदवगन्तव्यः ।

ते पूज्याः सर्वभावेन बहवो वा तदाज्ञया ।
तत्रोपकरणं सर्वं गुरवे विनिवेदयेत् ॥
पादुकोपानहच्छत्रचामरासनभाजनम् ।
ग्रामं वा विषयं वापि यच्चान्यदपि संभवेत् ॥

विषयो ग्रामसमूहः । अन्यद्रत्नादि । ग्रामादिकं च तुलापुरुषवदत्रापि दक्षिणात्वेनान्वेति । अत्राप्यात्मालङ्कारं गुरवे दद्यात् ।

इति हिरण्यगर्भदानविधिः ॥

अथैतत्प्रयोगः ।

देशकालौ सङ्कीर्त्य 'सकलकलिकलुषनिवृत्तिसंभावितनरकनिमग्नपित्रादिपुरुषशतविविधबन्धुपुत्रपौत्रप्रपौत्रादिसमुद्धरणपूर्वकसिद्धसङ्घसेवितत्वोप्सरोगणकरकलितचामरमालावीज्यमानत्वैकैकमन्वन्तरसमयावच्छिन्नसर्वलोकपालपुरनिवासोत्तरकल्पकोटिशतावच्छिन्नब्रह्मलोकमहितत्वकामोऽहं श्वो हिरण्यगर्भदानं प्रतिपादयिष्ये' इति प्रतिज्ञाय तुला-

पुरुषवद्रोविन्दोमापतिविनायकपूजाविप्राज्ञाग्रहणमातृपूजाभ्युदयिकश्राद्धपुण्याहवाचनगुर्वादिवरणमधुपर्कदानमण्डपपूजागुर्वादिविनियोगान्तं कुर्यात् । अत्र गुरुर्यजमानशाखीय एव । ततो गुरुर्वेद्यां षोडशोपरिस्थापिततिलद्रोणोपरि प्रागुक्तहिरण्यगर्भपात्रमृत्विग्भिः सहाऽऽनीय स्थापयेत् । ततः कुण्डमध्ये हैमं पद्मं निधाय कुण्डैकदेशं घृतक्षीराभ्यां पूरयित्वा कुण्डस्य बहिः पार्श्वयोर्दशाखण्डानि, रत्नानि, छुरिकां, सूचीं, हेमनालम्, उपवेशनपट्टं, आदित्यप्रतिमां, नाभेरावरणवस्त्रं, हैमोपवीतं, दण्डं, कमण्डलुमिति स्थापयेत् । ततः 'ॐ नमो हिरण्यगर्भाय' इति सपिधानं हिरण्यगर्भं पूजयेत् । कुण्डसमीपस्थं कुम्भस्थापनग्रहस्थापनादि पूर्णाहुत्यभिषेकान्तं तुलापुरुषवत् । एवमभिषिक्तो यजमानः स्नातः शुक्लवस्त्रालङ्कारादियुक्तो गृहीतकुसुमाञ्जलिः प्राङ्मुखः पात्रमामन्त्रयेत् ।

> नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
> सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः ॥
> भूर्लोकप्रमुखालोकास्तव गर्भे व्यवस्थिताः ।
> ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे ॥
> नमस्ते भुवनाधार नमस्ते भुवनाश्रय ।
> नमो हिरण्यगर्भाय गर्भे यस्य पितामहः ॥
> यतस्त्वमेव भूतात्मा भूते भव्ये व्यवस्थितः ।
> तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥

ततः पात्रे पुष्पाञ्जलिं प्रक्षिप्य समङ्गलघोषं तत्र प्रविशेत् । गुर्वृत्विजस्तु पात्रं पिधानेनाऽऽच्छादयेयुः । यजमानस्तु तत्रोदङ्मुखो दक्षिणवाममुष्ट्योः क्रमाद्धर्मराजचतुर्मुखौ गृहीत्वा जान्वोः शिरः कृत्वोच्छ्वासपञ्चकावच्छिन्नसमयमासीत । ततो गुर्वादिर्यजमानस्य पितरौ तत्स्थानीयमन्यद्वा मिथुनमानीय तद्द्वाराऽधःपात्रगतरन्ध्रयोर्मध्ये दक्षिणरन्ध्रे शक्तिबीजेन दूर्वारसं सेचयेदिति गर्भाधानम् । पुंसवनस्य ध्यानमात्रम् । सीमन्ते गुर्वाद्यन्यतमः सोदुम्बरफलैरेकविंशतिकुशैरधःपात्रे काल्पनिकं सीमन्तं शक्तिबीजेनोन्नीय, 'ॐ आ ते गर्भो योनिम्' इति प्रजावता सूक्तेन, 'ॐ अग्निरेतु' इति जीवपुत्रेण च दूर्वारसं पूर्वोक्ते रन्ध्र आसिच्य ऋक्शाखीयादियजमानक्रमेण प्रागादिकुण्डे समस्तव्याहृतिभिरेकामाज्याहुतिं जुहुयादिति । इदमेवानवलोभनम् । सीमन्तोत्तरं व्यस्यस्तमुत्तमम् । एवमुत्तरसंस्कारेष्वपि तत्र कुण्डेषु होमः । ततो गुरुः शुभलग्ने यजमानमुत्था-

प्याश्वलायनयजमानस्य जातकर्मनामकरणान्नप्राशनचौलोपनयनव्रतचतु-ष्टयानि कुर्यात् । तत्रान्नप्राशने पायसभोजनम् । चौले 'मातुरुत्सङ्गोपवेशनाभावः' इति नारायणः । उपनयने, 'ॐ अग्न आयूँषि' इत्याद्याहुतिचतुष्टयवपनमेधाजननादित्यायि व्रतपतये बटुं ते परिददामि, इति परिदानाजिनमेखलादण्डभैक्षचर्याव्रताचरणाभावः । एवं महानाम्न्यादिव्रतसमावर्तनविवाहेष्वाहुतिचतुष्टयाभावः। गायत्र्याः स्थाने 'ॐ तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि' इत्यृच उपदेशः । अन्यत्तुल्यम् । समावर्तनविवाहौ स्वयं यजमानः कुर्यात् । विवाहस्तु त्रिंशन्निष्कमूल्यसुवर्णघटितप्रतिमया सह । तत्राग्निपरिणयनसप्तपदीक्रमणध्रुवारुन्धतीदर्शनानि निवर्तन्ते । लाजहोमस्तु स्रुचैव । अन्यत्तुल्यम् । श्राद्धं तु यजमान एव कुर्यात् । मदनदामोदरादयस्तु—'पञ्च महायज्ञाः कार्याः, न श्राद्धानवलोभने' इत्याहुः ॥ यजुःशाखीयानां तु जातकर्मादिषु प्राजापत्यमैन्द्रमाग्नेयं सौम्यं चत्वारि वेदव्रतानि निष्क्रमणं चोक्तम् । नामकरणं नोक्तमिति विशेषः । छन्दोगानां तु नामकरणमस्ति, अन्नप्राशनं नास्ति । गोदानव्रतं केशान्तव्रतम् । चत्वारि वेदव्रतानि चेति । अथर्ववेदे जातकर्मनिष्क्रमान्नप्राशनगोदानोपनयनसावित्रव्रतवेदव्रतसावित्रीव्रतविसर्गसमावर्तनविवाहपञ्चयज्ञा उक्ताः । एतेषामनुष्ठानप्रकारस्तत्तच्छाखया बोध्यः । शिष्टास्तु सर्वेषां संस्काराणामनुध्यानमात्रं कुर्वन्ति । ततो यजमानो दशाखण्डादि गुरवेऽर्पयेत् । ॐ नमो हिरण्यगर्भाय इत्यादिप्रागुक्तमन्त्रद्वयेन नमस्कुर्यात् । ततः कुण्डसमीपस्थकलशजलैः 'देवस्य त्वा' इत्यादिना 'अद्य जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम् । दिव्येनानेन वपुषा चिरञ्जीव सुखी भव' इति च मन्त्रेण कनकासनस्थं यजमानमभिषिञ्चेयुः । ततो देशकालौ सङ्कीर्त्य 'सकलेत्यादिमहितत्वकामः' इत्यन्तमुक्त्वा 'तिलद्रोणोपरिस्थमिदं हिरण्यगर्भपात्रं सवितानकं विष्णुदैवतं युष्मभ्यं यथोक्तभागव्यवस्थया संप्रददे, न मम' इत्युक्त्वा पुनस्तथैव देशकालाद्युक्त्वैतद्दानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णादिदक्षिणां गुर्वादिभ्यः संप्रददे इत्युक्त्वा दीनानाथेभ्योऽपि यथाशक्ति दत्त्वा पुण्याहवाचनग्रहपूजाविसर्जनान्तं तुलापुरुषवत्सर्वं कृत्वाऽऽत्मालङ्कारादि गुरवे दद्यात् ॥

इति हिरण्यगर्भप्रयोगः ॥

अथ ब्रह्माण्डम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि ब्रह्माण्डं विधिपूर्वकम् ।
यच्छ्रेष्ठं सर्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं तथा ।
कुर्याद्विंशत्पलादूर्ध्वमासहस्राच्च शक्तितः ॥
शकलद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ।

शकलः खण्डः । उक्तं च ब्रह्माण्डे—

कुम्भच्छायो भवेद्यादृक्प्रतीच्यां दिशि चन्द्रमाः ।
उदितः शुक्लपक्षादौ वपुरण्डस्य तादृशम् ॥

कुम्भच्छायो नाम ग्रीवाहीनकुम्भाभ इत्यर्थः ।

दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम् ।
लोकपालाष्टकोपेतं मध्यस्थितचतुर्भुजम् ॥
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ।
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम् ॥
वितस्तेरङ्गुलशतं यावदायामविस्तरम् ।
कौशेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत् ॥
तथाऽष्टादश धान्यानि समन्तात्परिकल्पयेत् ।

दिग्गजा ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाः । एतल्लक्षणमादित्यपुराणे—

शुभ्राभश्च चतुर्दन्तः श्रीमानैरावतो मतः ।
पुष्पदन्तो बृहत्सामा षड्दन्तः पुष्पदन्तवान् ॥
सामान्यगजरूपेण शेषा दिक्करिणः स्मृताः ।

षडङ्गानि, ‘ शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम् ’ इति ।

तल्लक्षणम्—

सूक्तानि ब्रह्मणो लोके साक्षसूत्राणि तानि तु ।
द्विभुजानि शुभास्यानि वामे दधति कुण्डिकाः ॥

कुण्डिकाः कमण्डलून् । अथाक्षसूत्राणि दक्षिणकरे । तानि च

'पश्चिमे चतुरो वेदाः' इति वाक्यादङ्गानि वेदस्थाने, 'प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति' इति न्यायात्स्थाप्यानि । लोकपालरूपाण्याह विश्वकर्मा—

चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ।
शचीपतिः प्रकर्तव्यो नानाभरणभूषितः ॥
पिङ्गभ्रूश्मश्रुकेशाक्षः पिङ्गाक्षो जठरोऽरुणः ।
छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः ॥
ईषत्पीतो यमः कार्यो दण्डहस्तो विजानता ।
रक्तदृक्पाशभृत्क्रुद्धो निर्ऋतिर्विकृताननः ॥
पुंस्थितः खड्गहस्तश्च भूतवान्राक्षसैर्वृतः ।
वरुणः पाशधृक्सौम्यः प्रतीच्यां मकराश्रयः ॥
धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः ।
दशाश्वरथगः सोमो गदापाणिर्वरप्रदः ॥
पूर्वोत्तरे त्रिनेत्रश्च वृषभस्थस्त्रिशूलधृक् ।
कपालपाणिश्चन्द्रार्कभूषणः परमेश्वरः ॥

उमारूपं देवीपुराणे—

चतुर्भुजा द्विबाहुर्वा द्विनेत्रा वा त्रिलोचना ।
कुण्डलालङ्कृतार्द्धेन्दुशेखराऽऽभरणान्विता ॥
गोरोचनानिभा गौरी स्वस्तिका नवयौवना ।

स्वस्तिका बाहुभ्यां कुचौ पिहितुं कृतस्वस्तिकाकारेत्यर्थः । गौरी च शिववामभागे । रूपनारायणीये तु 'अक्षसूत्रकमण्डलुधराभयहस्ता' इत्युक्तम् । लक्ष्मीरूपं—

पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययोः ।
पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपां च सर्वालङ्कारभूषिताम् ।
रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु ॥

'ऊर्ध्वदक्षिणकरे पाशाक्षमाले । ऊर्ध्ववामे पद्माङ्कुशौ । अधोवामदक्षिणयोर्हैमपद्मवरमुद्रां दधतीति चतुर्हस्तैव' इति दामोदरः ।

वसुरूपं—

प्रसन्नवदनाः सौम्या वरदाः शक्तिपाणयः ।
पद्मासनस्था द्विभुजाः कर्तव्या वरदाः सदा ॥

दामोदरीये निगमे—

आपो ध्रुवश्च सौम्यश्च चरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः । इति ॥
पद्मासनस्था द्विभुजाः पद्मगर्भाभकान्तयः ।
करादिस्कन्धपर्यन्तं नीलपङ्कजधारिणः ॥
अधःसंस्थितमेषादिराशयः प्रावृताङ्गिकाः ।

मेषादिराशिरूपं दामोदरीये 'मेषवृषकर्कटसिंहवृश्चिकमीनाः स्वनाः मानुरूपाः । बाणधरौ दम्पती मिथुनम् । करद्वयधृतसस्यमञ्जरी कुमारी कन्या । तुलाहस्तो नरस्तुला । मृगास्योऽश्वजघनो मकरः । घटशिरा नरः कुम्भः । (१.) 'प्रावृताङ्गिकायोऽजाद्यच्छिन्नचरणः' इति दामोदरः ।

इन्द्राद्या द्वादशादित्यास्तेजोमण्डलमध्यगाः ।

इन्द्रादिनामानि हरिवंशे—

इन्द्रो विष्णुर्भगस्त्वष्टा वरुणोंऽशोऽर्यमा रविः ।
पूषा मित्रो यमश्चैव पर्जन्यो द्वादश स्मृताः । इति ॥

मरुतस्तु—

धावत्कृष्णमृगारूढा वरदा ध्वजधारिणः ।

ऊनपञ्चाशच्छित्रादिप्रतिमाः प्रागुक्ताः । अष्टादश धान्यानि प्रत्येकं द्रोणपरिमितानीति केचित् ।

पूर्वेणानन्तशयनं प्रद्युम्नं पूर्वदक्षिणे ।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदाननिरुद्धमतः परम् ।
अग्निमुत्तरतो हैमं वासुदेवमतः परम् ॥
समन्ताद्गुडपीठस्थानर्चयेत्काञ्चनान्बुधः ।
स्थापयेद्वस्त्रसंवीतान्पूर्णकुम्भान्दशैव तु ॥

अनन्तशयनस्वरूपं विष्णुधर्मोत्तरे—

देवदेवस्तु कर्तव्यः शेषसुप्तश्चतुर्भुजः ।
एकः पादोऽस्य कर्तव्यो लक्ष्म्युत्सङ्गगतः प्रभोः ॥
तथा करश्च कर्तव्यः शेषभोगाङ्कसंस्थितः ।
एकः करोऽस्य कर्तव्यस्तत्र जानौ प्रसारितः ॥
कर्तव्यो नाभिदेशस्थस्तथा तस्यापरः करः ।

१ संशोधनार्थं गृहीतेषु सर्वेषु पुस्तकेषु धनूराशेः स्वरूपं नास्ति ।

नाभिसंभूतकमले सुखासीनः पितामहः ॥
नालग्नौ तु कर्तव्यौ पद्मस्य मधुकैटभौ ।
शङ्खचक्रगदादीनि मूर्तानि परितो न्यसेत् ॥

प्रद्युम्नलक्षणं पञ्चरात्रादिषु—

दक्षिणोर्ध्वकरे पद्मं दद्याच्छङ्खमधःकरे ।
चक्रमूर्ध्वे तथा वामे गदां दद्यात्तथा बुधः ॥
चापेषुधृग्वा प्रद्युम्नो रूपवान्विश्वमोहकः । इति ॥

प्रकृतिर्यद्यप्यव्यक्तरूपिणी, तथापि तत्स्थाने लक्ष्मीप्रतिमा निवेश्या ।
तदुक्तं मार्कण्डेयपुराणे—

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ।
मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्द्धनि ।

सङ्कर्षणरूपं विष्णुधर्मोत्तरे—

वासुदेवस्य रूपेण कार्यः सङ्कर्षणः प्रभुः ।
स तु शुक्लवपुः कार्यो नीलवासा यदूत्तमः ॥
गदास्थाने च मुशलं चक्रस्थाने च लाङ्गलम् ।

वेदलक्षणं महाभूतघटे वक्ष्यते ।
तथा—

कृष्णं चतुर्भुजं दक्षे शरखड्गौ तथोत्तरे ।
धनुःखेटधरं वीरमनिरुद्धं प्रचक्षते । इति नारदीये ॥

अग्निप्रतिमा प्रागुक्ता । वासुदेवप्रतिमाऽपि नारदीये—

वासुदेवः शिवः शान्तः सिताब्जस्थश्चतुर्भुजः ।
योगमूर्द्धोर्द्धशङ्खश्च हृद्देशाऽर्पितहस्तकः ॥
धारयेदुत्तरे चक्रं करे वै दक्षिणे गदाम् । इति ॥

एताश्च प्रतिमाः प्रकृतदानपरिमाणात्पृथक्कार्याः । एतान्गुडपीठस्थानर्चयेत् । पूर्णकुम्भान्स्थापयेदित्यत्र समन्तादित्यनुषञ्जनीयम् ।
तथा—

दशैव धेनवो देयाः सहेमाम्बरदोहनाः ।
पादुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ।

होमाधिवासनान्ते च स्नापितो वेदपुङ्गवैः ॥
इममुच्चारयेन्मन्त्रं त्रिःकृत्वाऽथ प्रदक्षिणम् ।

सद्वेमास्त्वरेति । हेमशृङ्गयः सवत्साः कांस्यदोहनाः । एताश्च दक्षिणार्थमुपकल्प्याः । भविष्ये तु, सुवर्णमेव दक्षिणार्थमुपकल्प्यमित्युक्तम् । इममुच्चारयेदिति । ब्रह्माण्डं त्रिःप्रदक्षिणीकृत्य मन्त्रं पठेत् । तत्र मन्त्रः प्रयोगे ज्ञेयः ।

एवं प्रणम्याऽमरविश्वगर्भं दद्याद्विजेभ्यो दशधा विभज्य ।
भागद्वयं तत्र गुरोः प्रकल्प्यं समं भजेच्छेषमनुक्रमेण ॥

समं भजेच्छेषमिति । गुरोर्भागद्वयं प्रकल्प्यावशिष्टभागानामेकैकं भागं त्रेधा विभज्य चतुर्विंशतिसंख्येभ्य ऋत्विगादिभ्यः समं दद्यात् । दानवाक्यं तुलावदेव ज्ञेयम् ।

तथा—

स्वल्पे च होमं गुरुरेक एव कुर्यादथैकाग्निविधानयुक्त्या ।
स एव संपूज्यतमोऽल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन ॥

अत्र सहस्रपलपक्ष उत्तमस्तदर्द्धेन मध्यमस्तदर्द्धेनाधमः । अधमपक्षे स्वल्पत्वं ज्ञेयम् । विंशतिपलनिर्मिते स्वल्पत्वमित्येके । एकाग्निविधाने प्रतीच्यां वृत्तं कुण्डमिति परिभाषायामुक्तम् । एक एव ऋत्विगष्टकं विनेत्यर्थः ।

इत्थं य एतदखिलं पुरुषोऽत्र कुर्या-
द्ब्रह्माण्डदानमधिरुह्य महद्विमानम् ।
निर्धूतकल्मषविशुद्धतनुर्मुरारे-
रानन्दकृत्पदमुपैति सहाप्सरोभिः ॥
सन्तारयेत्पितृपितामहपुत्रपौत्र-
बन्धुप्रियातिथिकलत्रशताष्टकं यः ।
ब्रह्माण्डदानशकलीकृतपातकोऽय-
मानन्दयेच्च जननीकुलमप्यशेषम् ॥
इति ब्रह्माण्डदानम् ॥

अथ प्रयोगः ।

यजमानो देशकालौ सङ्कीर्त्य 'सकलपातकक्षयपितृपितामहप्रपितामहपुत्रपौत्रबन्धुप्रियातिथिकलत्रपुरुषशताष्टकतारणविलीनसकलपाप-

काशेषमातृकुलपातकौघशकलीकरणसन्तारणानन्दपूर्वकाऽप्सरःसङ्घसहितविमानकरणकमुरारिपदप्राप्तिकामोऽहं श्वो ब्रह्माण्डमहादानं प्रतिपादयिष्ये ' इति सङ्कल्प्य तुलापुरुषदानवत्प्रारब्धोपवासो गोविन्दादिपूजादिमंडपपूजाचार्यादिविनियोगान्तं विदध्यात् । तत आचार्यो वेदिरचितषोडशारचक्रोपरिस्थतिलद्रोणोपरि ब्रह्माण्डं स्थापयेत् । एतत्प्रागादिदिक्षु दिग्गजाष्टकलोकपालाष्टकप्रतिमाः स्थापयित्वा पश्चिमायां वेदचतुष्टयतदङ्गषट्कप्रतिमाः स्थापयेत् । ब्रह्माण्डोपरि शिवोमाच्युतलक्ष्मीसूर्यप्रतिमां मध्ये चतुर्मुखप्रतिमां मध्य एव समन्तादष्टवसुद्वादशादित्यमरुद्गणप्रतिमा नवरत्नानि चेति स्थापयित्वा कौशेयवस्त्रेण ब्रह्माण्डं वेष्टयित्वा प्रत्येकं द्रोणपरिमितान्यष्टादश धान्यानि परितो निधाय प्राच्यादिदिक्षु गुडपीठेष्वनन्तशयनप्रद्युम्नप्रकृतिसङ्कर्षणवेदचतुष्टयानिरुद्धाग्निवासुदेवप्रतिमाष्टकं च निधाय स्थापितब्रह्माण्डादिप्रतिमाः क्रमेण नाममन्त्रैरावाह्यार्चयित्वा परितो दशपूर्णकुम्भान्सवस्त्रान्स्थापयेत् । ततः पादुकोपानच्छत्रचामरासनदर्पणभक्ष्यभोज्यफलमाल्यदीपानुलेपनामत्रैः सह कांस्यदोहनादियुक्तां दश धेनूरुपकल्प्य ब्रह्माण्डोपरि वितानं बध्नीयात् । ततः कुण्डसमीपस्थं कुम्भस्थापननवग्रहस्थापनादिपूर्णाहुत्यभिषेकान्तं तुलापुरुषवत् । एवमभिषिक्तो यजमानः शुक्लवेषोऽञ्जलिं बद्ध्वा ब्रह्माण्डं त्रिःप्रदक्षिणीकृत्य—

नमोऽस्तु विश्वेश्वर विश्वधाम जगत्सवित्रे भगवन्नमस्ते ।
सप्तर्षिलोकामरभूतलेश गर्भेण सार्द्धं वितराभिरक्षाम् ॥
ये दुःखितास्ते सुखिनो भवन्तु प्रयान्तु पापानि चराचराणाम् ।
त्वद्दानशस्त्राहतपातकानां ब्रह्माण्ड दोषाः प्रलयं व्रजन्तु ॥

इति पठेत् । ततो यजमानः पश्चिमत उपविश्य गोदशकेन सह ब्रह्माण्डं दशधा विभज्याऽऽचार्याय भागद्वयं भागाष्टकमृत्विग्भ्यो दद्यात् । अद्याऽमुककाले ' सकलपातकक्षयकाम इत्यन्तं सङ्कल्पवाक्यमुक्त्वा ब्रह्माण्डमेतावत्पलमितसुवर्णरचितं तिलद्रोणोपरि स्थापितमेतत्सर्वोपस्करयुतं युष्मभ्यं गुर्वृत्विग्भ्यः संप्रददे ' इति गुर्वादिहस्तेषु जलं निक्षिपेत् । ब्राह्मणाश्च ब्रह्माण्डं स्पृष्ट्वा प्रतिगृह्णीयुः । ततः ' कृतैतद्ब्रह्माण्डदानप्रतिष्ठार्थमिदं हिरण्यमाग्नेयं ग्रामादि च गुरवे संप्रददे ' इति दद्यात् । ऋत्विगादिभ्योऽपि यथाशक्ति हिरण्यं दद्यात् । अल्पदेयद्रव्यत्वे तु

गुरुरेव स्वशाखया पश्चिमायां वृत्तकुण्डे हवनादि कुर्यात् । ब्रह्मजापका-दयोऽपि प्रयोगान्तरवत्कार्याः न ऋत्विजः । ततो ग्रहवेद्यां ग्रहादिपूज-नादिविसर्जनान्तं गुरुः कुर्यात् , इत्येकाध्वर्युपक्षः ।

इति ब्रह्माण्डदानप्रयोगः ॥

अथ कल्पतरुदानम् ।

मात्स्ये—

कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्वपातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कुर्याल्लोकेशावाहनं तथा ॥
ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकम् ।
काञ्चनान्कारयेद्वृक्षान्नानाफलसमन्वितान् ॥
नानाविहङ्गवस्त्राणि भूषणानि च कारयेत् ।

नानाफलानि स्त्रीपुरुषगोगजवाजिमणिकनकरजतभक्ष्यफलादीनीति केचित् । फलान्येवेत्यन्ये ।

शक्तितस्त्रिपलादूर्ध्वमासहस्रात्प्रकल्पयेत् ।
अर्द्धं क्लृप्तसुवर्णस्य कारयेत्कल्पपादपम् ॥

कल्पपादपदानार्थमुपक्लृप्तसुवर्णस्यार्द्धेन ब्रह्मादिप्रतिमासहितं कल्प-पादपं कुर्यात् । द्वितीयार्द्धं तु चतुर्द्धा विभज्यैकैकभागेन स्वस्वदेवताप्रति-मासहितान्सन्तानादीन्कुर्यात् ।

गुडप्रस्थोपरिष्टाच्च सितवस्त्रयुगावृतम् ।
ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ॥

प्रस्थो द्वात्रिंशत्पलः परिभाषायां दर्शितः षोडशपलो वा । ब्रह्मा-दिप्रतिमाः प्राग्दर्शिताः ।

कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ।

विष्णुधर्मोत्तरे—

कामदेवस्तु कर्तव्यो रूपेणाऽप्रतिमो भुवि ।
अष्टबाहुः प्रकर्तव्यः शङ्खपद्मविभूषितः ॥
चापबाणकरश्चैव मदोदञ्चितलोचनः ।
रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्ज्वला ॥

चतस्रस्तस्य कर्तव्याः पत्न्यो रूपमनोहराः ।
चत्वारश्च करास्तस्य कार्या भार्यास्तनोपगाः ॥
केतौ च मकरः कार्यः पञ्चबाणमुखो महान् । इति ॥

दामोदरीये तु—

चापेषुधृक्कामदेवो रूपवान्विश्वमोहकः । इत्युक्तम् ।

अधस्तादिति ब्रह्मादिभिरप्यन्वेति ।

सन्तानं पूर्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।

तुरीयोऽशोऽपरार्द्धस्य वर्तिना गुडप्रस्थोपरिगतत्वं सितवस्त्रयुग्मशाखापञ्चकफलान्वितत्वं चोक्तम् । मन्दारादिष्वपि वस्त्रयुग्माद्यन्वेति ।

मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि ।
पश्चिमे पारिजातं तु सावित्र्या सह जीरके ॥
सुरभीसंयुतं तद्वत्तिलेषु हरिचन्दनम् ।
तुरीयांशेन कुर्वीत सौम्येन फलसंयुतम् ॥

तुरीयांशेनेति मन्दारपारिजाताभ्यामप्यन्वेति । 'पञ्चाप्येते वृक्षाः क्रमादश्वत्थनिम्बार्कपारिभद्रबिल्वतरुतुल्याकाराः शिष्टाचारात्' इति दामोदरः । श्रीप्रतिमोक्ता हिरण्यगर्भदाने । सावित्री तु ब्रह्माण्डे—

पद्मासना च सावित्री साक्षसूत्रकमण्डलुः ।

इत्युक्त्वा—

सवत्सा सुरभी धेनुरागता प्रस्नुतस्तनी ।

इति सुरभीलक्षणम् । घृतादिकमपि प्रस्थपरिमितं ग्राह्यम् ।

कौशेयवस्त्रसंवीतानिक्षुमाल्यफलान्वितान् ।
तथाष्टौ पूर्णकलशान्पादुकाशनभाजनम् ॥
दीपिकोपानहच्छत्रचामरासनसंयुतम् ।
फलमाल्ययुतं तद्वदुपरिष्टाद्वितानकम् ॥
तथाष्टादश धान्यानि समन्तादुपकल्पयेत् ।

अशनभाजनं भोज्यपूरितभाजनम् । धान्यानि प्रत्येकं द्रोणपरिमितानि ।

होमाधिवासनान्ते च स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥

अधिवासनान्ते प्रातः पूर्णाहुत्यादिकर्मोत्तरं पुण्याहवाचने कृते कुण्डाभ्याशे कलशैः स्नापित इत्यर्थः । मन्त्रः प्रयोगे ज्ञेयः ।

एवमामन्त्र्य तं दद्याद्गुरवे कल्पपादपम् ।
चतुर्भ्यश्चापि ऋत्विग्भ्यः सन्तानादीन्प्रकल्पयेत् ॥

'कुण्डचतुष्टयसम्बन्धिभ्योऽष्टभ्य ऋत्विग्भ्यः सन्तानादींश्चतुरो दद्यात्' इतिमदनः । 'चतुर्णामेव ऋत्विजां मन्त्रवरणम्' इति हेमाद्र्यादयः । जापकादिभ्योऽन्यैव दक्षिणा देया ।

स्वल्पे त्वेकाग्निवत्कुर्याद्गुरोरेवाभिपूजनम् ।
न वित्तशाठ्यं कुर्वीत न च विस्मयवान्भवेत् ॥
अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान्भव्यांश्च मनुजांस्तारयेद्रोमसंमितान् ॥
स्तूयमानो दिवः पृष्ठे पुत्रपौत्रप्रपौत्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ॥
दिवि कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ।
नारायणबलोपेतो नारायणपरायणः ॥
नारायणकथासक्तो नारायणपुरं व्रजेत् । इति ॥

इति कल्पपादपदानविधिः ।

अथ प्रयोगः ।

यजमानो देशकालोच्चारणान्ते 'सर्वपापक्षयपूर्वकाश्वमेधफलप्राप्तिपितृपुत्रादिस्वरोमसंमितभूतभव्यस्वकीयपुरुषसन्तारणाप्सरःसिद्धचारणकिन्नरसेवितत्वसर्वस्तूयमानत्वविशिष्टार्कवर्णविमानकरणकविष्णुपुरगमनपूर्वककल्पशतावच्छिन्नकालवैष्णवस्वर्गलोकनिवासपूर्वकनारायणपरायणत्वनारायणतुल्यबलत्वनारायणकथासक्तत्वविशिष्टभूलोकराजराजत्वानन्तरनारायणपुरप्राप्तिकामः श्वः कल्पपादपमहादानं प्रतिपादयिष्ये' इति सङ्कल्प्य प्रारब्धोपवासो गोविन्दादिमण्डपपूजाचार्यादिविनियोगान्तं कुर्यात् । ततो गुरुः षोडशारचक्रवद्भुवुपरि गुडप्रस्थं निधाय तदुपरि ब्रह्मविष्णुशिवभास्करप्रतिमाभिः सह पञ्चशाखं सितवस्त्रयुगान्वितं कल्प-

वृक्षं मध्ये स्थापयित्वा गुडप्रस्थे सदारकामप्रतिमया सह निर्मितं सितवस्त्रयुगान्वितं सन्तानं पूर्वतः स्थापयित्वा तथैव घृतप्रस्थोपरि श्रीप्रतिमान्वितं मन्दारं दक्षिणतः स्थापयित्वा पश्चिमे जीरकप्रस्थोपरि सावित्रीप्रतिमान्वितं पूर्ववत्पारिजातं स्थापयित्वोत्तरे तिलप्रस्थोपरि सुरभीप्रतिमान्वितं हरिचन्दनं स्थापयित्वा सर्वेषु माल्यफलादि स्थापयेत् । तथा प्राच्याद्यष्टदिक्षु कौशेयवस्त्रादियुक्तान्पूर्णकलशान्स्थापयित्वा पादुकोपानच्छत्रादिकं स्थापयित्वा प्रत्येकं द्रोणमितधान्यान्यपि निधाय वेद्यां वितानं च बद्ध्वा मन्त्रेण पञ्च पादपान्क्रमेण प्रतिष्ठाप्य 'ब्रह्मविष्णुशिवाऽर्कसहिताय कल्पपादपाय नमः' सदारकामसहिताय संतानाय०, श्रीसहिताय मन्दाराय०, सावित्रीसहिताय पारिजाताय०, सुरभीसहिताय हरिचन्दनाय०' इत्येवंप्रकारेण यथासंभवमावाहनाद्युपचारैः संपूज्य वितानं बध्नीयात् । ततः कुण्डसमीपकुम्भस्थापनब्रह्मादिस्थापनप्रभृतिपूर्णाहुत्यभिषेकान्तं तुलापुरुषवत् । एवमभिषिक्तो यजमानः शुक्लवेषो धृतपुष्पाञ्जलिः कल्पपादपं त्रिःप्रदक्षिणीकृत्य तत्पश्चिमत उपविश्य—

> नमस्ते कल्पवृक्षाय चिन्तितार्थप्रदायिने ।
> विश्वम्भराय देवाय नमस्ते विश्वमूर्तये ॥
> यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।
> मूर्तामूर्तं परं बीजमतः पाहि सनातन ॥
> त्वमेवाऽमृतसर्वस्वमनन्तः पुरुषोऽव्ययः ।
> सन्तानाद्यैरुपेतः सन्पाहि संसारसागरात् ॥

इत्युक्त्वा पुष्पाञ्जलिं क्षिप्त्वा नत्वा वेदिपश्चिमतः प्राङ्मुखोऽद्येत्याद्युक्त्वा 'सर्वपातकक्षयेत्यादिनारायणपुरप्राप्तिकामः' इत्यन्त उच्चरिते, अमुकगोत्रायेत्यादिविशेषणविशिष्टमुच्चार्य, तुभ्यं गुरव इमं कल्पपादपं मूलदेशस्थापितब्रह्मविष्णुशिवभास्करप्रतिमं गुडप्रस्थोपरि स्थितं सितवस्त्रयुगान्वितं कौशेयसंवीतं कलशाष्टकेक्षुमाल्यफलपादुकासनभाजनदीपिकोपानच्छत्रादिसहितं सवितानं संप्रददे इति गुरुहस्ते जलं क्षिपेत् । गुरुश्च स्वस्तिशब्दपूर्वकं 'देवस्य त्वा' इति प्रतिगृह्य कामस्तुतिं पठेत् । तत 'एतत्प्रतिष्ठार्थमिदं हिरण्यं ग्रामरत्नादिकं च दक्षिणां तुभ्यं गुरवे संप्रददे' इति तानि दद्यात् । एवं 'पूर्वतो गुडप्रस्थोपरि स्थितं सदारकामप्रतिमान्वितमिक्षुमाल्यफलाद्युपकरणान्वितं

सन्तानं तुभ्यं बह्वृचायस्विजे संप्रददे ' इति । ततो दक्षिणतो घृतप्रस्थोपरिस्थं मन्दारं श्रीयुतं यजुर्विद्दृत्विजे, पश्चिमायां जीरकस्थं सावित्रीप्रतिमान्वितं पारिजातं सामशाखिने, उत्तरतस्तिलप्रस्थोपरि स्थितं मूले सुरभीप्रतिमान्वितं हरिचन्दनमथर्ववेविदे दत्त्वा चतुर्भ्योऽपि सुवर्णग्रामरत्नादि शक्त्या दक्षिणां दद्यात् । जापकादिभ्यः पृथग्दद्यात् । यद्वा गुर्वादीन्सन्तोष्य तदनुज्ञयाऽन्येभ्योऽपि दद्यात् । ततः आचार्यः पुण्याहवाचनान्ते पुनर्ग्रहादिपूजां कारयित्वा पीठादिदेवताविसर्गं कुर्यात् ।

इति कल्पपादपदानविधिः ।

अथ गोसहस्रम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
गोसहस्रप्रदानाख्यं सर्वपापहरं शुभम् ॥
पुण्यां तिथिमथासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतं त्रिरात्रं स्यादेकरात्रमथाऽपि वा ॥
लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ।
पुण्याहवाचनं कुर्याद्धोमः कार्यस्तथैव च ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ।
वृषं लक्षणसंयुक्तं वेदिमध्येऽधिवासयेत् ॥

गोसहस्राद्विनिष्क्रम्य गवां दशकमेव वा इत्यादि । पयोव्रतं दानात्पूर्वम् । वृषश्च पुष्टः सुरूपो नीरुग्ग्राह्यः । यत्तु कैश्चिद् ' उन्नतस्कन्धककुदमुज्ज्वलायतकम्बलम् ' इत्यादीनि वृषोत्सर्गप्रकरणे मात्स्ये उक्तानि लक्षणानीत्युक्तं तत्र मूलं मृग्यम् । गोसहस्राद्विनिष्क्रम्येति दशोत्तरगोसहस्रादित्यर्थः । तथाच दशाधिकं गोसहस्रादित्यर्थः । तथाच दशाधिकं गोसहस्रं ज्ञेयम् । तत्राप्यधिवासनीयं गोदशकम् । सहस्रगोषु तु नावश्यं धेनुत्वादर इति विवेक इति केचित् ।

गोसहस्रं बहिः कुर्याद्वस्त्रमाल्यविभूषितम् ।
सुवर्णशृङ्गाभरणं रौप्यपादसमन्वितम् ॥
बहिः कुर्यान्मण्डपाद्बहिरासादयेत् ।
अन्तः प्रवेश्य दशकं वस्त्रमाल्यैः प्रपूजयेत् ॥
सुवर्णघण्टिकायुक्तं ताम्रदोहनिकान्वितम् ।

सुवर्णतिलकोपेतं हेमपट्टैरलङ्कृतम् ॥
कौशेयवस्त्रसंवीतं माल्यगन्धविभूषितम् ।
हेमरत्नयुतैः शृङ्गैश्चामरैश्चापि शोभितम् ॥
पादुकोपानहच्छत्रचामरासनसंयुतम् ।

सुवर्णघण्टिकेत्यत्र सुवर्णशब्दोऽशीतिगुञ्जापरिमितहेमपरः । सकृत्प्रयुक्तसुवर्णशब्दस्य तथैव प्रसिद्धेः । अत्र 'शृङ्गे दशसौवर्णिके' खुराः पञ्चपलाः, 'पञ्चाशत्पलं दोहनपात्रमित्यन्यत्रोक्तं ग्राह्यम्' इति केचित् । 'यथाशक्ति' इति परे । । पादुकोपानहादिपञ्चकं प्रत्येकं गोदशकसमीपे स्थाप्यम् ।

गवां दशकमध्ये स्यात्काञ्चनो नन्दिकेश्वरः ।
कौशेयवस्त्रसंवीतो नानाभरणभूषितः ॥
लवणद्रोणशिखरे माल्येक्षुफलसंयुतः ।
ऊर्ध्वस्त्रिनेत्रो द्विभुजः सौम्यास्यो नन्दिकेश्वरः ॥
वामे त्रिशूलभृद्दक्षे चाक्षमालासमन्वितः ।

ऊर्ध्व इति स्थित इत्यर्थः ।

कुर्यात्पलशतादूर्ध्वं सर्वमेतदशेषतः ।
शक्तितः पलसाहस्रत्रितयं यावदेव तु ।

'साभरणनन्दिकेश्वरनिर्माणार्थमेतद्धेममानम्' इति हेमाद्रौ । 'गोभूषणाद्यप्येतन्मध्ये' इति दानसागरादौ । 'गोशते वै दशांशेन सर्वमेतत्प्रकल्पयेत्' । गोशताख्यं महादानं सप्तदशमिति दानसौख्ये ।

पुण्यं दिनमथासाद्य गीतमङ्गलनिःस्वनैः ।
सर्वौषध्युदकस्नानस्नापितो वेदपुङ्गवैः ॥
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ।

मन्त्रः प्रयोगे ज्ञेयः ।

इत्यामन्त्र्य ततो दद्याद्गुरवे नन्दिकेश्वरम् ।
सर्वोपकरणोपेतं गोयुगं च विचक्षणः ॥
ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत् ।
गवां शतमथैकैकां तदर्द्धं वाऽथ विंशतिम् ॥
दश पञ्चाऽथवा दद्यादन्येभ्यस्तदनुज्ञया ।

अन्ये ऋत्विज उदासीनाश्च विप्राः । सर्वपक्षेषु द्विगुणा गुरवे देयाः ।

नैका बहुभ्यो दातव्या यतो दोषकरी भवेत् ।
बह्वयस्त्वेकस्य दातव्याः श्रीमदारोग्यवृद्धये ॥
श्रावयेच्छृणुयाद्वाऽपि महादानानुकीर्तनम् ।
तद्दिने ब्रह्मचारी स्याद्यदीच्छेद्विपुलां श्रियम् ॥
अनेन विधिना यस्तु गोसहस्रप्रदो भवेत् ।
सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
सर्वेषां लोकपालानां लोके संपूज्यते नरैः ॥
प्रतिमन्वन्तरं तिष्ठेत्पुत्रपौत्रसमन्वितः ।
सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत् ॥
शतमेकोत्तरं तद्वत्पितॄणां तारयेद्बुधः ।
मातामहानां तद्वच्च पुत्रपौत्रसमन्वितः ॥
यावत्कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ।
अश्वमेधशतं कुर्याच्छिवध्यानपरायणः ॥
वैष्णवं योगमास्थाय ततो मुच्येत बन्धनात् । इति ॥

इति गोसहस्रदानविधिः ।

अथ प्रयोगः । यजमानोऽधिवासनदिनात्पूर्वं त्र्यहमेकाहं दुग्धमात्राहारोऽधिवासनदिनेऽद्येत्याद्युक्त्वा ‘ सकलपापक्षयानन्तरसिद्धचारणसेवितत्वार्कवर्णसुवर्णकिङ्किणीजालमालिविमानारोहणोत्तरैकैकमन्वन्तरावच्छिन्नेन्द्रादिसकललोकपाललोकाधिकरणपुत्रपौत्रसमन्वितनिवासामरकर्तृकपूजापूर्वकसप्तलोकातिक्रमणोत्तरपुत्रपौत्रसमन्वितशिवालयगमनैकोत्तरशतपितृमातामहकुलतारणकल्पशतावच्छिन्नशिवपुरनिवासानन्तरराजराजभवनाश्वमेधशतकर्तृत्वशिवध्यानपरत्वविष्णुप्रसादस्थापन्नयोगस्थानहेतुकसंसारमोचनकामोऽहं गोसहस्रदानं श्वः प्रतिपादयिष्ये ’ इति सङ्कल्प्योपवासगोविन्दादिपूजादिमण्डपपूजाचार्यादिविनियोगान्तं कुर्यात् । ततो गुरुर्वेदिमध्ये षोडशारं विलिख्य पुष्पैरवकीर्य पूर्वोक्तं वृषं धेनुदशकं च वस्त्रमाल्यसुवर्णघण्टासुवर्णतिलकसुवर्णश्रृङ्गरौप्यखुरदोहनपात्रकौशेयवस्त्रपादुकोपानच्छत्रचामरासनाद्युपशोभितं वेद्याः परितः स्थापयेत् । मण्डपाद्बहिर्गोसहस्रं सुवर्णश्रृङ्गादिसहितं वा अधिवासयेत् । ततः सवृषगोदशकमध्ये षोडशारस्थललवणद्रोणोपरि कौशेयवस्त्रसंवीतं

माल्येक्षुफलादिसंयुतं प्रागुक्तं नंदिकेश्वरं स्थापयेत्पूजयेत्, उपरि वितानं बध्नीयाच्च। ततः कुण्डसमीपस्थकुम्भस्थापनग्रहस्थापनपूर्णाहुत्य-भिषेकान्तं तुलापुरुषवत्। ततो यजमानः पश्चात्स्थित्वा पुष्पाण्यादाय सवृषं गोदशकम्,

> नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च।
> लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः॥
> गवामङ्गेषु तिष्ठन्ति भुवनान्येकविंशतिः।
> ब्रह्मादयस्तथा देवा रोहिण्यः पान्तु मातरः॥
> गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
> गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम्॥
> यस्मात्त्वं वृषरूपेण धर्म एव सनातनः।
> अष्टमूर्तेरधिष्ठानमतः पाहि सनातन॥

इत्यावाहयेत्। ततो वेदिपश्चिमभागे उपविश्य कुशतिलजलान्यादाय देशकालोच्चारणान्ते 'सकलपापक्षयानन्तरेत्यादिसंसारमोचनकामः' इत्यन्ते संकल्प उच्चारिते, 'एताः सुवर्णशृङ्गाद्यलङ्कृताः सवृषलवणद्रोणोपरिस्थितनन्दिकेश्वरसहिताः पादुकोपानच्छत्रचामरासनसंयुताः सवत्ससुवर्णालङ्कृतधेनुदशकसहिताः सहस्रं गाः वितानाद्युपस्कारसहिताः अमुकामुकशर्मभ्यो गुर्वृत्विग्भ्योऽहं संप्रददे' इति दद्यात्। तेऽपि 'स्वस्ति' इत्युक्त्वा पुच्छेषु प्रतिगृह्य 'रुद्राय गाम्' इत्याद्युक्त्वा स्वकामस्तुतिं पठेयुः। दाता दानप्रतिष्ठार्थं तेषु दक्षिणां दद्यात्। सोपकरणनन्दिकेश्वरं प्रत्यक्षऋषभं धेनुदशकात्सोपकरणधेनुद्वयं गोसहस्राच्च शतद्वयं गुरवे दद्यात्। ऋत्विग्भ्यश्च दशकान्तर्गतानामेकां गां गोसहस्राच्च प्रत्येकं शतमित्येकः पक्षः। जापकादीनामन्यैव दक्षिणा देया। ग्रामादिना सन्तोष्य यथेच्छं विभाग इति प्रागुक्तम्। ततः पुण्याहवाचनान्ते ग्रहपूजनं तद्विसर्जनादि सर्वं प्रकृतिवद्भवेत्। श्रीकामस्तस्मिन्दिने दुग्धमात्राहारो ब्रह्मचारी च भवेत्। कर्मसाद्गुण्यार्थं च यथाशक्ति ब्राह्मणान्भोजयेत्॥

इति श्रीमीमांसकभट्टशङ्करात्मजभट्टनीलकण्ठकृते
दानमयूखे गोसहस्रदानविधिः॥

अथ हिरण्यकामधेनुः ।

मात्स्ये—

अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्वकामप्रदं नृणां सर्वपातकनाशनम् ॥
लोकेशावाहनं तद्वद्धोमः कार्योऽधिवासनम् ।
तुलापुरुषवत्कुर्यात्कुण्डमण्डपवेदिकाः ॥
स्वल्पेष्वेकाग्निवत्कुर्याद्गुरुरेव समाहितः ।

कुण्डमण्डपेति गोविन्दपूजादिब्राह्मणभोजनान्तधर्माणामुपलक्षणम् । गुरुरेवेत्यृत्विङ्निषेधो, न जापकानाम् ।

काञ्चनस्यातिशुद्धस्य धेनुं वत्सं च कारयेत् ।
उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा ॥
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्तिता ।

यद्यपि यौवनादिवत्सहस्राणां गणः साहस्रम्, बहुवचनेन च तद्बहुत्व उक्ते नवसहस्रं पलानीति भाति, तथापि कल्पतर्वाद्यपकर्षवदुत्कर्षोऽपि तत्तुल्य एवोचितः । उपनायनमितिवत्तु साहस्रैरिति वृत्तानुरोधेन दैर्घ्यम्, पलपदस्यापि पूर्वनिपात आर्षः तेन पलसहस्रेणेत्यर्थः । रूपनारायणदामोदरादयोऽप्येवम् । पलसहस्राणीति क्वाचित्कः पाठोऽप्यमुमेवार्थं संवदति ।

शक्तितस्त्रिपलादूर्ध्वमशक्तोऽपि हि कारयेत् ।

गुडधेन्वादिषु 'चतुर्थांशेन वत्सः स्यात्' इत्यभिधानात् । 'अत्रापि कल्प्यसुवर्णचतुर्थांशेन वत्सः कार्यः' इति निबन्धकृतः ।

वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम् ।
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ॥
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम् ।
तथाष्टादश धान्यानि समन्तात्परिकल्पयेत् ॥
इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम् ।
भाजनं चासनं तद्वत्ताम्रदोहनकं तथा ॥

भाजनं भोजनपात्रम् ।

कौशेयवस्त्रद्वयसंवृताङ्गीं दीपातपत्राभरणाभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां मणित्रिकापादुकरौप्यपादाम् ॥

रसैश्च सर्वैः पुरतोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः ।
कुण्डलिनीं कर्णयोः कुण्डलयुताम् ।
अजाजिकुस्तुम्बुरुशर्कराभिर्वितानकञ्चोपरि पञ्चवर्णम् ।

गणित्रिका अक्षमाला । दामोदरीये तु गोलत्रिकेति पाठः । पादकिङ्किणीति तदर्थः । पादुकेति पादुकाः काष्ठमय्यः, रौप्यं रौप्यालङ्कारः, तद्द्वयमपि पादेषु यस्याः सा । अजाजी जीरकम् । कुस्तुम्बुरु धान्याकम् । रसैर्मधुराम्लतिक्तकषायकटुलवणरसयुतैर्द्रव्यैः ।

स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः ।
आवाहयेत्तां गुडधेनुमन्त्रैर्द्विजाय दद्यादथ दर्भपाणिः ॥

आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः ॥

विप्रायेत्येकवचनमेकाग्निपक्षे । जापकादिभ्योऽन्यैव दक्षिणा । अनेकाग्निपक्षे तुलापुरुषवत्पक्षत्रयमिति केचित् । पक्षद्वयेऽप्येकस्मै एव विप्रायेति तु युक्तम् । आमन्त्रणमन्त्रास्तु प्रयोगे ज्ञेया इति ।

इति हिरण्यकामधेनुदानविधिः ।

अथ प्रयोगः । तत्र यजमानोऽद्येत्याद्युक्त्वा 'सर्वपापक्षयपूर्वकरुद्रकन्यागणेन्द्रादिसेवितशिवपदप्राप्तिकामः श्वो हिरण्यगर्भकामधेनुमहादानमहं प्रतिपादयिष्ये' इति संकल्प्य गोविन्दादिमण्डपपूजादिगुर्वादिनियोगान्तं तुलादानवत्कुर्यात् । गुरुर्वेद्यां षोडशारं विरच्य तदुपरि कृष्णाजिनं प्राग्ग्रीवमुत्तरलोमकं न्यस्य तदुपरि गुडप्रस्थं च न्यस्य तदुपरि पलत्रयाधिकयथाशक्ति हैमीं कामधेनुं सालङ्कारां निर्माय तत्तुरीयभागनिर्मितं वत्सं स्तनाभिमुखदक्षिणादिगवस्थितं विधाय पञ्चरत्नालङ्कृतां कौशेयद्रव्यसंवीतां सौवर्णनूपुरद्वयग्रैवेयकसौवर्णकुण्डलद्वयघण्टापादकिङ्किणीकाष्ठपादुकाद्वयरौप्यपादचतुष्टयाभरणयुतां ताम्रदोहनान्वितां सचामरां धेनुं स्थापयित्वा तत्समन्ताद्वारिपूर्णकुम्भाष्टकं, नानाफलानि, अष्टादशधान्यानि, इक्षुदण्डाष्टकं, भोजनभाजनपीठदीपच्छत्रषड्रसद्रव्याणि, हरिद्रां, पुष्पाणि, जीरकं, धान्याकं, शर्करादि स्थापयेत् । ततो वितानं बद्ध्वा प्रतिष्ठापूर्वकं नाममन्त्रेण यथाशक्त्युपचारैः पूजयेत्, उपरि वितानं च

बध्नीयात् । ततः कुण्डसमीपस्थकुम्भस्थापनपूर्णाहुत्यन्तमभिषेकान्तं तुलापुरुषवत् । एवमभिषिक्तो यजमानो गृहीतकुसुमाञ्जलिस्तां प्रदक्षिणीकृत्योपविश्य,—

या लक्ष्मीः सर्वलोकानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥
देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपाऽस्तु सा श्रिये ॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥
स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजाञ्च या ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छतु ॥

इति गुडधेनुमन्त्रैरावाह्य—

त्वं सर्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरि त्रिपथगोदधिपर्वतानाम् ।
त्वद्दानशस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ॥
लोके यथेप्सितफलानुविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतस्व कामं
त्वां कामधेनुरिति देवगणा वदन्ति ॥

इत्यामन्त्र्याद्येत्यादिकीर्तनान्ते 'सर्वपापक्षयपूर्वकरुद्रकन्यागणेन्द्रादिसेवितशिवपदप्राप्तिकामः स्वर्गकाम ईश्वरप्राप्तिकामो वा गुरवे पूर्वोक्तवत्समश्वरत्नालङ्काराद्युपेतामिमां कामधेनुं तुभ्यं संप्रददे' इति दद्यात् । ततः 'कृतैतद्दानप्रतिष्ठार्थं ग्रामरत्नादि हिरण्यं वा संप्रददे न ममेति वदेत् । ततः पुण्याहवाचनानन्तरं यजमानो ग्रहादि संपूज्य, यान्त्वित्यादिना विसर्जयेत् । मण्डपाद्युपकरणं गुरवे निवेदयेत् । कर्मसाङ्गतासिद्ध्यर्थं ब्राह्मणान्भोजयेत् ।

इति हिरण्यकामधेनुदानप्रयोगः ।

अथ हिरण्याश्वदानम् ।

मात्स्ये—

अथाऽतः संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ।
यस्य प्रसादाद्भुवनमनन्तं फलमश्नुते ॥
पुण्यां तिथिमथाऽऽसाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ।
स्वल्पेष्वेकाग्निवत्कुर्याद्धेमवाजिमखं ततः ॥
स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि ।
कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनम् ॥
शक्तितस्त्रिपलादूर्ध्वमासहस्रपलाद्बुधः ।
पादुकोपानहच्छत्रचामरासनभाजनम् ॥
पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम् ।
शय्यां सोपस्करां तद्वद्धेममार्तण्डसंयुताम् ॥

मार्तण्डसंयुतामिति दीर्घपाठः शय्याया विशेषणं चेति दामोदराद्याः । ह्रस्वपाठेनाश्वस्येति हेमाद्रिमदनौ ।

ततः सर्वौषधिस्नानस्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥

मन्त्रः प्रयोगे ज्ञेयः । 'एवमुच्चार्य गुरवे तमश्वं विनिवेदयेत्' । गुरव इति ऋत्विजामप्युपलक्षणमिति रत्नाकरपारिजातयोः । गुरव एवेति वाचस्पतिमिश्राः । युक्तं चेदम् । उपलक्षणे मानाभावात् ।

दत्त्वा पापक्षयाद्भानोर्लोकमभ्येति शाश्वतम् ।
गोभिर्विभवतः सार्द्धमृत्विजः परिपूजयेत् ॥
सर्वधान्योपकरणं गुरवे विनिवेदयेत् ।
इमं हिरण्याश्वविधिं करोति संवीज्यमानो दिवि देवतेन्द्रैः ।
विमुक्तपापः स पुरं मुरारेः प्राप्नोति सिद्धैरभिपूजितः सन् । इति ॥

इति हिरण्याश्वदानविधिः ।

अथ प्रयोगः । यजमानः अद्येत्याद्युक्त्वा 'सकलदुरितनिवृत्तिसमनन्तरशाश्वतसूर्यलोकप्राप्तिपूर्वकदेवतेन्द्रपूज्यमानताविशिष्टस्वर्लोकगमनोत्तरसिद्धपूजितत्वविशिष्टविष्णुलोकप्राप्तिकामः श्वो हिरण्याश्वमहादान-

महं प्रतिपादयिष्ये ' इति सङ्कल्प्य गोविन्दादिपूजनादिमण्डपपूजादिगुर्वृत्विगादिविनियोगान्तं सर्वं प्रकृतिवत्कुर्यात् । ततो गुरुः षोडशारचक्रं वेद्यां विलिख्य तदुपरि त्रिपलाधिकसहस्रपलपर्यन्तशक्त्यनुसारसुवर्णघटितं भास्करप्रतिमायुतं हेमवाजिनं कौशेयवस्त्रसंवीतं प्राङ्मुखं स्थापयित्वा समन्ताच्च पूर्णकुम्भाष्टकं पादुकोपानच्छत्रचामरासनभोजनभाजनमाल्येक्षुफलान्यष्टादशधान्यानि च स्थापयित्वा सोपकरणां शय्यां च सन्निधापयेत् । शय्योपकरणानि च तूलिकोपधानप्रच्छदपटफलपुष्पकुङ्कुमकर्पूरागुरुचन्दनताम्बूलदर्पणकङ्कतिकाचामरव्यजनासनासिपुत्रिकादीपिकोपानत्ताम्रघण्टिकाजलपात्रवितानाद्यानि । ततो ' भास्कराधिष्ठिताय हिरण्याश्वाय नमः ' इति प्रतिष्ठापूर्वकं यथासंभवोपचारैरभ्यर्च्योपरि वितानं बध्नीयात् । ततः कुण्डसमीपस्थकुम्भस्थापनपूर्णाहुत्यभिषेकान्तं प्रकृतिवदेवमभिषिक्तो यजमानो गृहीतकुसुमाञ्जलिर्हिरण्याश्वं त्रिःपरिक्रम्योपविश्य—

नमस्ते सर्वदेवेश वेदाहरणलम्पट ।
वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥
त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्कर ।
यस्माद्भावयसे लोकानतः पाहि सनातन ॥

इत्यामन्त्र्य नमस्कृत्य अद्येत्याद्यन्ते ' सकलेत्यादिप्रागुक्तसङ्कल्पान्ते ' इमं हिरण्याश्वं कृष्णाजिनोपरिन्यस्ततिलद्रोणोपरि स्थितं कौशेयवस्त्रसंवीतमुपर्यारूढमार्तण्डप्रतिमं शय्यामाल्येक्षुफलादिपूर्णकुम्भाष्टकसर्वोपस्करयुतममुकगोत्राय गुरवे संप्रददे ' इति तद्धस्ते जलं क्षिपेत् । ' दानप्रतिष्ठार्थं सुवर्णदक्षिणां संप्रददे ' इति दक्षिणां दत्त्वा ऋत्विगादिभ्यो गाः शय्याद्युपकरणं च गुरवे दत्त्वा पुण्याहवाचनादिग्रहविसर्जनाद्यन्तं कृत्वा ब्राह्मणान्भोजयेत् ॥

इति हिरण्याश्वदानप्रयोगः ।

अथ हिरण्याश्वरथदानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पुण्यमश्वरथं नाम महापातकनाशनम् ॥

पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं तद्वत्तुलापुरुषदानवत् ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ।
कृष्णाजिने तिलान्कृत्वा काञ्चनं कारयेद्रथम् ॥
अष्टाश्वं चतुरश्वं वा चतुश्चक्रं सकूबरम् ।
ऐन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम् ॥
लोकपालाष्टकोपेतं पद्मरागदलाऽन्वितम् ।

तिला द्रोणमिताः ।

आभाराद्विपलादूर्ध्वं शक्तितः कारयेद्बुधः ।

भारः पलसहस्रद्वयम्—

स्त्रियां तुला पलशतं भारः स्याद्विंशतिस्तुलाः ।

इत्यभिधानात् ।

'एतच्च सुवर्णमानकूबरध्वजपुरुषलोकपालाश्वचक्ररक्षकसहितस्य' इति निबन्धकृतः । कूबरो युगाधारकाष्ठम् । लोकपाललक्षणं ब्रह्माण्डे उक्तम् ।

चत्वारः पूर्णकलशा धान्यान्यष्टादशैव तु ।
कौशेयवस्त्रसंवीतमुपरिष्टाद्वितानकम् ॥
माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम् ।

पुरुषेणेष्टदेवताप्रतिमया समन्वितमधिष्ठितम् ।

छत्रचामरकौशेयवस्त्रोपानहपादुकाः ।
गोभिर्विभवतः सार्द्धं दद्याच्च शयनादिकम् ॥
अश्वाष्टकेन संयुक्तं चतुर्भिरथवाजिभिः ।
द्वाभ्यामथ युतं दद्याद्धेमसिंहध्वजान्वितम् ॥

'अष्टाऽश्वं चतुरश्वं वेति काञ्चनाश्वपरम् । अष्टाश्वकेनेत्यादि तु प्रत्यक्षाश्वपरमिति भेदः । तत्राश्वद्वयपक्षे हेममयसिंहाङ्कितध्वजयुक्तरथ इति' अवशिष्टपक्षद्वये काञ्चनाश्वोक्तेन्द्रनीलकुम्भाङ्कितध्वजयुक्तरथ इति व्यवस्था ।

यत्तु हेमाद्रौ 'सप्ताश्वकेन संयुक्तम्' इति क्वचित्पाठः स सर्वपुस्तकविसंवादादुपेक्ष्यः । एतेन यत्केनचिदेतत्पाठालम्बनेनोक्तम् 'अष्टाश्वमित्यनेन पौनरुक्त्याभावादुभयत्रापि हैमा एवाश्वा ग्राह्या न क्वचिदपि स्वाभाविकाः' इति तदप्यपास्तम् । चतुर्भिरथवाजिभिरित्यस्य चतुरश्वं वेत्यनेन पौनरुक्त्यस्यापरिहाराच्च ।

चक्ररक्षावुभौ तस्य तुरगस्थावथाश्विनौ ।

चक्ररक्षौ चक्रसमीपस्थावश्विनौ कार्यौ ।
तल्लक्षणमुक्तं तुलायाम्—

पुण्यकालं ततः प्राप्य पूर्ववत्स्नापितो द्विजैः ।
त्रिःप्रदक्षिणमावृत्त्य गृहीतकुसुमाञ्जलिः ॥
शुक्लमाल्याम्बरो दद्यादिमं मन्त्रमुदीरयेत् ।

मन्त्रः प्रयोगे ज्ञेयः ।

इति तुरगरथदानमेतद्भवभयसूदनकारि यः करोति ।
स कलुषपटलैर्विमुक्तदेहः परममुपैति पदं पिनाकपाणेः ॥

देदीप्यमानवपुषा विजितप्रभाव-
माक्रम्य मण्डलमखण्डमचण्डरश्मेः ।
सिद्धाङ्गनानयनषट्पदपीयमान-
वक्त्राम्बुजोऽम्बुजभवेन चिरं सहास्ते ॥

इति हिरण्याऽश्वरथदानम् ।

अथ प्रयोगः । यजमानोऽद्येत्याद्युक्त्वा 'सकलकलुषपटलविमुक्तिभवभयाभावपूर्वकपिनाकपाणिपरमपदप्राप्तिकामो देदीप्यमानस्ववपुःप्रभाविजितचन्द्रमण्डलाक्रमणसिद्धाऽङ्गनानयनषट्पदपेपीयमानवदनाम्बुजत्वपूर्वकचिरकालब्रह्मसहवासकामो वा श्वो हिरण्याश्वरथमहादानमहं प्रतिपादयिष्ये' इति सङ्कल्प्य गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं प्रकृतिवत्कुर्यात् । ततो गुरुर्वेद्यां षोडशारचक्रादि विरच्य तत्र न्यस्तकृष्णाजिने द्रोणपरिमितान्तिलान्स्थापयित्वा तदुपरि प्रागुक्तकूबरध्वजपुरुषादिभिरष्टभिश्चतुर्भिर्वाऽश्वैः सह यथा सुवर्णघटितं चतुश्चक्रमिन्द्रनीलमयकुम्भाङ्कितहेमध्वजयुतं, प्रत्यक्षाश्वद्वयपक्षे हेमसिंहाङ्कितध्वजसंयुतं प्रागादिदिगष्टकस्थितलोकपालाष्टकप्रतिमायुतं सपद्मरागदलसौवर्णस्वेष्टदेवताप्रतिमाधिष्ठितं चक्रसमीपस्थाश्वारूढचक्ररक्षकाश्विनीकुमारप्रतिमाद्वययुतं प्रागुक्तकुम्भधान्याद्युपेतं सवितानकं यथाशक्ति क्लृप्तगवीभिर्युतं प्रत्यक्षैरष्टाभिश्चतुर्भिर्वाश्वैर्द्वाभ्यां वा प्रत्यक्षाश्वाभ्यां युतं रथं स्थापयेत् । ततो 'हिरण्याश्वरथाय नमः' इति संपूज्योपरि वितानं बध्नीयात् । ततः कुम्भसमीपस्थकुम्भस्थापनपूर्णाहुत्यभिषेकान्तं प्रकृतिवत् ॥ एवमभिषिक्तो यजमानो गृहीतकुसुमाञ्जलिस्तं त्रिःप्रदक्षिणीकृत्य,

नमो नमः पापविनाशनाय विश्वात्मने वेदतुरङ्गमाय ।
धामामधीशाय भवाय जेत्रे पापौघदावानल देहि शान्तिम् ॥

वस्वष्टकादित्यमरुद्गणानां त्वमेव धाता परमं निधानम् ।
यतस्ततो मे हृदयं प्रयातु धर्मैकतानत्वमघौघनाशात् ।

इति मन्त्रमुक्त्वा पुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्योपविश्याद्येत्याद्युक्त्वा सकलकलुषेत्यादिसङ्कल्पान्ते 'गुर्वृत्विग्भ्यो ब्राह्मणेभ्य इमं हिरण्याश्वरथं हैमाष्टाश्वं हैमचतुरश्वं वा सर्वोपस्करसहितमहं संप्रददे न मम' इति तद्धस्ते पुनर्जलं क्षिपेत् । 'कृतैतद्दानप्रतिष्ठार्थमेतान्सुवर्णान्युष्मभ्यमहं संप्रददे' इति वदेत् । अत्राप्यल्पद्रव्यत्वे एकाग्निविधानादिकं ज्ञेयम् । ततः पुण्याहवाचनदेवताविसर्जनान्तं कृत्वा प्रकृतिवद्ब्राह्मणान्भोजयेत् ।

इति हिरण्याश्वरथदानम् ।

अथ हेमहस्तिरथदानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम् ।
यस्य प्रसादाद्भवनं वैष्णवं याति मानवः ॥
पुण्यां तिथिमथासाद्य तुलापुरुषदानवत् ।
विप्रवाचनिकं कुर्याल्लोकेशावाहनं बुधः ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ।
अत्राप्युपोषितस्तद्वद्ब्राह्मणैः सह भोजनम् ॥
कुर्यात्पुष्यरथाकारं काञ्चनं मणिमण्डलम् ।
वलभीभिर्विचित्राभिश्चतुश्चक्रसमन्वितम् ॥
लोकपालाष्टकोपेतं शिवार्कब्रह्मसंयुतम् ।
मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम् ॥
कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्रथम् ।
तथाऽष्टादश धान्यानि भाजनासनचन्दनैः ॥
दीपिकोपानहच्छत्रदर्पणं पादुकान्वितम् ।
ध्वजे तु गरुडं कुर्यात्कूबराग्रे विनायकम् ॥
नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ।
कौशेयं पञ्चवर्णं च अम्लानकुसुमान्वितम् ॥
चतुर्भिः कलशैः सार्द्धं गोभिरष्टाभिरन्वितम् ।
चतुर्भिर्हेममातङ्गैर्मुक्तादामविभूषितैः ॥

स्वरूपतः करिभ्यां च युक्तं कृत्वा निवेदयेत् ।
कुर्यात्पञ्चपलादूर्ध्वमाभारादपि शक्तितः ॥
तथा मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत् ।

मन्त्रः प्रयोगे ज्ञेयः ।

इत्थं प्रणम्य कनकेन रथप्रधानं
यः कारयेत्सकलपापविमुक्तदेहः ।
विद्याधरामरमुनीन्द्रगणाभिजुष्टं
प्राप्नोत्यसौ पदमतीन्द्रियमिन्दुमौलेः । इति ॥

पुष्यरथः क्रीडारथः । स चोपर्याच्छादितो भवति । वलभ्यो लोकपालाश्रयाः । उपरितनलघुगृहाणीति दामोदरः । लोकपालशिवार्कब्रह्मलक्षणानि प्रागुक्तानि ।

नारायणप्रतिमा नारदपञ्चरात्रे—

नारायणं चतुर्बाहुं शङ्खचक्रे तथोत्तरे ।
दक्षिणे तु गदापद्मे नीलजीमूतसन्निभम् ॥
वामे श्रीर्वल्लकीहस्ता पुष्टिः पद्मकरा परे ॥

उत्तरे शङ्खमधः, उपरि चक्रम् । दक्षिणे उपरि गदा, पद्ममधः इति । वामे वामभागे । अपरे दक्षिणे भागे ।

गरुडस्तु—

उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः ।
सव्यजानुगतो भूमौ मूर्द्धा च फणमण्डितः ॥
पक्षिजङ्घो नरग्रीवस्तुङ्गनासो नराङ्गकः ।
द्विबाहुपक्षयुक्तश्च कर्तव्यो विनतासुतः । इति ॥

विनायकोऽपि—

चतुर्भुजस्त्रिनेत्रश्च कर्तव्योऽत्र गजाननः ।
नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः ॥
दन्तं दक्षकरे दद्याद्द्वितीये चाक्षसूत्रकम् ।
तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा । इत्यर्थः ॥

पञ्चपलादिसुवर्णपरिमाणं ध्वजगरुडविनायकादिप्रतिमासहितस्य

रथस्य । अत्राऽधिवासनं हेमहस्तिसहितरथस्यैव । स्वरूपहस्तिनोस्तु बहिरेव स्थापनम् ।

अथ प्रयोगः । यजमानो देशकालौ सङ्कीर्त्य 'सर्वपापक्षयानन्तरसंभावितनरकनिवासयातनाभितप्तत्रासादिसकलबन्धूद्धरणपूर्वकविष्णुसदननयनसमनन्तरस्वविष्णुपदप्राप्तिपूर्वकविद्याधरामरेन्द्रादिसेवितेन्दुमौलिपदप्राप्तिकामः श्वो हेमहस्तिमहादानमहं प्रतिपादयिष्ये ' इति संकल्प्य प्रकृतिवद्गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं सर्वं कुर्यात् । ततो गुरुर्वेद्यां षोडशारं विरच्य तदास्तीर्णकृष्णाजिनन्यस्ततिलद्रोणोपरिपलपञ्चकादाभारान्तं यथाशक्ति सुवर्णेन गजध्वजलोकपालशिवार्कब्रह्मनारायणादिप्रतिमाभिः सह निर्मितं हेमहस्तिचतुष्टययुतं गरुडाधिष्ठितध्वजाग्रन्थिविनायकाधिष्ठितकूबरं परितः स्थापितधान्याद्युपस्करं प्रत्यक्षगजद्वयोपेतं सवितानकं रथं स्थापयित्वा ॐ हेमहस्तिरथाय नमः इति संपूज्योपरि वितानं बध्नीयात् । ततः कुण्डसमीपस्थकुम्भस्थापनादिपूर्णाहुत्यभिषेकान्तं प्रकृतिवत् । एवमभिषिक्तो यजमानः सपुष्पाञ्जलिस्त्रिःप्रदक्षिणं प्रक्रम्य—

नमो नमः शङ्करपद्मजार्कलोकेशविद्याधरवासुदेवैः ।
त्वं सेव्यसे वेदपुराणयज्ञ तेजोमय स्यन्दन पाहि तस्मात् ॥

यत्तत्पदं परमगुह्यतमं मुरारे-
रानन्दहेतुगुणरूपविमुक्तमन्तः ।
योगैकमानसदृशो मुनयः समाधौ
पश्यन्ति तत्त्वमसि नाथ रथेन रूढः ॥

यस्मात्त्वमेव भवसागरसंप्लुताना-
मानन्दभाण्डभृतमध्वरपारमात्रम् ।
तस्मादघौघशमनेन कुरु प्रसादं
चामीकरेभरथमाधवसंप्रदानात् ॥

इति मन्त्रैरावाह्य पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमभागे उपविश्य प्रागुक्तदानसङ्कल्पमुच्चार्य ' गुर्वृत्विग्भ्य इमं हेमहस्तिरथं प्रागुक्तसकलोपस्करसहितं प्रत्यक्षगजद्वययुक्तं युष्मभ्यमहं संप्रददे ' इति गुर्वादिभ्यो दत्त्वा सुवर्णं दक्षिणां दद्यात् । विभागः प्राकृतः । स्वस्तिवाचनादिविप्रभोजनान्तं प्राकृतम् । द्रव्याल्पत्वेन एकाग्निविधानमिति केचित् ।

इति हेमहस्तिरथदानम् ।

अथ पञ्चलाङ्गलदानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिमथासाद्य युगादिग्रहणादिकीम् ।
भूमिदानं नरो दद्यात्पञ्चलाङ्गलकान्वितम् ॥
खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनम् ।
निवर्तनशतं वाऽपि तदर्द्धं वाऽपि शक्तितः ॥
सारदारुमयान्कृत्वा हलान्पञ्च विचक्षणः ।
सर्वोपकरणैर्युक्ताँस्तथान्यान्पञ्च काञ्चनान् ॥
कुर्यात्पञ्चपलादूर्ध्वमासहस्रपलावधि ।
वृषान्लक्षणयुक्तांश्च दशैव च धुरन्धरान् ॥
सुवर्णश्रृङ्गाभरणान्मुक्तालाङ्गलभूषितान् ।
रौप्यपादाग्रतिलकान्रक्तकौशेयभूषणान् ॥
स्रग्दामचन्दनयुताञ्शालायामधिवासयेत् ।
पर्जन्यादित्यरुद्रेभ्यः पायसं निर्वपेच्चरुम् ॥
एकस्मिन्नेव कुण्डे तु गुरुर्यस्मै निवेदयेत् ।
पालाशसमिधस्तद्वदाज्यं कृष्णतिलाँस्तथा ॥
तुलापुरुषवत्कुर्याल्लोकेशावाहनं ततः ।
ततो मङ्गलशब्देन शुक्लमाल्याम्बरो बुधः ॥
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुलीयकैः ।
कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ॥
ततः प्रदक्षिणं कुर्याद्गृहीतकुसुमाञ्जलिः ।
इममुच्चारयेन्मन्त्रमथ सर्वं निवेदयेत् ॥

मन्त्रः प्रयोगे ज्ञेयः ।

सप्तहस्तेन दण्डेन त्रिंशद्दण्डनिवर्तनम् ।
त्रिभागहीनं गोचर्म मानमाह प्रजापतिः ॥
मानेनानेन यो दद्यान्निवर्तनशतं बुधः ।
विधिनाऽनेन तस्याशु क्षीयते पापसंहतिः ॥
तदर्द्धमपि यो दद्यादपि गोचर्ममात्रकम् ।

भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥

खर्वटादिलक्षणं मार्कण्डेये—

सोत्सेधवप्रप्राकारं सर्वतः खानकावृतम् ।
योजनार्द्धार्द्धविष्कम्भमष्टभागायतं पुरम् ॥
तदर्द्धेन तथा खेटं तत्पादोनं च खर्वटम् ।
तथा शूद्रजनप्रायं सुसमृद्धकृषीवलम् ॥
क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञिता ।
यावन्ति लाङ्गलविभागमुखानि भूमे-
र्भासांपतेर्दुहितुरंगजरोमकाणि ॥
तावन्ति शङ्करपुरे स समा हि तिष्ठे-
द्भूमिप्रदानमिह यः कुरुते मनुष्यः । इति ॥

अथ प्रयोगः । यजमानोऽद्येत्यादि 'सकलपातकक्षयानन्तरगन्धर्वकिन्नरसुरासुरसिद्धसङ्घसेवितावधूतचामरविमानाधिष्ठानपूर्वकस्वीयामरनायकत्वपूर्वकपितृपितामहादिबन्धुसहितशम्भुपुरगमनानन्तरैतद्देयभूलाङ्गलमुखोत्कीर्णरजःसहितहलसम्बद्धवृषरोमसङ्ख्यवर्षावच्छिन्नशम्भुपुरनिवासकामः श्वः पञ्चलाङ्गलमहादानं प्रतिपादयिष्ये' इति कृतसङ्कल्पः प्रकृतिवद्गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं सर्वं कुर्यात् । ततो गुरुः षोडशारे सारदारुमयानि पञ्च हलानि युगयोक्त्ररज्जुफालतोदाद्युपाकरणयुतानि काञ्चनोपकरणसहितानि काञ्चननिर्मितानि पञ्च हलानि तूलीताम्बूलाद्युपकरणसहितां शय्यां गामेकां दोग्ध्रीं परितोऽष्टादश धान्यानि मण्डपाद्बहिर्गोसहस्रोक्तलक्षणान्वृषान्सालङ्कारान्सोपस्करानधिवास्य वेद्युपरि वितानं बद्ध्वा, 'हलेभ्यो नमः' इति मन्त्रेण संपूज्य कुण्डाभ्याशे कलशस्थापनादिवनस्पतिपर्यन्तप्रधानहोमान्तं संपादयेत् । ततो गुर्वाज्ञया चतुर्णामन्यतम ऋत्विक् स्वकीये कुण्डे 'पर्जन्यायाऽऽदित्येभ्यो रुद्राय जुष्टं निर्वपामि' इतितत्तद्देवतायै प्रत्येकं चरुं निरूप्य पयसि श्रपयित्वा तेन पालाशसमिद्भिः स्रौवेणाऽऽज्येन श्यामतिलैश्च पर्जन्यादित्यरुद्रेभ्यस्तल्लिङ्गकैर्मन्त्रैः प्रत्येकमष्टाविंशतिर्जुहुयात् । तत्र ऋग्वेदिनाम् 'अच्छा वद' इतिपर्जन्यमन्त्रः । एवं यजुर्वेदिनाम् 'शन्नो वातः पवताम्' । सामगानाम् 'पर्जन्यः पिता महिषस्य' इति । आथर्वणानाम् 'अभिक्रन्दस्तनयार्द्रथोदधि' इति । आदित्यरुद्रयोस्तु मन्त्रास्तत्तच्छाखीयाः

सामान्यप्रयोगे पूर्वमुक्ताः । ततः स्विष्टकृदाद्यभिषेकान्तं, ततो यजमानः सपुष्पे लाङ्गलानि त्रिःप्रदक्षिणीकृत्य—

यस्माद्देवगणाः सर्वे स्थावराणि चराणि च ।
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवाऽस्तु मे ॥
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोडशीम् ।
दानान्यन्यानि मे भक्तिर्धर्मे एव दृढा भवेत् ॥

इत्युक्त्वा पुष्पाणि हलेषु क्षिप्त्वा नत्वा च वेदिपश्चिमत उपविश्य सपत्नीकं गुरुमुपवेश्याद्येत्यादिप्रधानसंकल्पकीर्तनान्तेऽमुकगुरवे तुभ्यं भूमिसहितानि धुरन्धरवृषशय्यादिसर्वोपस्करसहितानि सुवर्णसारदारुमयान्युभयविधानि हलानि संप्रददे इति दद्यात् । दक्षिणां च, ऋत्विग्भ्योऽन्या दक्षिणा । स्वल्पेष्वेकाग्निविधानमिति केचित् । पुनः पुण्याहवाचनानन्तरपूजादेवताविसर्जनविप्रभोजनानि प्रकृतिवत् ।

इति पञ्चलाङ्गलदानप्रयोगः ।

अथ धरादानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पापक्षयकरं नृणाममङ्गल्यविनाशनम् ॥
कारयेत्पृथिवीं हैमीं जम्बूद्वीपानुकारिणीम् ।
मर्यादापर्वतवतीं मध्ये मेरुसमन्विताम् ॥
लोकपालाष्टकोपेतां नववर्षसमन्विताम् ।
नदीनदसमोपेतामन्ते सागरवेष्टिताम् ॥
महारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम् ।
हेम्नः पलसहस्रेण तदर्द्धेनाथ शक्तितः ॥
शतत्रयेण वा कुर्याद्द्विशतेन शतेन वा ।
कुर्यात्पञ्चपलादूर्ध्वमशक्तोऽपि विचक्षणः ॥
पलसहस्रादिमानं प्रतिमादिसहितायाः पृथिव्याः ।
तुलापुरुषवत्कुर्याल्लोकेशावाहनं ततः ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादानादिकम् ।
वेद्यां कृष्णाजिनं कृत्वा तिलानामुपरि न्यसेत् ॥

तथाष्टादश धान्यानि रसाँश्च लवणादिकान् ।
तथाष्टौ पूर्णकलशान्समन्तात्परिकल्पयेत् ॥
वितानकं च कौशेयं फलानि विविधानि च ।
इत्येवं रचयित्वा तामधिवासनपूर्वकम् ॥
पुण्यं कालमथाऽऽसाद्य मन्त्रानेतानुदीरयेत् ।

मन्त्राः प्रयोगे ज्ञेयाः ।

एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ।
धरार्द्धं वा चतुर्भागं गुरवे विनिवेदयेत् ॥
शेषं चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्जयेत् । इति ॥
'एकहस्तेन कर्तव्या चतुरस्रा सुशोभना' ।

इति हेमाद्रिरूपनारायणादिभिश्चतुरस्रोक्ता । 'त्रिकोणा' दानसौख्ये क्षामोदरीये च । 'परिमण्डला' इत्यन्ये ।

अनेन विधिना यस्तु दद्याद्धेमधरां शुभाम् ।
पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवम् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमसौ रमेत् ॥
पुत्रपौत्रप्रपौत्राँश्च तारयेदेकविंशतिम् । इति ॥

पृथिवीं हैमीं कुर्यादित्युक्ते सप्तद्वीपवत्याः करणप्रसङ्गे जम्बूद्वीपानुकारिणीमिति विशेषणम् । जम्बूद्वीपानुसादृश्येऽपि नानापर्वतसरोवराद्यन्वितानुकारित्वप्रसङ्गे मर्यादापर्वतवतीमित्युक्तम् । तावता मेरोरकरणप्रसङ्गे मध्ये मेरुसमन्वितामित्युक्तम् । जम्बूद्वीपलक्षणं विष्णुपुराणे—

नववर्षं तु मैत्रेय जम्बूद्वीपमिदं मया ।
लक्षयोजनविस्तारं सङ्क्षेपात्कथितं तव ॥
जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय वलयाकारः स्थितः क्षीरोदधिर्बहिः ॥
जम्बूद्वीपं समस्तानां द्वीपानां मध्यतः स्थितम् ।
तस्यापि मेरुर्मैत्रेय मध्ये कनकनिर्मितः ॥
चतुरशीतिसाहस्रैर्योजनैरस्य चोच्छ्रयः ।
प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥
मूले षोडशसाहस्रो विस्तारस्तस्य सर्वतः ।

तथा—

मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतः ॥
इलावृतं महाभाग चत्वारश्चात्र पर्वताः ।
विष्कम्भा रचिता मेरोर्योजनायतविस्तृताः ॥
पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः ।
वैभ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥

मर्यादापर्वतास्तु ब्रह्माण्डे—

जाठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ ।
तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥
कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ ।
पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥
त्रिशृङ्गो जारधिश्चैव उत्तरे वर्षपर्वतौ ।
पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥
निषधः पारिजातश्च पश्चिमे वर्षपर्वतौ ।
तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥

इलावृतस्योभयपार्श्ववर्तिनौ नीलनिषधौ द्वौ पर्वतौ दैर्घ्येण लक्षयोजनौ।
वर्षाण्यप्युक्तानि ब्रह्माण्डे—

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणे ।
एतद्वै भारतं नाम भारती यत्र सन्ततिः ॥
भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज ॥
रम्यकं चोत्तरे वर्षं तस्य चानु हिरण्मयम् ।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥
मेरोः पूर्वेण भद्राश्वं केतुमालं तु पश्चिमे ।
वर्षे द्वे तु समाख्याते तयोर्मध्यमिलावृतम् ॥
नवसाहस्रमेतेषामेकैकं द्विजसत्तमाः ।

अथ प्रयोगः। कर्ताऽद्येत्याद्युक्त्वा 'सर्वपापाऽमङ्गलनिवृत्तिपितृपुत्राद्येकविंशतिस्वपुरुषोद्धारणपूर्वककिङ्किणीजालमालिसौवर्णविमानकरणकनारायणपुरगमनानन्तरकल्पत्रयावच्छिन्ननारायणपुरनिवासकामः श्वो धरामहादानमहं प्रतिपादयिष्ये' इति प्रधानसङ्कल्पादिषोडशाद्यलिखनान्तं

प्रकृतिवत्। तदुपरि कृष्णाजिनमास्तीर्य तत्र द्रोणमिताँस्तिलानासाद्य तदुपरि प्रागुक्तलक्षणां मेरोरुपरि पूर्वादिक्रमेण लोकपालाष्टकोपेतां महारत्नयुतां वसुरुद्रादित्यप्रतिमोपेतां धरां स्थापयेत्। तस्याश्च परितः प्रागुक्तधान्यकुम्भाष्टकोपेतनानाविधफलवासःप्रभृतीन् स्थापयेत्। 'धरायै नमः' इति पूजयेदुपरि वितानं बध्नीयाच्च। ततः कुण्डसमीपस्थकुम्भस्थापनादिपूर्णाहुत्यभिषेकान्तं प्रकृतिवत्। एवमभिषिक्तो यजमानस्तां त्रिःप्रदक्षिणीकृत्य पुष्पाण्यादाय—

नमस्ते सर्वभूतानां त्वमेव भवनं यतः।
धात्री च सर्वभूतानामतः पाहि वसुन्धरे॥
वसु धारयसे यस्माद्वसु चातीव निर्मलम्।
वसुन्धरा ततो जाता तस्मात्पाहि भयादलम्॥
चतुर्मुखोऽपि नो गच्छेद्यस्मादन्तं तवाऽचले।
अनन्तायै नमस्तस्मात्पाहि संसारकर्दमात्॥
त्वमेव लक्ष्मीर्गोविन्दे शिवे गौरीति संस्थिता।
गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चेन्दौ रवौ प्रभा॥
बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता।
विश्वं प्राप्य स्थिता यस्मात्ततो विश्वम्भरा स्मृता॥
धृतिः स्थितिः क्षमा क्षोणी पृथ्वी वसुमती रसा।
एताभिर्मूर्तिभिः पाहि देवि संसारसागरात्॥

इत्यभिमन्त्र्य पुष्पाणि प्रक्षिप्य नत्वोदङ्मुखान्ब्राह्मणानुपवेश्याऽद्येत्याद्युक्त्वा सर्वपापेत्यादिनारायणपुरनिवासकाम इत्यन्तं प्रतिज्ञावदुच्चार्य इमां कृष्णाजिनन्यस्ततिलोपरिविन्यस्तां पञ्चपलाधिकयथाशक्तिहेमसपरिकरनिर्मितां जम्बूद्वीपानुकारिणीं मर्यादापर्वतमध्यमेरुनववर्षलोकपालाष्टकनदीनदशतयुतां सप्तसागरवेष्टितां फलधान्यवस्त्रादिप्रतिमाद्युपेतां धरां विष्णुदैवतां युष्मभ्यमहं संप्रददे इति दद्यात्। अर्द्धं तुरीयांशं वाऽऽचार्याय शिष्टमृत्विग्भ्यः। प्रकृतिवद्विभाग इति केचित्। नृपकर्तृके दाने ग्रामादिदक्षिणा, अन्यकर्तृके तु यथाशक्ति सुवर्णम्। स्वल्पे त्वेकाग्निविधानमिति केचित्। ब्राह्मणवाचनदेवतापूजनविसर्जनविप्रभोजनानि प्रकृतिवत्।

इति धरादानप्रयोगः।

अथ विश्वचक्रदानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
विश्वचक्रमिति ख्यातं सर्वपापप्रणाशनम् ॥
तपनीयस्य शुद्धस्य विषुवादिषु कारयेत् ।
श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ॥
तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशपलादूर्ध्वमशक्तोऽपि निवेदयेत् ॥

वक्ष्यमाणविष्ण्वादिप्रतिमासहितस्य विश्वचक्रस्येदं मानम् ।

षोडशारं ततश्चक्रं भ्रमन्नेम्यष्टकावृतम् ॥

अरा नाभिस्पृष्टमूला नेमिस्पृष्टाग्राः शलाकाः । भ्रमन्तीनां वलयाकाराणां नेमीनां चक्रावयवानामष्टकेनावृतं वेष्टितमित्यर्थः ।

नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजम् ।

नाभिपद्मे नाभिरूपाष्टदलपद्मकर्णिकायामित्यर्थः । अष्टसु दलेष्वावरणरूपदेवताष्टकस्य सन्निवेशात् । 'शङ्खचक्रेऽस्य पार्श्वे तु देव्यष्टकसमायुतम्' । योगारूढं हृत्प्रवेशावस्थितसंपुटाकारहस्तद्वयम् ।

अष्टौ देव्योऽपि पञ्चरात्रे—

विमलोत्कर्षणी ज्ञाना क्रिया योगा तथैव च ।
प्रह्वी सत्या तथेशाना अष्टौ च परितो हरेः ॥
वरदा दक्षहस्तेन वामहस्तधृतायुधाः ।
प्रशस्ततरुणीरूपा अष्टौ देव्यः प्रकीर्तिताः ॥

दक्षो दक्षिणः, आयुधं चक्रमिति दामोदरः ।

द्वितीयावरणे तद्वत्पूर्वतो जलशायिनम् ॥
अत्रिर्भृगुर्वसिष्ठश्च ब्रह्मा कश्यप एव च ।
मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ॥
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते क्रमात् ।
तृतीयावरणे गौरी मातृभिर्वसुभिर्युता ॥
चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ।
पञ्चमे पञ्च भूतानि रुद्राश्चैकादशैव तु ॥
लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च ।

सप्तमेऽस्त्राणि सर्वाणि मङ्गलानि च कारयेत् ॥
अन्तरान्तरतो देवान्विन्यसेदष्टमे पुनः ।
तुलापुरुषवच्छेषं समन्तात्परिकल्पयेत् ॥
कृष्णाजिने तिलादीनि धान्यवासःफलानि च ।
होमाधिवासनान्ते तु गृहीतकुसुमाञ्जलिः ॥

होम इत्यादिचक्राधिष्ठितविष्ण्वादिदैवत्यहोमविधानार्थः, स च होमस्तत्तन्मन्त्रैर्नाममन्त्रैर्वा प्राकृतग्रहादिहोमोत्तरं कार्यः । आगन्तूनामन्ते निवेशः इति केचित् । तन्न । प्राकृतहोमानुवादकतया विधायकत्वाभावात् ।

इममुच्चारयेन्मन्त्रं त्रिःकृत्वाऽथ प्रदक्षिणम् ।

मन्त्रः प्रयोगे ज्ञेयः ।

इत्यामन्त्र्य तु यो दद्याद्विश्वचक्रं विमत्सरम् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥
वैकुण्ठलोकमासाद्य चतुर्बाहुः सनातनः ।
सेव्यतेऽप्सरसां सङ्घैस्तिष्ठेत्कल्पशतत्रयम् ॥
प्रणमेद्वा स्वयं कृत्वा विश्वचक्रं दिने दिने ।
तस्याऽऽयुर्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥
इति सकलसुरासुराधिवासं
वितरति यस्तपनीयषोडशारम् ।
हरिभवनमुपागतः स सिद्धै-
श्चिरमधिगम्य नमस्यते शिरोभिः । इति ॥

जलशायी ब्रह्माण्डदाने उक्तः । ऋषिरूपं पञ्चरात्रे—

जटिलाः श्मश्रुलाः शान्ताः कृशा धमनिसन्तताः ।
कुण्डिकाक्षधराः कार्या ऋषयो द्विभुजाः सदा ॥

धमनिः शिरा । कुण्डिका कमण्डलुः । अक्षोऽक्षमाला ।

मत्स्यादयः पञ्चरात्रे—

वामे शङ्खं गदां दक्षे द्विभुजो मत्स्यरूपधृक् ।
नराङ्घ्रिर्मत्स्यरूपोऽधो मत्स्यरूपी जनार्दनः ॥

'अधोऽङ्घ्रौ मत्स्यरूपं वा' इति विकल्पः । दामोदरस्तु 'उक्तायुधकरचरणादियुतपुरुषाकारेण केवलमत्स्याकारेण च विकल्पमाह' ।

कूर्मस्तु कच्छपाकारान्मत्स्यरूपोक्तरूपवान् ।
मधुपिङ्गलवर्णं च चतुर्बाह्वायुधैर्वृतम् ॥

नराङ्गं शूकरास्यं च मनाक्पीनं सुभीषणम् ।
श्रीर्वामकूर्परस्था तु धरानन्तौ पदानुगौ ॥
एतद्रूपधरं देवं वराहं भुक्तिमुक्तिदम् ।

कूर्परं दंष्ट्राग्रमिति दामोदरः ।

ज्वलदग्निसमाकारं सिंहवक्त्रं नराङ्गकम् ।
दंष्ट्राकरालवदनं ललज्जिह्वं सुभीषणम् ॥
वृत्तास्यं जटिलं क्रुद्धमालीढं पीनवक्षसम् ।
अभेद्यतीक्ष्णनखरमात्मसंहृतदानवम् ॥
तद्वक्षो दारयन्तं च कराभ्यां नखरैर्भृशम् ।
गदाचक्रधरं द्वाभ्यां नरसिंहं जगत्प्रभुम् ॥
कुण्डीछत्रधरो द्विदोर्वामनः परिकीर्तितः ।
क्षत्रान्तकरणं घोरमुद्वहन्परशुं करे ॥
जामदग्न्यश्च कर्तव्यो रामो रोषारुणेक्षणः ।
युवा प्रसन्नवदनः सिंहस्कन्धो महाबलः ॥
आजानुबाहुः कर्तव्यो रामो बाणधनुर्द्धरः ।
मद्यपात्रं च सीरं च वामदक्षिणयोः क्रमात् ॥
गदामुसलवज्रं च हली रामः प्रकीर्तितः ।

मुसलरूपं वज्रमित्यर्थः । दक्षिणोर्ध्वाधःकरयोर्मद्यपात्रसीरे । वामयोर्गदामुसले इति चतुर्बाहू रामः ।

शङ्खचक्रधरः श्यामो द्विभुजः कृष्णसंज्ञकः ।
काषायवस्त्रसंवीतः स्कन्धसंसक्तचीवरः ॥
पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्तितः ।
खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः ॥
म्लेच्छोच्छेदकरः कल्की द्विभुजः परिकीर्तितः ।

अथ विश्वचक्रदानप्रयोगः । अधिवासनदिने यजमान उपविश्याऽद्येत्यादिकीर्तनान्ते 'सकलपापक्षयानन्तरविष्णुलोकमहीयमानत्वविशिष्टवैकुण्ठलोकासादनपूर्वकचतुर्बाहुत्वसनातनत्वाप्सरःसङ्घसेव्यमानताविशिष्टकल्पत्रयाऽवधिकतदधिकरणकस्थितिकामोऽहं श्वो विश्वचक्रमहादानं प्रतिपादयिष्ये' इतिकृतसङ्कल्पः प्रकृतिवद्गोविन्दादिपूजादिमण्डपपूजादिगुर्वादिविनियोगान्तं सर्वं कुर्यात् । ततो गुरुर्वेद्यां षोड-

शारचक्रन्यस्तकृष्णाजिने स्थापितद्रोणमिततिलोपरि विश्वचक्रं संस्थाप्य तस्याष्टदलकर्णिकायां विष्णुं, पूर्वादिदलेषु ' विमला उत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना ' इत्यष्टौ । द्वितीयावरणे षोडशकोष्ठेषु 'जलशाय्यत्रिभृगुवसिष्ठब्रह्मकश्यपमत्स्याद्यवतारदशकम्' इति प्रतिमाषोडशकम् । तृतीयावरणे गौरी ब्रह्माणी रौद्री कौमारी वैष्णवी वाराहीन्द्राणीकौशिकीत्यष्टौ, ध्रुवाध्वरसोमानिलनलप्रत्यूषप्रभासाख्यानष्टौ वसून्। चतुर्थावरणे धात्रर्यममित्रवरुणांशभगेन्द्रविवस्वत्पूषपर्जन्यत्वष्टृविष्ण्वाख्यद्वादशादित्यान्वेदचतुष्टयं च । पञ्चमावरणे पञ्च भूतानि पृथिवीवरुणवह्निवायुविनायकात्मकानि वीरभद्रशम्भुगिरिशाजैकपादहिर्बुध्न्यपिनाकिभुवनाधीश्वरकपालिविशाम्पतिस्थाणुभगाख्यान्, एकादश रुद्रांश्च । षष्ठावरणे यथाक्रमतो लोकपालाष्टकम्, ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाः इति दिग्गजाष्टकम् । सप्तमावरणे खड्गचक्रशक्तिपाशध्वजगदाशूलशङ्खकौस्तुभचामरच्छत्रपूर्णकुम्भदीपवृषभरूपाणि स्वर्णखण्डानि । अष्टमावरणे विष्णुदेव्यष्टकजलशाय्यऽत्रिभृगुवसिष्ठब्रह्मकश्यपमत्स्यप्रतिमाषोडशकं स्थापयेत् । चक्रस्य समन्ताद्धान्यरसद्रव्यपूर्णकुम्भाष्टकवस्त्रमाल्येक्षुफलरत्नादीनि वितानकं च बध्नीयात् । ततो ' विश्वचक्राय नमः ' इति पूजयेत् । ततः कुण्डसमीपे कलशस्थापनादिपूर्णाहुत्यभिषेकान्तं प्रकृतिवत् । प्राकृतग्रहादिहोमोत्तरं ' चक्राधिष्ठितविष्ण्वादिभ्यस्तत्तन्मन्त्रैर्नाममन्त्रैर्वाऽष्टाविंशत्यादिसंख्यया होम कार्यः ' इति केचित् । ततोऽभिषिक्तो यजमानो विश्वचक्रं त्रिःप्रदक्षिणीकृत्य—

नमो विश्वमयायेति विश्वचक्रात्मने नमः ।
परमानन्दरूप त्वं पाहि नः पापकर्दमात् ॥
तेजोमयमिदं यस्मात्सदा पश्यन्ति योगिनः ।
हृदि तत्त्वं गुणातीतं विश्वचक्रं नमाम्यहम् ॥
वासुदेवे स्थितं चक्रं चक्रमध्ये तु माधवः ।
अन्योन्याधाररूपेण प्रणमामि स्थिताविह ॥
विश्वचक्रमिदं यस्मात्सर्वपापहरं परम् ।
आयुधं चाधिवासश्च भवादुद्धर मामतः ॥

इतिमन्त्रैरामन्त्र्य पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत उपविश्य पूर्वोक्तं सकलेत्यादिमहासङ्कल्पमुक्त्वा इमं विश्वचक्रं विष्ण्वा-

दिदेवताऽधिष्ठितं विष्णुदैवत्यं युष्मभ्यमहं संप्रददे इति दद्यात् । दान-प्रतिष्ठार्थं सुवर्णं दक्षिणाविभागः प्राक्कृतः । स्वल्पेष्वेकाग्निविधान-मिति केचित् । पुण्याहवाचनदेवताविसर्जनब्राह्मणभोजनानि कुर्यात् ॥

इति विश्वचक्रदानम् ॥

अथ महाकल्पलतादानम् ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलता नाम महापातकनाशनम् ॥
पुण्यां तिथिमथाऽऽसाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
तुलापुरुषवत्कुर्याल्लोकेशावाहनादिकम् ।
चामीकरमयीः कुर्याद्दश कल्पलताः शुभाः ॥

चामीकरं हेम । नानापुष्पफलोपेता नानांशुकविभूषिताः ।

पुष्पफलांशुकानि स्वरूपतः इति केचित् । 'हैमानि' इत्यपरे । हैमलतानां स्वरूपतः पुष्पफलानां योगासंभवात्तानि हैमानि । अंशु-कानि तु कार्पासादीन्येव । हैमोपादाने तत्पदे लक्षणापत्तेरिति तु युक्तं प्रतीमः । अत्र 'फलान्याम्राद्याकाराणि' इतिरूपनारायणः । 'काम-नया पशुपुत्रादिरूपाणि' इतिदामोदररत्नाकरादयः ।

विद्याधरसुपर्णानां मिथुनैरुपशोभिताः ।
हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ॥

सिद्धाः पक्षिमुखाः किन्नराः । विहङ्गमाः पक्षिणो वेतिदामोदरः ।

लोकपालानुसारिण्यः कर्तव्यास्तासु देवताः ।
ब्राह्मीमनन्तशक्तिं च लवणस्योपरि न्यसेत् ॥
अधस्तात्तल्लतयोर्मध्ये पद्मशङ्खधरे उभे ।
इभासनस्था तु गुडे पूर्वतः कुलिशायुधा ॥
रजन्यजस्थिताग्नेयी स्रुवपाणिरथानले ।
याम्ये च महिषारूढा गदिनी तन्दुलोपरि ॥
घृते च नैर्ऋती स्थाप्या सखड्गा दक्षिणाऽपरे ।
वारुणी वारुणीक्षीरे वृषस्था नागपाशिनी ॥
पताकिनी च वायव्ये मृगस्था शर्करोपरि ।

सौम्या तिलेषु संस्थाप्या शङ्खिनी निधिसंस्थिता ॥
माहेश्वरी वृषारूढा नवनीते त्रिशूलिनी ।
मौलिन्यो वरदास्तद्वत्कर्तव्या बालकान्विताः ॥

मध्ये द्वे लते । अष्टदिक्ष्वष्टौ । मध्ययोरधो ब्राह्म्यनन्तशक्ती । अन्यासामधो लोकपालशक्तयः । इभ ऐरावतः । रजन्यजो हरिद्राछागः । निधिः कलशाकारः । बालकान्विताः क्रोडस्थबालाः ।

शक्त्या पञ्चपलादूर्ध्वमासहस्रात्प्रकल्पयेत् ।

सप्रतिमादीनामेतन्मानम्—

सर्वासामुपरिष्टाच्च पञ्चवर्णवितानकम् ।
धेनवो दशकुम्भाश्च वस्त्रयुग्मानि चैव हि ॥
मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च ।
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरावृतः ॥
त्रिःप्रदक्षिणमावृत्य मन्त्रानेतानुदीरयेत् ।

मन्त्रः प्रयोगे ज्ञेयः ।

इति सकलदिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति ।
अभिमतफलदे स नागलोके वसति पितामहवत्सराणि त्रिंशत् ॥
पितृशतमथ तारयेद्भवाब्धेर्भवदुरितौघविनाशशुद्धदेहः ।
सुरपतिवनितासहस्रसंख्यैः परिवृतमम्बुजसंसदाभिवन्द्यः । इति ॥

अथ प्रयोगः । अद्येत्यादि 'सकलपापक्षयविशुद्धदेहत्वपूर्वकदेवगणसहस्रपरिवृतब्रह्माभिनन्द्यपितृशतभवाब्धिसन्तारणानन्तरब्रह्मत्रिंशद्वत्सरावधिकामितफलदनागलोकनिवासकामः श्वः कल्पलतामहादानं प्रतिपादयिष्ये' इति सङ्कल्प्य प्रकृतिवद्गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं सर्वं कुर्यात् । ततो वेदिलिखितचक्रन्यस्तलवणकूटोपरि एकां लतां स्थापयित्वा तन्मूले ब्राह्मीं न्यसेत् । लवणकूट एवापरां लतां स्थापयित्वा तन्मूलदेशे 'आनन्तीं शक्तिम्' पूर्वादिक्रमात् 'गुडहरिद्राछागतन्दुलघृतक्षीरशर्करातिलनवनीतस्थाष्टलतामूलेषु ऐन्द्र्यादिशक्तीः' संस्थाप्य परितो दश पूर्णकुम्भान् दश धेनूर्दश वस्त्रयुगानि फलमाल्यधान्यादीनि च विन्यस्य लतासहिताः शक्तीः प्रतिष्ठापूर्वकं पूजयित्वा ततः कुण्डसमीपस्थकलशस्थापनादिपूर्णाहुत्यभिषेकान्तं प्रकृतिवत् । एवमभिषिक्तो यजमानः कल्पलतास्त्रिःप्रदक्षिणमावृत्य—

नमो नमः पापविनाशिनीभ्यो ब्रह्माण्डलोकेश्वरमालिनीभ्यः ।
आशंसिताधिक्यफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥
इमं मन्त्रमुच्चार्य पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत उपविश्य पूर्वोक्तं महासङ्कल्पमुक्त्वा यथासंभवं विशेषणवैशिष्ट्यमुच्चार्य दद्यात् । स्वल्पद्रव्यत्वपक्षे एकाग्निविधानमिति केचित् । पुण्याहवाचनदेवतापूजनविसर्जनमण्डपादिप्रतिपादनब्राह्मणभोजनादीनि प्रकृतिवत् ।

इति कल्पलतादानम् ।

अथ सप्तसागरदानविधिः ।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम सर्वपातकनाशनम् ॥
कारयेत्सप्त कुण्डानि काञ्चनानि विचक्षणः ।
प्रादेशमात्राणि तथा रत्निमात्राणि वा पुनः ॥
कुर्यात्सप्तपलादूर्ध्वमासहस्राच्च शक्तितः ।
संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि ॥
प्रथमं पूरयेत्कुण्डं लवणेन विचक्षणः ।
द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा पुनः ॥
चतुर्थं तु गुडेनैव दध्ना पञ्चममेव च ।
षष्ठं शर्करया तद्वत्सप्तमं तीर्थवारिणा ॥
स्थापयेल्लवणस्यान्तर्ब्रह्माणं काञ्चनं शुभम् ।
केशवं क्षीरमध्ये च घृतमध्ये महेश्वरम् ॥
भास्करं गुडमध्ये च दधिमध्ये सुराधिपम् ।
शर्करायां न्यसेल्लक्ष्मीं जलमध्ये च पार्वतीम् ॥
सर्वेषु सर्वरत्नानि धान्यानि च समन्ततः ।
तुलापुरुषवच्छेषमत्रापि परिकल्पयेत् ॥
ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य मन्त्रानेतानुदीरयेत् ॥

मन्त्राः प्रयोगे ज्ञेयाः ।

इति सप्तसागरदानविधिः । इति ददाति रसामृतसंयुताञ्छुचिरविस्मयवानिह सागरान् ।

अमलकाञ्चनवर्णमयानसौ पदमुपैति हरेरमरार्चितः ॥
सकलपापविधौतविराजितः पितृपितामहपुत्रकलत्रकम् ।

पुत्रशतत्रयमिति वाचस्पतिमिश्रः पपाठ । पुत्रकलत्रकमिति रत्नाकरदामोदरादयः । नरकलोकसमाकुलमप्ययं झटिति सोऽपि नयेच्छिवमन्दिरम्, इत्यादि । 'प्रादेशान्तिकमात्राणि' इति तिर्यगूर्ध्वम् । 'रत्निरङ्गुष्ठपर्वाणि प्रादेशः परिकीर्तितः । 'सार्द्धदशाङ्गुलः प्रादेशः' इति कल्पतरुः । ब्रह्मादिप्रतिमा ब्रह्माण्डदानादौ दर्शिताः ।

अथ सप्तसागरदानप्रयोगः । यजमानोऽद्येत्यादि 'कलुषक्षयसंभावितनरकनिवासपितृपितामहपुत्रकलत्रशिवमन्दिरनयनपूर्वकामरामृतत्वविशिष्टस्वीयहरिपदप्राप्तिकामः श्वः सप्तसागरमहादानमहं प्रतिपादयिष्ये इतिसङ्कल्प्य गोविन्दादिपूजादिमण्डपपूजागुर्वादिविनियोगान्तं प्रकृतिवत् । ततश्चक्रासादितकृष्णाजिनन्यस्ततिलद्रोणे हैमानि सप्त कुण्डानि संस्थाप्य क्रमेण लवणदुग्धघृतगुडदधिशर्करातीर्थवारिभिः पूरयित्वा तेषु ब्रह्मकेशवमहेश्वरभास्करसुराधिपलक्ष्मीपार्वतीप्रतिमाः स्थापयेत् । परितोऽष्टादश धान्यानि वितानकं चोपरि सब्रह्मादीन् सागरान्पूजयेत् । ततः कुण्डसमीपस्थकलशस्थापनादिवनस्पतिहोमान्तं प्रतिकुण्डमष्टाविंशत्यष्टोत्तरशताष्टोत्तरसहस्रान्यतमसंख्यया स्वस्वशाखीयैर्वारुणैर्मन्त्रैस्तिलान्हुत्वा स्विष्टकृदादिपूर्णाहुत्यभिषेकान्तं प्राकृतं कुर्युः । एवमभिषिक्तो यजमानः सागरांस्त्रिःप्रदक्षिणीकृत्य—

नमो वः सर्वसिन्धूनामाधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥
क्षीरोदकाज्यदधिमाधुरलावणेक्षु-
सारामृतेन भुवनत्रयजीवसङ्घान् ।
आनन्दयन्ति वसुभिश्च यतो भवन्त-
स्तस्मान्ममाऽप्यघविघातमलं विधध्वम् ॥
यस्मात्समस्तभुवनेषु भवन्त एव
तीर्थामरासुरसुबद्धमणिप्रदानम् ।
पापक्षयामृतविलेपनभूषणाय
लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः ॥

इति मन्त्रैरनुमन्त्र्य पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत उपविश्य

देशकालकीर्तनान्ते सकलकलुषक्षयेत्यादिमहासङ्कल्पमुक्त्वा सप्तसागरान्ब्रह्मादिप्रतिमासहितान्सोपस्करान्विष्णुदैवतांस्तुलापुरुषमत्स्यपुराणीयभागव्यवस्थया युष्मभ्यमहं संप्रददे न ममेति सुवर्णदक्षिणां दद्यात्। स्वल्पे त्वेकाग्निरिति केचित्। ततः पुण्याहवाचनग्रहादिपूजाविसर्जनब्राह्मणभोजनानि कुर्यात्।

इति सप्तसागरदानविधिः।

अथ रत्नधेनुदानविधिः।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम्॥
पुण्यां तिथिमथासाद्य तुलापुरुषदानवत्।
लोकेशावाहनं तद्वत्ततो धेनुं प्रकल्पयेत्॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम्।
धेनुं रत्नमयीं कृत्वा सङ्कल्पविधिपूर्वकम्॥
स्थापयेत्पद्मरागाणामेकाशीतिमुखे बुधः।
पुष्परागशतं तद्वद्घ्राणायां परिकल्पयेत्॥
ललाटे हैमतिलकं मुक्ताफलशतं दृशोः।
भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वयोः स्थिते॥
काञ्चनानि च शृङ्गाणि शिरो वज्रशतात्मकम्।
ग्रीवायां नेत्रपटलं गोमेदकशतात्मकम्॥
इन्द्रनीलशतं पृष्ठे वैडूर्यशतपार्श्वके॥
स्फाटिकैरुदरं तद्वत्सौगन्धिकशतात्कटिम्।

सौगन्धिकं पद्मरागः। 'सौगन्धिकं तु कह्लारे पद्मरागे च कत्तृणे' इति वैजयन्तीकोशात्।

खुरा हैममयाः कार्याः पुच्छं मुक्तावलीमयम्।
सूर्यकान्तेन्दुकान्तौ च घ्राणे कर्पूरचन्दनम्॥
कुङ्कुमानि च रोमाणि रौप्यां नाभिं च कारयेत्।
गारुत्मतशतं तद्वदपाने परिकल्पयेत्॥
अथान्यानि च रत्नानि स्थापयेत्सर्वसन्धिषु॥
कुर्याच्छर्करया जिह्वां गोमयं च गुडात्मकम्।

गोमूत्रमाज्येन तथा दधिदुग्धं स्वरूपतः ॥
पुच्छाग्रे चामरं दद्यात्समीपे ताम्रदोहनम् ।
कुण्डलानि च हैमानि भूषणानि च शक्तितः ॥
कारयेदेवमेवं तु चतुर्थांशेन वत्सकम् ।
तथा सर्वाणि धान्यानि पादाश्चेक्षुमयाः स्मृताः ॥
नानाफलानि सर्वाणि पञ्चवर्णं वितानकम् ।
एवं विरचनं कृत्वा तद्वद्धोमाधिवासनम् ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुमामन्त्रयेद्बुधः ।
गुडधेनुवदामन्त्र्य इदं चोदाहरेत्ततः ॥

मन्त्रः प्रयोगे ज्ञेयः ।

आमन्त्र्य चेत्थमभितः परिवृत्य भक्त्या
दद्याद्द्विजाय गुरवे जलपूर्वकां ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापैर्विमुक्ततनुरेति पदं मुरारेः ॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं
वितरति स विमानं प्राप्य देदीप्यमानम् ।
सकलकलुषमुक्तो बन्धुभिः पुत्रपौत्रैः
सह मदनसरूपः स्थानमभ्येति शम्भोः । इति ॥

अथ प्रयोगः । तत्र यजमानो अद्येत्यादि 'सकलकलुषक्षयमदनस्वरूपत्वपूर्वकबन्धुवर्गपुत्रपौत्रादिसहितवरविमानारोहणपूर्वकगोलोकप्राप्तिकामस्तद्वच्छम्भुपदप्राप्तिकामस्तद्वद्धरिपदप्राप्तिकामो वा श्वो रत्नधेनुमहादानमहं प्रतिपादयिष्ये ' इतिसङ्कल्प्य प्रकृतिवद्गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं कृत्वा गुरुः षोडशारे कृष्णाजिनं प्रसार्य तदुपरि लवणं द्रोणमितं प्रसार्य तदुपरि रेखामयीं प्राङ्मुखीं गामुदक्पादामालिख्य रत्नैरङ्गानि कुर्यात् । तत्र एकाशीतिपद्मरागैर्मुखम् । पुष्परागशतेन नासाग्रम् । ललाटं हेमतिलकम् । पञ्चाशन्मुक्ताफलैः प्रत्येकं दृशौ । विद्रुमशतेन विभज्य भ्रूयुगम् । शुक्तिभ्यां कर्णौ । काञ्चने शृङ्गे । हीरकशतेन शिरः । गोमेदकशतान्वितेन नेत्रनामकपटेन ग्रीवाम् । वैडूर्यशतेन पार्श्वे । स्फटिकशतेनोदरम् । पद्मरागशतेन कटिम् । शक्तितो हेम्ना खुरान् । सूर्यकान्तकर्पूराभ्यां दक्षिणघ्राणपुटम् । चन्द्रकान्तचन्द-

नाभ्यां वामघ्राणपुटम् । कुङ्कुमेन रोमाणि । रूप्येण नाभिम् । गारुत्मतशतेनाऽपानम् । रत्नान्तरैः सर्वसन्धीन् । शर्करया जिह्वाम् । गुडो गोमये । आज्यं मूत्रे । चामरं पुच्छाग्रे । स्वरूपतो दधिदुग्धे । सन्निधौ ताम्रप्रदोहनम् । सौवर्णकुण्डलग्रैवेयकादीनि स्थाप्यानि । एवं धेनुसाधनद्रव्यचतुर्थांशेन धेनोरुत्तरतः प्राङ्मुखमुदक्पादं वत्सं च रचयेत् । दधिदुग्धदोहनानि च वत्से न संभवन्ति । समन्तादष्टादश धान्यानि फलपुष्पवस्त्रादीनि चाऽऽसाद्य 'रत्नधेनवे सवत्सायै नमः' इति पूजयित्वा वितानं बध्नीयात् । ततः कुण्डसमीपस्थकलशस्थापनादिप्रकृतिवत् । एवमभिषिक्तो यजमानो रत्नधेनुं त्रिःप्रदक्षिणमावृत्योपतिष्ठेत् । मन्त्रास्तु—

या लक्ष्मीः सर्वभूतानां या च देवे व्यवस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥
देहस्था या च रुद्राणी शङ्करस्य च या प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसौ ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपा च सा श्रिये ॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥
स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां च या ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥
त्वां सर्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्रचन्द्रकमलासनवासुदेवाः ।
तस्मात्समस्तभुवनत्रयदेवयुक्ते
मां पाहि देवि भवसागरपीड्यमानम् ॥ इति ।

ततः पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत उपविश्याद्येत्यादिमहासंकल्पमुक्त्वा 'इमां रत्नधेनुं पद्मरागमुखीं पुष्परागघोणां सुवर्णतिलकालङ्कृतां मुक्ताफलादिरचितनयनाद्यवयवोपेतां साधनपद्मरागादिद्रव्यचतुर्थांशेन रचितवत्ससहितां परितः स्थापितधान्यपुष्पफलादिमतीं विष्णुदैवतां गुरवेऽहं संप्रददे' इति । 'एकस्मा एव दद्यात्' इति भूपा-

लक्ष्मीकरादयः। हेमाद्यादयस्तु 'एकाग्निविधान एकस्मै, अनेकाग्निपक्षे तु तुलापुरुषवद्विभागः' इत्याहुः। सुवर्णं दक्षिणां दद्यात्। ततः स्वस्त्यादिवाचनग्रहादिपूजनविसर्जनब्राह्मणभोजनादि पूर्ववत्।

इति रत्नधेनुदानप्रयोगः।

अथ महाभूतघटदानविधिः।

मात्स्ये—

अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
महाभूतघटं नाम महापातकनाशनम्॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम्॥
तुलापुरुषवत्कुर्याल्लोकेशावाहनं तथा।
कारयेत्काञ्चनं कुंभं महारत्नचितं बुधः॥

महारत्नानि ब्रह्मोक्तानि।

प्रादेशादङ्गुलशतं यावत्कुर्यात्प्रमाणतः।
क्षीराज्यपूरितं तद्वत्कल्पवृक्षसमन्वितम्॥
पद्मासनगतांस्तत्र ब्रह्मविष्णुमहेश्वरान्।
लोकपालान्सहेन्द्रांश्च स्ववाहनसमन्वितान्॥
वराहेण धृतां तद्वत्कृत्वा पृथ्वीं सपङ्कजाम्।
वरुणं चासनगतं काञ्चनं मकरोपरि॥
हुताशनं मेषगतं वायुं कृतमृगासनम्।
तथाकाशाधिपं कुर्यान्मूषकस्थं विनायकम्॥
विन्यस्य घटमध्यैतान्वेदपङ्कजसंयुतान्।
ऋग्वेदस्याक्षसूत्रं स्याद्यजुर्वेदस्य पङ्कजम्॥
सामवेदस्य वीणा स्याद्वेनुं दक्षिणतो न्यसेत्।
अथर्ववेदस्य पुनः स्रुक्स्रुवौ दक्षिणे करे॥
पुराणवेदो वरदः साक्षसूत्रकमण्डलुः।

अत्र कल्पवृक्षप्रतिमाप्रादेशादिपरिमाणसहितघटसंपादकसुवर्णमानमार्थिकम्।

परितः सर्वधान्यानि चामरासनदर्पणम्।
पादुकोपानहच्छत्रभूषणाच्छादनादिकम्॥
शय्यां च जलकुम्भांश्च पञ्चवर्णं वितानकम्।

जलकुम्भाः षोडश।

स्नात्वाऽधिवासनान्ते तु मन्त्रमेतमुदीरयेत्।

मन्त्रः प्रयोगे ज्ञेयः।

इत्युच्चार्य महाभूतघटं यो विनिवेदयेत्।
सर्वपापविनिर्मुक्तः स याति परमां गतिम्॥
विमानेनार्कवर्णेन पितृबन्धुसमन्वितः।
स्तूयमानो वरस्त्रीभिः पदं प्राप्नोति वैष्णवम्॥
षोडशैतानि यः कुर्यान्महादानानि मानवः।
न तस्य पुनरावृत्तिरिह लोकेऽभिजायते। इति॥

अथ प्रयोगः। अद्येत्यादि 'सकलपापक्षयपूर्वकपित्रादिसकलबन्धुजनसहितामरस्त्रीसेव्यमानार्कवर्णविमानकरणकविष्णुपदप्राप्तिकामः श्वो महाभूतघटमहादानमहं प्रतिपादयिष्ये' इति सङ्कल्प्य प्रकृतिवद्गोविन्दादिपूजामण्डपपूजागुर्वादिविनियोगान्तं कुर्यात्। गुरुः षोडशारे वज्रमौक्तिकमाणिक्यनीलमरकताख्यमहारत्नान्वितं तुल्याभ्यां गव्यदुग्धघृताभ्यां पूर्णं मध्यस्थापितकल्पवृक्षं घटाकारं महाभूतघटं स्थापयेत्। घटमध्ये ब्रह्मादिप्रतिमाः स्थापयित्वा चतुर्दिक्ष्वष्टादश धान्यानि छत्रचामरभूषणशय्यादीनि षोडश जलकुंभांश्च सन्निधापयेत्। ततः 'महाभूतघटाय नमः' इति संपूज्य वितानं बध्नीयात्। ततः कुण्डसमीपस्थकुंभस्थापनादिपूर्णाहुत्यभिषेकान्तं प्रकृतिवत्। एवमभिषिक्तो यजमानो महाभूतघटं त्रिःप्रदक्षिणमावृत्य—

नमो वः सर्वदेवानामाधारेभ्यश्चराचरे।
महाभूताधिदेवेभ्यः शान्तिरस्तु शिवं मम॥
यस्मान्न किञ्चिदप्यस्ति महाभूतैर्विना कृतम्।
ब्रह्माण्डे सर्वभूतेषु तस्माच्छ्रीरस्तु मे सदा॥

इत्युपस्थाय पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत उपविश्याद्येत्याद्युक्त्वा महासङ्कल्पमुच्चार्य 'इमं महाभूतघटं महारत्नचितमन्तःस्थितसौवर्णकल्पवृक्षादिपुराणवेदान्तप्रतिमासहितं परितः स्थापिताष्टादशधान्यच्छत्रचामरासनशय्यापूर्णकुंभादिसहितं विष्णुदैवतं तुलापुरुषोक्तभागव्यवस्थया गुरुभ्यस्त्विग्भ्यो युष्मभ्यमहं संप्रददे न मम' इति तद्धस्तेषु दत्त्वा सुवर्णदक्षिणां दद्यात्। स्वल्पत्वेकाग्निविधानम्। देयविभागस्तुलापुरुषव-

त्रेधा । ततः पुण्याहवाचनग्रहादिपूजनविसर्जनमण्डपादिप्रतिपादनब्राह्मणभोजनाशीर्वादग्रहणमङ्गलाचारादीनि । इति महाभूतघटमहादानम् ॥

इति षोडश महादानानि ।

अथ दश महादानानि ।

कौर्मे—

कनकाश्वतिला नागा दासीरथमहीगृहाः ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥

वह्निपुराणे राम उवाच—

क्रोधादिकं मया कर्म कृतं मुनिवरोत्तमाः ।
कथं तस्माद्विमुच्येऽहं पापात्प्राणिवधादिकात् ॥
इत्युक्ता धर्मतत्त्वज्ञाः पापानां पावनं परम् ।
दानं चेह सुवर्णस्य ते तमूचुर्महर्षयः ॥

व्यासः—

सर्वान्कामान्प्रयच्छन्ति ये प्रयच्छन्ति काञ्चनम् ।
एतद्धि भगवानत्रिः पितामहसुतोऽब्रवीत् ॥

नन्दिपुराणे—

तस्मात्स्वशक्त्या दातव्यं काञ्चनं मानवैर्भुवि ।
नातः परतरं लोके सद्यः पापविमोचनम् ॥
सुवर्णस्य सुवर्णस्य सुवर्णं यः प्रयच्छति ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥

आद्यसुवर्णशब्देन हिरण्यमुक्तम् । द्वितीयेन च शोभनवर्णत्वम् । तृतीयेन परिमाणविशेषः ।

सुवर्णद्वितयं दत्त्वा अक्षयां गतिमाप्नुयात् ।
दत्त्वा सुवर्णस्य शतं द्विजेभ्यः श्रद्धयाऽन्वितः ॥
ब्रह्मलोकमनुप्राप्य ब्रह्मणा सह मोदते ।

सकृदुच्चरितसुवर्णशब्दस्य षोडशमाषविशिष्टहेमवाचितेति प्रागुक्तम् । सुवर्णदाने देयसुवर्णस्य तृतीयश्चतुर्थो वांशो दक्षिणेति पूर्वं परिभाषायामुक्तम् । रजतमिति केचित् ।

दानमन्त्रः—

हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

कौर्मे—

पलैकं द्विगुणं वाऽपि त्रिगुणं शक्त्यनुक्रमात्।
कनकं स्यात्सुवर्णेन द्वाभ्यां त्रिभिः सदक्षिणम्॥
यत्नाद्धो वा तत्कुर्याद्दक्षिणा स्याद्यथारुचि।

इति सुवर्णदानम्।

आदित्यपुराणे—

आदित्योदयसंप्राप्तौ विधिमन्त्रपुरस्कृतम्।
ददाति काञ्चनं यो वै दुःस्वप्नं प्रतिहन्ति सः॥
ददात्युदितमात्रे यस्तस्य पाप्मा विलीयते।

वायुपुराणे—

गुञ्जा गुञ्जार्द्धमात्रं वा नियतः प्रतिवासरम्।
कनकं न्यस्य लिङ्गे तु व्रजेत्तत्पदमुत्तमम्॥

ब्रह्माण्डे—

शृणुष्वावहितो दानं ब्रवीमि तव नारद।
शतमानमिति प्रोक्तं सर्वपापप्रणाशनम्॥
आयुष्यं श्रीकरं पुण्यमारोग्यं सन्ततिप्रदम्।
भुक्तिमुक्तिप्रदं स्वर्ग्यं सर्वमङ्गलकारणम्॥
पुण्यकालेषु सर्वेषु चन्द्रसूर्यग्रहादिषु।
नित्यं वा कारयेद्दानं जन्मर्क्षेषु विशेषतः॥
पुण्यदेशेषु सर्वेषु गृहे देवालयेषु च।
यत्र साधनसम्पत्तिस्तत्र दानं समाचरेत्॥

तथा—

गव्येन भूमिं शकृता जलेन आलिख्य मध्ये सिततन्दुलैश्च।
सरोरुहं सुन्दरकेसराढ्यं सकर्णिकं चाष्टदलं विलिख्य॥
तस्मिन्हिरण्यं शतमानपात्रं निधाय तस्योपरि तं विचिन्त्य।
ब्रह्माणमीशं कमलासनस्थमाराध्य गन्धादिभिरादरेण॥

विप्रं तथा वेदविदां वरिष्ठं विचिन्त्य बुद्ध्या तु समर्चयित्वा ।
दद्यात्सुवर्णं शतमानमस्मै संप्रीयतामात्मभूरित्युदीर्य ॥
शतमानं शतकृष्णलमाषाद्युन्मितम् ।

इति शतमानदानम् ।

अथ रजतदानम् ।

स्कान्दे—

यः प्रयच्छति विप्राय रजतं चाऽपि निर्मलम् ।
स विधूयाशु पापानि स्वर्गलोके महीयते ॥
रूपवान्सुभगः श्रीमानिह लोकेषु जायते ।

इति रजतदानम् ।

अथाश्वदानम् ।

स्कान्दे—

अश्वं यस्तु प्रयच्छेद्वै हेमचित्रं सुलक्षणम् ।
स तेन कर्मणा देवि गान्धर्वं लोकमश्नुते ॥

भारते—

सर्वोपकरणोपेतं युवानं दोषवर्जितम् ।
योऽश्वं ददाति विप्राय स्वर्गलोके महीयते ॥

तथा—

यावन्ति रोमाणि हये भवन्ति हि नरेश्वर ।
तावतो वाजिदा लोकान्प्राप्नुवन्तीह पुष्कलान् ॥

कालिकापुराणे—

अश्वं वा यदि वा युग्यं शोभने चाऽथ पादुके ।
ददाति यः प्रधानं वै ब्राह्मणेभ्यः सुसंयतः ॥
तस्य दिव्यानि यानानि रथध्वजपताकिनः ।
दुष्टः पन्था नचैवेह भविष्यति कदाचन ॥

अत्र दिव्ययानरथदुष्टपथविरहसम्पत्तिर्यथाक्रमं प्रत्येकं फलं ज्ञेयम् ।

कौर्मे—

अश्वं तन्मूल्यमथवा कनीयो मध्यमोत्तमम् ।
दद्याद्वित्तानुसारेण तारागणपरिच्छदम् ॥

शफैः पञ्चपलै रौप्यैः सुवर्णालङ्कृतं क्रमात् ।
सदक्षिणं सवस्त्रं च ब्राह्मणायाग्निहोत्रिणे ॥
तारागणस्तारानुकार्यलङ्कारः ।
दानमन्त्रः—
उच्चैःश्रवास्त्वमश्वानां राज्ञां विजयकारकः ।
सूर्यवाह नमस्तुभ्यमतः शान्तिं प्रयच्छ मे ॥

अथ श्वेताश्वदानम् ।

गारुडे—
अश्वमेधमखं यस्तु कलौ कर्तुमनीश्वरः ।
अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकम् ॥
विधिं तस्य प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा ।
श्वेतमश्वं शुभं तात हेमपर्याणभूषितम् ॥
रूप्यैस्तु कटकैः शुद्धैः करिदन्तोपशोभितम् ।
वज्रनेत्रं खुरैस्ताम्रैः क्षौमपुच्छं सुवाससम् ॥
शुभ्रेण पटकेनैव संवृतं स्वायुधान्वितम् ।
धान्यरत्नोपरिस्थं तु बद्धकक्षं सुपट्टकम् ॥
एवं सुतेजसं चाश्वं ब्राह्मणाय निवेदयेत् ।
मन्वादियुगाद्ययनविषुवोपरागादिषु दानम् ।

अथ पूजामन्त्रः ।

मार्तण्डाय सुवेगाय काश्यपाय त्रिमूर्तये ।
जगद्वाहाय सूर्याय त्रिवेदाय नमोऽस्तु ते ॥
एवं समुच्चरेन्मन्त्रं कर्णे दद्यात्तिलोदकम् ।

दानवाक्यम् । ॐ अद्येत्यादि 'अमुकगोत्रायामुकशर्मणे ब्राह्मणायेममश्वं सुवर्णतिलकालङ्कारयुक्तललाटं ग्रैवेयकसुपर्याणान्वितं रौप्यकटकरत्नोपशोभितं वज्रनेत्रं ताम्रखुरं क्षौमपुच्छं सुवाससं शुभ्रपटकसंवृतं स्वायुधान्वितं धान्यरत्नोपरिस्थितं बद्धकक्षं सुपट्टगन्धपुष्पाद्यर्चितं सकलब्रह्महत्यादिपापनाशकामस्तुभ्यमहं संप्रददे न मम ' इति स्वावधिकत्रिंशत्पूर्वत्रिंशत्परावरपित्रुद्धरणकामः ' इति वा, ' सूर्यलोकव्रजनकामः ' इति वा यथाकाममूह्यम् ।

महार्णवे समुत्पन्न उच्चैःश्रवसपुत्रक ।
मया त्वं विप्रमुख्याय दत्तो हय सुखी भव ॥
इमं विप्र नमस्तुभ्यमश्वं ते प्रतिपादितम् ।
प्रतिगृह्णीष्व विप्रेन्द्र मया दत्तं तु शोभनम् ॥

इति दानमन्त्रमुच्चार्य—

कर्णे समर्पणं कृत्वा विप्रहस्ते जलं क्षिपेत् ।

ततः सुवर्णं दद्यात् ।

पश्चादश्वपुरो गच्छेत्पादानां सप्तसप्ततिम् ।
भास्करं मनसि ध्यात्वा आलोक्य स्वगृहं व्रजेत् ॥
श्वेतमश्वं तु यो दद्यात्फलं दशगुणं भवेत् ।
वडवां च तथा दत्त्वा तुल्यमेव फलं लभेत् ॥
एवं कृते नरव्याघ्र सूर्यलोकं व्रजेन्नरः ।

इति श्वेताश्वदानम् ।

अथ तिलदानम् ।

आदित्यपुराणे—

वैशाख्यां पौर्णमास्यां वा तिलान्क्षौद्रेण संयुतान् ।
यः प्रयच्छेद्द्विजाग्र्येभ्यः सर्वपापैः प्रमुच्यते ॥
ज्येष्ठे मासि तिलान्दत्त्वा पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
माघे मासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति ।
सर्वसत्त्वसमाकीर्णं नरकं न स पश्यति ॥

वसिष्ठः—

नित्यदाता तिलानां यो नरः स्वर्गे महीयते ।

महाभारते—

ददतो जुह्वतश्चैव हरतः प्रतिगृह्णतः ।
तिले तिले तिलद्रोणः सौवर्णानां युधिष्ठिर ॥

तथा—

सर्वेषामेव दानानां तिलदानं परं स्मृतम् ।
सर्वपापहरं तद्धि पवित्रं स्वर्ग्यमेव च ॥

विष्णुधर्मोत्तरे—

तिला गावो हिरण्यं च अन्नं कन्या वसुन्धरा ।
दत्तान्येतानि विधिवत्तारयन्ति महाभयात् ॥

तथा—

तिलोद्वर्ती तिलस्नायी तिलहोमी तिलोदकी ।
तिलदाता च भोक्ता च षट् तिलाः पापनाशनाः ॥
असकृत्षट्तिली भूत्वा सर्वपापविवर्जितः ।
त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

कौर्मे—

कृष्णाजिने तिलान्कृत्वा सुवर्णं मधुसर्पिषी ।
द्रोणैकं वाससा छन्नं त्रिधा तद्वत्सदक्षिणम् ॥
आहिताग्नौ द्विजे दत्त्वा सर्वं तरति दुष्कृतम् ।

त्रिधेति हीनमध्यमोत्तमभेदतः । द्रोणैकं द्रोणद्वयं, द्रोणत्रितयं चेति । तद्वत्सदक्षिणं क्रमादेकद्वित्रिसुवर्णसहितम् । अत्रेत्थं दानवाक्यम्, अद्येत्यादि 'अमुकसगोत्राय ब्राह्मणाय एवं कृष्णाजिनस्थं सुवर्णमधुसर्पिर्युतं वस्त्रच्छन्नं तिलद्रोणं सर्वपापक्षयकामस्तुभ्यमहं संप्रददे न मम' कृतैतत्तिलदानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णं दक्षिणां तुभ्यमहं संप्रददे न ममेति ।

इति तिलदानम् ॥

यमः—

तिलपात्रं तु यो दद्यात्प्रत्यहं वाऽथ पर्वणि ।
सदक्षिणं सत्त्वभावाद्धृदि कृत्वा जनार्दनम् ॥
नाशयेत्त्रिविधं पापं धर्मस्य वचनं यथा ।

स्कान्दे तु अमायां दत्तं तत् पितृतारकम्, इत्युक्तम् ॥

ब्राह्मे—

ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रैर्द्विजाय तु ।
सहिरण्यं च यो दद्याच्छ्रद्धावित्तानुसारतः ॥
सर्वपापविशुद्धात्मा लभते परमां गतिम् ।

दानवाक्यन्तु, अद्येत्यादि 'इदं ताम्रपात्रं तिलपूर्णं ससुवर्णमशेषपापक्षयकामस्तुभ्यमहं संप्रददे न मम' । सुवर्णं दक्षिणां च दद्यात् ।

अथ महातिलपात्रम् ।

ताम्रपात्रे तिलान्कृत्वा पलषोडशकल्पिते ।
सहिरण्ये स्वशक्त्या वा विप्राय प्रतिपादयेत् ॥
नाशयेत्त्रिविधं पापं वाङ्मनःकायसंभवम् ।

कौर्मे—

तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजातये ।
प्रातर्दत्त्वा तु विधिवद्दुःस्वप्नं विनिहन्ति सः ॥
तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम् ।
ताम्रपात्रं दशपलं जघन्यं परिकीर्तितम् ॥
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतम् ।
स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत् ॥
त्रिगुणं चोत्तमे तद्वत्सुवर्णं परिकीर्तितम् ।
सुवर्णं दक्षिणां दत्त्वा सर्वपापक्षयो भवेत् ॥

अथ मातृर्णापाकरणतिलपूर्णकांस्यपात्रदानम् ।

आदित्यपुराणे—

यज्ञं सौत्रामणिं कर्तुं यदि शक्तिर्न विद्यते ।
महासरस्तथा वापीं कूपं कर्तुं च दीर्घिकाम् ॥
एवंकृते मातृऋणान्मुक्तो भवति मानवः ।
सदक्षिणं कांस्यपात्रमथ दत्त्वा प्रमुच्यते ॥
शुद्धकांस्यस्य पात्रस्य प्रमाणं पञ्चविंशतिः ।
पलानामत्र निर्दिष्टं तिलानां प्रस्थसप्तकम् ॥
सुवर्णमाषांश्चतुरः पात्रोपरि विधारयेत् ।
वस्त्रेण वेष्टयेत्पात्रं प्रधानेन सुभक्तितः ॥
स्नानं कृत्वा निम्नगादौ पितॄन्देवांश्च तर्पयेत् ।
ततोऽभिपूजयेच्छम्भुं शङ्करं हरिमेव वा ॥
गोमयेनाथ संलिप्य गृहमध्यं च सर्वतः ।
लिखेत्पद्मं द्वादशारं कुङ्कुमेनाथ चन्दनैः ॥
ततो वह्निं स्थापयित्वा होमं कुर्याद्यवैस्तिलैः ।
तत्र पात्रं प्रतिष्ठाप्य पूजयेद्भक्तिभावतः ॥
ततो ब्राह्मणमाहूय बहुभृत्यं सुसंयतम् ।

पादौ प्रक्षाल्य विधिवन्मातृश्राद्धं समाचरेत् ॥
अलङ्कृत्य यथाशक्त्या माध्यां वा मृतवासरे ।
ग्रहणे रविसोमाभ्यां संक्रान्तिषु युगादिषु ॥
तथान्यदपि यद्दत्तं माध्यामुद्दिश्य मातरम् ।
तदक्षयफलं सर्वं पुरा प्राह महेश्वरः ॥
जीवन्तीं भूषयेद्वस्त्रैर्माल्यैरपि विभूषणैः ।
दत्त्वा विप्रस्य पात्रं तु होमं कुर्यात्प्रयत्नतः ॥
सोपस्करं सताम्बूलं क्षमाप्य विप्रं विसर्जयेत् ।
अन्येषामपि विप्राणां भोजनानि प्रदापयेत् । इत्यादि ॥

अथास्य प्रयोगः । मातृमृतवासरे नद्यादौ वाप्यादौ वा यजमानो कृतस्नानो गृहमध्ये उपलिप्तदेशे कुङ्कुमचन्दनाभ्यां द्वादशदलं पद्मं विरचय्य तत्र पञ्चविंशतिपलमितं कांस्यपात्रं तिलप्रस्थसप्तकपूरितमुपस्थापितस्वर्णमाषचतुष्टयं च वरवस्त्रवेष्टितं स्थापयित्वा तत्समीपे हरिं शङ्करं चावाहनाद्युपचारैरभ्यर्च्य पुरतोऽग्निं स्थापयित्वा स्वसूत्रविधिना घृताक्तैस्तिलैर्यवैश्च विष्णुमन्त्रेण शिवमन्त्रेण वाऽष्टोत्तरशताहुतीर्हुत्वा मातृक्षयाहश्चेन्मातृश्राद्धं कृत्वा जीवन्त्यां मातरि तां वस्त्रादिभिः सत्कृत्य दानपात्रं तथैवाभ्यर्च्योदङ्मुखमुपवेश्याद्येत्याद्यमुकगोत्राय ब्राह्मणायेदं पलपञ्चविंशतिमितं कांस्यपात्रं प्रस्थसप्तकमिततिलपूरितं सुवर्णवरवस्त्रवेष्टितं समन्तात्स्थापितसप्तधान्यफलादिसहितं मातुरानृण्यकामस्तुभ्यमहं संप्रददे न मम इति दद्यात् । मन्त्रास्तु—

कांस्यपात्रं मया दत्तं मातुरानृण्यकाङ्क्षया ।
भगवन्वचनात्तुभ्यं यथाशक्ति तथा वद ॥
दश मासांश्च उदरे जनन्या संस्थितस्य मे ।
क्लेशिता बालभावेन स्तनपानाद्द्विजोत्तम ॥
पूयमूत्रादिमलेपलिप्ता या च कृता मया ।
भवतो वचनादद्य मम मुक्तिर्भवेदृणात् ॥
कांस्यपात्रं सुवर्णं च तिलान्वस्त्रादिदक्षिणाम् ।
सप्तधान्यं मया दत्तमृणान्मुक्तिर्भवेन्मम ॥
कांस्यपात्रप्रदानेन तत्त्वज्ञानं शरीरकम् ।
तथा हेमप्रदानेन परमात्मानमव्ययम् ॥

आच्छादनं तु ब्रह्माण्डं गुह्यमेतत्सदक्षिणम् ।
विप्राऽऽच्छादनदानेन परमात्मा सुपूजितः ॥
तिलसंख्याकृतं दुःखं जनन्या मम सेवितम् ।
तिलपात्रप्रदानेन कृतमुक्तो भवाम्यहम् । इति ॥

ततः शक्त्या हिरण्यं दक्षिणां दद्यात् । 'पात्रदानेन जननीसम्भवादृणात्त्वं मुक्तः' इति विप्रो ब्रूयात् । पुनर्व्याहृतिभिर्होमं कृत्वा विप्रं विसृज्य यथाशक्ति ब्राह्मणान्भोजयेत् ॥

इति कांस्यपात्रदानप्रयोगः ॥

अथ तिलकुम्भदानम् ।

वायवीये—

तिलकुम्भमथो वक्ष्ये कुम्भे पूर्ववदास्थिते ।
वारुणे मण्डले देवं वरुणाकारमर्चयेत् ॥
श्वेतैः पुष्पैः फलैर्गन्धैः कर्पूरेण तु पूजयेत् ।

वरुणलक्षणं ब्रह्माण्डदाने ।

वारुणं मण्डलं स्थाप्यं तत्रार्द्धचन्द्राकारं कार्यम् ।
षड्रसान्परितो न्यस्य ततो मन्त्रमिमं जपेत् ॥
नमो वरुणरूपाय रसाम्बुपतये नमः ।
रसवारिनिमित्तानि यान्तु नाशमघानि मे ॥
तिलकुम्भप्रदानेन प्रसीद परमेश्वर ।
इतिदत्ते विनश्यन्ति पापानि जलचारिणाम् ॥
हिंसोद्भवानि स्नानेषु पानके वाऽवगाहने ।
रसो यदा न भक्ष्याणामपेयानां च वाञ्छया ॥
औषधं वाऽपि देवेश सर्वं मेध्यं भविष्यति ।
शिवलोके वसेत्कल्पान्शतपञ्चदशावरान् ॥

इति तिलकुम्भदानम् ।

अथ तिलकरकदानम् ।

वायवीये—

करकं तिलसंपूर्णं मण्डले वह्निदैवते ।
शिवं वह्निवदाराध्य पूजयेत्करवीरकैः ॥
रक्तचन्दनगन्धेन निर्यासेन च धूपयेत् ।

वह्निदैवतं त्रिकोणं मण्डलमित्यर्थः । शिवं वह्निवदिति वह्निस्वरूपं शिवमित्यर्थः । तच्चोक्तं ब्रह्माण्डदाने । निर्यासः सर्जरसः ।

आदर्शं च ततो दद्याद्दीपानां च चतुष्टयम् ।
वह्निरूपपतिः शम्भुर्वह्निरूपी तिलाश्रयः ॥
तेजोरूपकृतं पापं चाक्षुषं च व्यपोहतु ।
इतिदत्तेऽस्य नश्यन्ति पापान्यग्निकृतानि च ॥
पाकहोमेषु काष्ठेषु हिंस्यन्ते यानि वह्निना ।
अगारवनदाहादिसंभवानि च यानि वै ॥
विरुद्धकरणोत्थानि रूपयोगोद्भवानि च ।
परदारपरद्रव्यपुत्रदर्शनजानि च ॥
शवादिदर्शनोत्थानि नेत्रदोषकृतानि च ।
य एवं कुरुते दानं शिवभक्त्या यतव्रतः ॥
शिवलोके वसेद्भूयः कल्पत्रयमशङ्कितः ।

इति तिलकरकदानम् ।

अथ गजदानम् ।

कौर्मे—

दद्याद्गजं पुराणोक्तं मूल्यं पञ्चशतानि च ।
वित्तानुसारात्तत्रापि कनिष्ठोत्तममध्यमम् ॥

स्वरूपतो गजदानमुत्तमः पक्षः । तन्मूल्यं हेममाषशतपञ्चकं मध्यमः । शतद्वयमधमः इति केचित् । 'पञ्चशतमाषास्तदर्द्धं तदर्द्धम्' इत्यन्ये । 'तादृशाः सुवर्णाः' इत्यपरे ।

रूप्यस्थूणालङ्करणं स्वर्णताराविभूषणम् ।
सदक्षिणं वित्तशक्त्या दत्त्वा शिवपुरं व्रजेत् ॥

स्थूणा रज्जुः । तारागणो मौक्तिकजालात्मको गजालङ्कारविशेषः ।

तथा—

यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनम् ।
ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते ॥
कर्मक्षयादिहागत्य महाराज्ञो गजाधिपः ।
सर्वपापविनिर्मुक्तो जायते नात्र संशयः ॥

आच्छादनं तु ब्रह्माण्डं गुह्यमेतत्सदक्षिणम् ।
विप्राऽऽच्छादनदानेन परमात्मा सुपूजितः ॥
तिलसंख्याकृतं दुःखं जनन्या मम सेवितम् ।
तिलपात्रप्रदानेन कृतमुक्तो भवाम्यहम् । इति ॥

ततः शक्त्या हिरण्यं दक्षिणां दद्यात् । 'पात्रदानेन जननीसम्भवादृणात्त्वं मुक्तः' इति विप्रो ब्रूयात् । पुनर्व्याहृतिभिर्होमं कृत्वा विप्रं विसृज्य यथाशक्ति ब्राह्मणान्भोजयेत् ॥

इति कांस्यपात्रदानप्रयोगः ॥

अथ तिलकुम्भदानम् ।

वायवीये—

तिलकुम्भमथो वक्ष्ये कुम्भे पूर्ववदास्थिते ।
वारुणे मण्डले देवं वरुणाकारमर्चयेत् ॥
श्वेतैः पुष्पैः फलैर्गन्धैः कर्पूरेण तु पूजयेत् ।

वरुणलक्षणं ब्रह्माण्डदाने ।

वारुणं मण्डलं स्थाप्यं तच्चार्द्धचन्द्राकारं कार्यम् ।

षड्रसान्परितो न्यस्य ततो मन्त्रमिमं जपेत् ॥
नमो वरुणरूपाय रसाम्बुपतये नमः ।
रसवारिनिमित्तानि यान्तु नाशमघानि मे ॥
तिलकुम्भप्रदानेन प्रसीद परमेश्वर ।
इतिदत्ते विनश्यन्ति पापानि जलचारिणाम् ॥
हिंसोद्भवानि स्नानेषु पानके वाऽवगाहने ।
रसो यदा न भक्ष्याणामपेयानां च वाञ्छया ॥
औषधं वाऽपि देवेश सर्वं मेध्यं भविष्यति ।
शिवलोके वसेत्कल्पान्शतपञ्चदशावरान् ॥

इति तिलकुम्भदानम् ।

अथ तिलकरकदानम् ।

वायवीये—

करकं तिलसंपूर्णं मण्डले वह्निदैवते ।
शिवं वह्निवदाराध्य पूजयेत्करवीरकैः ॥
रक्तचन्दनगन्धेन निर्यासेन च धूपयेत् ।

वह्निदैवतं त्रिकोणं मण्डलमित्यर्थः । शिवं वह्निवदिति वह्निस्वरूपं शिवमित्यर्थः । तच्चोक्तं ब्रह्माण्डदाने । निर्यासः सर्जरसः ।

आदर्शं च ततो दद्याद्दीपानां च चतुष्टयम् ।
वह्निरूपपतिः शम्भुर्वह्निरूपी तिलाश्रयः ॥
तेजोरूपकृतं पापं चाक्षुषं च व्यपोहतु ।
इतिदत्तेऽस्य नश्यन्ति पापान्यग्निकृतानि च ॥
पाकहोमेषु काष्ठेषु हिंस्यन्ते यानि वह्निना ।
अगारवनदाहादिसंभवानि च यानि वै ॥
विरुद्धकरणोत्थानि रूपयोगोद्भवानि च ।
परदारपरद्रव्यपुत्रदर्शनजानि च ॥
शवादिदर्शनोत्थानि नेत्रदोषकृतानि च ।
य एवं कुरुते दानं शिवभक्त्या यतव्रतः ॥
शिवलोके वसेद्भूयः कल्पत्रयमशङ्कितः ।

इति तिलकरकदानम् ।

अथ गजदानम् ।

कौर्मे—

दद्याद्गजं पुराणोक्तं मूल्यं पञ्चशतानि च ।
वित्तानुसारात्तत्रापि कनिष्ठोत्तममध्यमम् ॥

स्वरूपतो गजदानमुत्तमः पक्षः । तन्मूल्यं हेममाषशतपञ्चकं मध्यमः । शतद्वयमधमः इति केचित् । 'पञ्चशतमाषास्तदर्द्धं तदर्द्धम्' इत्यन्ये । 'तादृशाः सुवर्णाः' इत्यपरे ।

रूप्यस्थूणालङ्करणं स्वर्णताराविभूषणम् ।
सदक्षिणं वित्तशक्त्या दत्त्वा शिवपुरं व्रजेत् ॥

स्थूणा रज्जुः । तारागणो मौक्तिकजालात्मको गजालङ्कारविशेषः ।

तथा—

यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनम् ।
ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते ॥
कर्मक्षयादिहागत्य महाराज्ञो गजाधिपः ।
सर्वपापविनिर्मुक्तो जायते नात्र संशयः ॥

हस्त्यश्वशकटादिदानफलं भारते—

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥
भोगान्भुक्त्वाऽमरपुरे राजा कालक्षयादिह । इति ॥

अत्र दानवाक्यम् । 'अद्येत्याद्युक्त्वा 'षट्षष्टिवर्षसहस्रावधिकामरपुरभोगोत्तरमहाराजत्वकामोऽहममुकगोत्राय ब्राह्मणायेमं हस्तिनं कक्षारज्जुस्थिरासनसहितं काञ्चनमालादिकीर्णं चामरगन्धपुष्पालङ्कृतं प्रजापतिदैवतं तुभ्यमहं संप्रददे न मम' इति करं धृत्वा दद्यात् । 'सुवर्णं दक्षिणां तुभ्यमहं संप्रददे न मम' इति ।

इति हस्तिदानम् ।

निवेदयति मातङ्गं भक्त्या स्वर्णाद्यलङ्कृतम् ।
शिवाय पर्वदिवसे तस्य पुण्यफलं शृणु ॥

इत्यादिना शिवधर्मादौ शिवाय गजदानमुक्तम् ।

अथ दासीदानम् ।

वह्निपुराणे—

स्थिरनक्षत्रसंयुक्ते सौम्ये सौम्यग्रहान्विते ।
दानकालं प्रशंसन्ति सन्तः पर्वणि वा पुनः ॥
अलंकृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ।
ब्राह्मणाय प्रदातव्या मन्त्रेणानेन शक्तितः ॥
इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता ।
सर्वकामकरी भोग्या यथेष्टं भद्रमस्तु ते ॥
पञ्चवर्षाधिका सा तु चत्वारिंशत्समावधि ।
दासी द्विजाय दातव्या दासदानेऽप्ययं विधिः । इत्यादि ॥

अत्र दानवाक्यम्—'अमुकसगोत्रायेमां दासीं सुवर्णालङ्कारवतीं पुष्पाद्यर्चितामक्षय्यसुखप्राप्तिकामस्तुभ्यमहं संप्रददे न मम' इति शिरसि धृत्वा दद्यात् सुवर्णं दक्षिणां च दत्त्वा क्षमापयेत्पश्चाद्ब्राह्मणं वस्त्रकाञ्चनैः । अनुगत्वा च सीमायां द्विजं विसर्जयेत्ततः, इत्यादि । अश्वमेधफलशतगुणफलकामः शिवाय दासीं विनिवेदयेदिति शिवाय दासीदानमप्युक्तम् ।

इति दासीदानम् ।

अथ रथदानम् ।

कौर्मे—

रथं चतुर्बलीवर्दरूढं धान्यावृतं तथा ।
वित्तानुसारात्सर्वैश्च रथोपकरणैर्युतम् ॥
सदक्षिणं च विप्राय दत्त्वा शिवपुरं व्रजेत् ।

धान्यावृतमष्टादशधान्यावृतम् । रथोपकरणानि युगयोक्त्रतोत्रवरत्रादीनि । धान्यावृतं त्रिधा इति वा पाठः । 'त्रिद्व्येकसुवर्णदक्षिणा च शतं, उत्तममध्यमकनिष्ठभेदतश्च त्रैविध्यम्' इति हेमाद्रिः । दानवाक्यम् । 'अमुकसगोत्राय ब्राह्मणाय चतुर्बलीवर्दयुक्तमष्टादशधान्यपरिवृतं सर्वोपकरणयुतमेतं रथं विश्वकर्मदैवतमक्षय्यस्वर्गादिसुखकामस्तुभ्यमहं संप्रददे न मम' इति ।

मन्त्रस्तु—

रथाय रथनाथाय नमस्ते विश्वकर्मणे ।
विश्वरूपाय नाथाय अरुणाय नमो नमः ॥

इति सुवर्णं दक्षिणां च दद्यात् ।

गारुडे—

गन्त्रीं तुरङ्गसंयुक्तां यो ददाति द्विजातये ।
सर्वकामसमृद्धात्मा स राजा जायते भुवि । इति ॥

गन्त्री रथविशेषः । सा च चतुर्भिरश्वैर्वृषैर्गजैर्वोपेता द्वाभ्यां वोपेता ।

गन्त्रीमिमां प्रयच्छामि विश्वकर्माधिदैवताम् ।
दानेनानेन भगवान्प्रीयतां मे परः पुमान् ॥

इति गन्त्रीदाने मन्त्रः ।

इति रथदानम् ।

मार्गशुक्लैकादश्यां माघफाल्गुनयोर्वा वैशाखे वा हिरण्मयं हरिमभ्यर्च्य जागरं च कृत्वा प्रातः शिबिकां ब्राह्मणाय दत्त्वा तस्य वर्षाशनं शिबिकावाहकानां च वर्षार्हमन्नं कल्पयित्वाऽतिविपुलभोगानन्तरं विष्णुसायुज्यभाग्भवति । एतन्मूलं हेमाद्रौ वह्निपुराणे ।

अथ महीदानम् ।

कौर्मे—

गोचर्ममात्रं भूखण्डमधिकं वा स्वशक्तितः ।
त्रिधा सदक्षिणां कृत्वा दत्त्वा शिवपुरं व्रजेत् ॥

त्रिद्व्येकसुवर्णरूपा दक्षिणा त्रिधेत्यर्थः।

बृहस्पतिः—

अपि गोचर्ममात्रेण सम्यग्दत्तेन मानवः।
धौतपापो विशुद्धात्मा स्वर्गलोके महीयते॥
दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्तनम्।
त्रिभागहीनं गोचर्ममानमाह प्रजापतिः॥
मानेनानेन यो दद्यान्निवर्तनशतं बुधः। इति॥

तथा—

गवां शतं वृषश्चैको यत्र तिष्ठेदयन्त्रितः।
तद्धि गोचर्ममात्रं तु प्राहुर्वेदविदो जनाः॥

अत्र नानागोचर्मप्रकारेषु उत्तममध्यमाधमभावेन व्यवस्था ज्ञेया।

तथा—

षष्टिवर्षसहस्राणि स्वर्गे वसति भूमिदः।
आच्छेत्ता चानुमन्ता च तावन्ति नरके वसेत्॥

तत्र पुराणभेदान्नानाफलश्रवणेऽपि स्वकामितमेव फलमुल्लेख्यम्।

मन्त्रोऽपि—

यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्।
दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह॥

अमुकब्राह्मणायामुककामः षष्टिसहस्रवर्षमितस्वर्गवासकामः, शिवपुरप्राप्तिकामो वा, सर्वपापक्षयकामो वा, भूमिं तुभ्यमहं संप्रददे न मम इति सपुष्पं कुशतिलोदकं ब्राह्मणहस्ते निक्षिपेत्। ब्राह्मणः समीपस्थां भूमिं प्रदक्षिणीकृत्य प्रतिगृह्णीयात्। विप्रकृष्टां तु मनसा प्रदक्षिणीकृत्य—

न हि भूमेः परं वस्तु गोः सुवर्णाच्च किञ्चन।
अतो भूमिगवि प्राज्ञैः सुवर्णं दक्षिणा मता॥

इति माण्डव्यवचनादत्र सुवर्णमेव दक्षिणा।

विश्वामित्रः—

ग्रामं वा नगरं वाऽपि विप्रेभ्यो यः प्रयच्छति।
क्षेत्रं वा सस्यसम्पन्नं सर्वपापैः प्रमुच्यते॥
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति॥

तथा—

अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनं ह्येतदुत्तमम् ॥
येऽपि सङ्कीर्णकर्माणो राजानो रौद्रकर्मिणः ।
तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् ॥
किमत्र चित्रं दातारं यत्समुद्धरते धरा ।
प्रतिग्रहग्रहीतारमपि तारयते द्विज ॥

इत्यपि हेमाद्रौ । शिवधर्मे शिवाय भूमिदानमुक्तम् ।

इति महीदानविधिः ।

अथ गृहदानम् ।

कौर्मे—

शक्तितः सर्ववित्तेन पूर्णं गृहमपि त्रिधा ।
सदक्षिणं द्विजं दत्त्वा ब्रह्मलोकं व्रजेन्नरः ॥

सर्ववित्तेन दासीदासगोबलीवर्दकांस्यताम्रपात्रादिसोपस्करशय्या-सर्वधान्यघृतगुडशर्करादिरूपेण ।

गारुडे—

ऐष्टकं दारवं वापि मृन्मयं वा स्वशक्तितः ।
सर्वोपकरणोपेतं यो दद्याद्विपुलं गृहम् ॥
ब्राह्मणाय दरिद्राय विदुषे च कुटुम्बिने ।
क्रीडित्वा सुचिरं कालं मानुष्यं लोकमागतः ॥
भवत्यप्यहमैश्वर्यैः सर्वकामसमन्वितः ।

ब्रह्मवैवर्ते—

न गार्हस्थ्यात्परो धर्मो नैव दानं गृहात्परम् ।
नानृतादधिकं पापं न पूज्यो ब्राह्मणात्परः ॥

तथा—

कारयित्वा गृहान्रम्यान्नृतुवत्स्वर्गसंख्यया ।
भुवनाष्टादश त्रिंशत्तत्त्वनक्षत्रसंख्यया ॥
शक्त्या तद्द्विगुणान्येव शतं यावत्सहस्रकम् ।
कुड्यस्तम्भगवाक्षाढ्यान्विचित्रबहुभूमिकान् ॥ इति ॥

जगन्मोहने नारदः—

स्नानागारं दिशि प्राच्यामाग्नेय्यां पचनालयम् ।
याम्यां शयनगेहं च नैर्ऋत्यां शस्त्रमन्दिरम् ॥
प्रतीच्यां भोजनगृहं वायव्यां पशुमन्दिरम् ।
भाण्डागारं तूत्तरस्यामीशान्यां देवमन्दिरम् । इति ॥

मात्स्ये—

देवतापञ्चकं तत्र चत्वारिंशत्समावृतम् ।
पूजयित्वा यथान्यायं ततो दद्याद्गृहं गृही ॥
एकाशीतिपदं कृत्वा रेणुभिः कनकेन वा ।
पश्चात्पिष्टेनानुलिम्पेत्सूत्रेणालोड्य सर्वतः ॥
दश पूर्वापरा लेखा दश चैवोत्तरायताः ।
सर्वं वास्तुविभागेन विज्ञेया नवका नव ॥
एकाशीतिपदं कृत्वा वास्तुवित्सर्ववास्तुषु ।
पदस्थान्पूजयेद्देवान्त्रिशत्पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्यांश्चान्तस्त्रयोदश ।
मध्ये नवपदस्त्वेकश्चत्वारस्त्रिपदाः स्मृताः ॥
विंशतिस्त्वेकपदिकास्तावन्तो द्विपदाः स्मृताः ।
एवं प्रतिष्ठिता देवाश्चत्वारिंशच्च पञ्च च ॥
नामतस्तान्प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशकोणादिषु सुरान्पूजयेत्क्रमशो नव ॥

ईशानादौ,

शिखी चैव तु पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्वो भृङ्गराजश्च मृगः पितृगणास्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोकपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिश्च वै ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।

अर्यमा सविता चैव विवस्वान्विबुधाधिपः ॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमस्त्वापवत्सस्तु परितो ब्रह्मणः स्मृताः ॥
आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ।
पदिकानां तु वर्गोऽयमेवं कोणेष्वशेषतः ॥
तन्मध्ये तु बहिर्विंशद्द्विपदास्ते तु सर्वतः ।
एतत्पूर्वं गृहारम्भं कुर्याद्वास्तुविचक्षणः ॥
वास्तौ परीक्षिते तस्मिन्वास्तुदेहे विचक्षणः ।
वास्तूपशमनं कुर्यात्समिद्भिर्बलिकर्म च ॥
जीर्णोद्धारे तथोद्याने तथा च नववेश्मनि ।
नवप्रासादभवने प्रासादपरिवर्तने ॥
द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च ।
वास्तूपशमनं कुर्यात्पूर्वमेव विचक्षणः ॥
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ।
होमस्त्रिमेखले कार्यः कुण्डे हस्तप्रमाणके ॥
यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षजैः ।
पालाशैः खादिरैश्चापामार्गोदुम्बरसंभवैः ॥
कुशदूर्वादलैर्वाऽपि मधुसर्पिःसमन्वितैः ।
कार्यस्तु पञ्चभिर्बिल्वैर्बिल्वबीजैस्तथापि च ॥
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेहे बलिं हरेत् ।
तद्वद्विशेषनैवेद्यमिदं दद्यात्क्रमेण तु ॥
एवं संपूजिता देवाः शान्तिं कुर्वन्ति ते सदा ।
सर्वेषां काञ्चनं दद्याद्ब्रह्मणे गां पयस्विनीम् । इति ॥

अथ गृहवास्तुशान्तिप्रयोगः । यजमानो मासपक्षाद्युल्लिख्य 'अस्य वास्तोः शुभतासिद्ध्यर्थं वास्तुशान्तिं करिष्ये' इति सङ्कल्प्य गणेशपूजास्वस्तिवाचनमातृपूजाभ्युदयिकश्राद्धाचार्यब्रह्मर्त्विग्वरणानि कुर्यात् । तत आचार्यो, 'यदत्र संस्थितम्' 'अपक्रामन्तु' इत्येताभ्याम्—

भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः ।
स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ॥

स्वनेन च सर्षपान्विकीर्य पञ्चगव्येन 'शुची वो हव्या' इति

तृचेन, 'एतोन्विन्द्रम्' इति च तृचेन गृहं संप्रोक्ष्य गृहे प्राच्यामीशान्यां वा चतुरङ्गुलोच्चं हस्तमितं स्थण्डिलं कृत्वा तस्य ईशानादिकोणचतुष्टये चतुरो लोहकीलान्—

विशन्तु भूतले नागा लोकपालाश्च सर्वशः ।
अस्मिन् गृहेऽवतिष्ठन्तु आयुर्बलकराः सदा ॥

इति मन्त्रेण निखनेत्, प्रतिकीलं मन्त्रावृत्तिः । तत ईशानादिक्रमेणैव चतुर्षु कोणेषु—

अग्निभ्योऽप्यथ सर्पेभ्यो ये त्वन्ये तत्समाश्रिताः ।
तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥

इतिमन्त्रेण माषभक्तादिबलीन्दत्त्वा स्थण्डिलोपरि, 'ॐ शान्तायै नमः ॐ यशोवत्यै० ॐ कान्तायै० ॐ विशालायै० ॐ प्राणवाहिन्यै० ॐ सत्यै० ॐ सुमत्यै० ॐ नन्दायै० ॐ सुभद्रायै० ॐ सुरथायै०, इति प्रणवाद्यैर्नमोऽन्तैर्दशभिर्मन्त्रैः कुङ्कुमादिना हेमरूप्यादिशलाकया प्राक्पश्चादायताः प्रागन्ता उदक्संस्था व्यङ्गुलान्तरा दश रेखाः कृत्वा, 'ॐ हिरण्यायै० ॐ सुव्रतायै० ॐ लक्ष्म्यै० ॐ विभूत्यै० ॐ विमलायै० ॐ प्रियायै० ॐ विजयायै० ॐ बालायै० ॐ विशोकायै० ॐ इडायै०' इति दक्षिणोत्तरायता उदक्संस्था दश रेखाः कुर्यात् । एवमेकाशीतिपदं मण्डलं संपद्यते । तत्र मध्यस्थनवकोष्ठरेखामार्जनेनैक्रीकुर्यात् । एतन्नवपदं ब्रह्मस्थानं तस्य चतुर्दिक्षु चत्वारि त्रिपदानि । विदिक्षु शृङ्खलाकाराणि द्वादशकोणचतुष्टयोभयतश्चाष्टाविति विंशत्येकपदानि । अवशिष्टानि प्रतिदिशं पञ्च पञ्चेति विंशतिपदानि । तेषु प्रणवाद्यैश्चतुर्थ्यन्तैर्नमोन्तैर्वक्ष्यमाणनामभिर्देवता आवाह्य स्थापयेत् । तत्र ईशानकोणपदे वास्तोः शिरसि ॐ शिखिने नमः इति शिखिनम् । तद्दक्षिणैकपदे दक्षिणे नेत्रे पर्जन्याय । तद्दक्षिणे ततोऽपि पश्चिम इति द्विपदे दक्षिणश्रोत्रे जयन्ताय । तद्दक्षिणद्विपदे तद्दक्षिणांशे कुलिशायुधाय । तद्दक्षिणद्विपदे दक्षिणबाहौ सूर्याय । तद्दक्षिणद्विपदे दक्षिणबाहावेव सत्याय । तद्दक्षिणद्विपदे दक्षिणकूर्परे भृशाय । तद्दक्षिणेऽन्त्यपङ्क्तिगतैकपदे दक्षिणबाहौ आकाशाय । आग्नेयकोणपदे दक्षिणप्रबाहावेव वायवे । तत्पश्चिमैकपदे दक्षिणमणिबन्धे पूष्णे । तत्पश्चिमे ततोऽप्युत्तर इति द्विपदे दक्षिणपार्श्वे वितथाय । तत्पश्चिमद्विपदे दक्षिणपार्श्वे एव गृहक्षताय । तत्पश्चिमे

द्विपदे दक्षिणोरौ यमाय । तत्पश्चिमे द्विपदे दक्षिणजानौ गन्धर्वाय । तत्पश्चिमे द्विपदे दक्षिणजानौ भृङ्गराजाय । तत्पश्चिमे बाह्ये दक्षिणगतैकपदे दक्षिणस्फिचि मृगाय । नैर्ऋत्यकोणपदे पादयोः पितृभ्यः । तदुत्तरैकपदे वामस्फिचि दौवारिकाय । तदुत्तरे ततोऽपि प्राचि चेति द्विपदे वामजङ्घायां सुग्रीवाय । तदुत्तरे द्विपदे वामजानौ पुष्पदन्ताय । तदुत्तरे द्विपदे वामोरौ जलाधिपाय । तदुत्तरे द्विपदे वामपार्श्वे असुराय । तदुत्तरे द्विपदे वामपार्श्वे एव शोषाय । तदुत्तरे बाह्यपङ्क्तिगतैकपदे वाममणिबन्धे पापाय । वायव्यां कोणपदे वामप्रबाहौ रोगाय । तत्प्राच्येकपदे वामपार्श्वे एव अहये । तत्प्राचि ततो दक्षिणे चेति द्विपदे वामकूर्परे मुख्याय । तत्प्राचि द्विपदे वामबाहौ भल्लाटाय । तत्प्राचि द्विपदे वामबाहावेव सोमाय । तत्प्राचि द्विपदे वामांसे सर्पाय । तत्प्राचि द्विपदे वामश्रोत्रे अदितये । तत्प्राचि बाह्यपङ्क्तिगतैकपदे वामनेत्रे दितये । तद्दक्षिणे ईशानकोणपदाधःपदे मुखे आपाय । आग्नेयकोणपदाधःकोणपदे दक्षिणहस्ते सावित्राय । नैर्ऋत्यकोणपदाधःकोणपदे मेढ्रे जयाय । वायव्यकोणपदाधःकोणपदे वामहस्ते रुद्राय । मध्यमसध्यमनवकोष्ठकब्रह्मपदसंलग्ने प्राग्गते त्रिपदे दक्षिणस्तने अर्यम्णे । तद्दक्षिणैकपदे दक्षिणहस्ते सवित्रे । तत्पश्चिमे ब्रह्मपदसंलग्ने त्रिपदे जठरदक्षिणभागे विवस्वते । तत्पश्चिमैकपदे वृषणयोर्विबुधाधिपाय । तदुत्तरे ब्रह्मपदसंलग्नत्रिपदे जठरवामभागे मित्राय । तदुत्तरैकपदे वामहस्ते राजयक्ष्मणे । तत्प्राचि त्रिपदे वामस्तने पृथ्वीधराय । तत्प्रागेकपदे उरसि आपवत्साय । मध्ये नवपदे हृन्नाभ्योर्ब्रह्मणे । तदुत्तरे 'वास्तोष्पते प्रतिजानीहि' इति वृषवास्तुं सुवर्णादिप्रतिमायां मण्डलाद्बहिरीशानादिकोणेषु, चरकीं विदारीं पूतनां पापराक्षसीं, पूर्वादिषु, स्कन्दं अर्यमणं जृम्भकं पिलिपिच्छं, प्राच्याद्यष्टदिक्ष्विन्द्रादीनावाह्य सर्वान्संपूज्य मण्डलादीशान्यां कलशं संस्थाप्य तत्र वरुणं संपूज्य कुण्डे स्थण्डिले वाऽग्निं संस्थाप्य तदीशान्यां ग्रहानावाह्य संपूज्य तदीशान्यां ग्रहकलशं संस्थाप्य तत्र वरुणं संपूज्यान्वाधाने चक्षुषीआज्येनेत्युक्त्वा 'ग्रहादीनमुकसंख्यया समिच्चर्वाज्यैः, शिखीपर्जन्यजयन्तकुलिशायुधसूर्यसत्यभृगाकाशवायुपूषवितथगृहक्षतयमगन्धर्वभृङ्गराजमृगपितृदौवारिकसुग्रीवपुष्पदन्तजलाधिपासुरशोषपापरोगाहिमुख्यभल्लाटसोमसर्पादितिदित्यापसावित्र-

जयन्तरुद्रार्यमसवित्रविवस्वद्विबुधाधिपमित्रराजयक्ष्मपृथ्वीधरापवत्सब्र-
ह्मणो यवतिलसमिदाज्यपायसैरमुकसंख्यया 'वास्तोष्पतिमेतैरेव द्रव्यैरमु-
कसंख्यया पञ्चबिल्वैस्तद्बीजैर्वा चरकीविदारीपूतनापापराक्षसीस्कन्दार्य-
मजृम्भकपिलिपिच्छानिन्द्रादींश्च तैरेव द्रव्यैरमुकसंख्यया यक्ष्ये इत्युक्त्वा
शेषेणेत्याद्याज्यभागान्ते ग्रहहोमं कृत्वा यवतिलसमिदाज्यपायसैः शि-
ख्यादिदेवताभ्यो नाममन्त्रैः प्रत्येकमष्टावष्टाविंशतिमष्टोत्तरशतं वा हुत्वा,
वास्तोष्पतये एतान्येव द्रव्याण्यष्टोत्तरशतं जुहुयुः ऋत्विजः। तत्र वास्तो-
ष्पते इति चत्वारो मन्त्राः। एकैकेन च मन्त्रेण सप्तविंशतिः सप्तविंशति-
राहुतयइत्यष्टोत्तरशतम्। तैश्चतुर्भिः'वास्तोष्पते ध्रुवा स्थूणाम्' इति पञ्च-
विंशतिः पञ्च वा बिल्वफलानि तद्बीजानि वा जुहुयुः। तत्राचार्यः स्विष्ट-
कृदादिहोमशेषं समापयेत्। यजमानस्तु लोकपालेभ्यो ग्रहपीठदेवताभ्यश्च
बलिं दत्त्वा पूर्णाहुतिं हुत्वा शिख्यादिपञ्चचत्वारिंशद्देवताभ्यः पायसा-
दिना बलिं दत्त्वा ईशानादिक्रमेण चरकीविदारीपूतनापापराक्षसीभ्यो
लोकपालेभ्यश्च बलिं दत्त्वा शिख्यादिप्रीतये काञ्चनं द्विजेभ्यो ब्रह्मप्री-
तये धेनुं च दद्यात्। ततः शान्तिकलशोदकेन ऋत्विग्भिरभिषिक्तो
यजमान ऋत्विग्भ्यो दक्षिणां दत्त्वा वाद्यादिपूर्वकं राक्षोघ्नपावमानम-
न्त्रैर्गृहं सूत्रेण प्रदक्षिणं वेष्टयित्वा समन्ताज्जलधारां क्षीरधारां च दत्त्वा
मध्यनवपदे सुरूपां पृथ्वीं ध्यात्वा पृथ्व्यै नमः इति संपूज्य सर्वदेव-
मयं वास्तुं सर्वदेवमयं परम्, इतिपठित्वा गृहस्याग्नेय आकाशपदे
जानुमात्रं गर्तं खात्वा गोमयेनानुलिप्य शुभ्रचन्दनपुष्पाक्षतैरलङ्कृत्य
सप्त बीजानि दध्योदनं च क्षिप्त्वा नवं जलपूर्णकलशं शुक्लकुसुमयुतं
गन्धाद्यर्चितमादाय जानुभ्यां भुवं गत्वा तज्जलं गर्ते क्षिपेत्, ॐ नमो
वरुणाय इतिमन्त्रेण। जले प्रदक्षिणावर्ते पुष्पे चोर्ध्वमुखे शुभम्।
ततोऽपक्वमृत्पेटिकायां सप्तबीजदध्योदनशैवालफलपुष्पाणि क्षिप्त्वा सत्तू-
र्यघोषं पूर्वस्थापितां वृषवास्तुप्रतिमामानीय पेटिकायां संस्थाप्य पेटिकां
पिधाय पठेत्—

पूजितोऽसि मया वास्तो होमाद्यैरर्चनैः शुभैः।
प्रसीद पाहि विश्वेश देहि मे गृहजं सुखम्॥
वास्तोष्पते नमस्तेऽस्तु भूशय्याभिरत प्रभो।
मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा। इति॥

ततो मृत्पेटिकागतं संस्थाप्य—

सशैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि ।
तथा मां वह कल्याण सम्पत्सन्ततिभिः सह ॥

इति संप्रार्थ्य, तयैव मृदा गर्तं पूरयेत् । मृदाधिक्येऽधिकफलम् । साम्ये समम् । न्यूनत्वे न्यूनम् । गर्तोपरि गोमयेनालिप्य गन्धपुष्पाक्षतादि क्षिप्त्वाऽऽचार्यब्रह्मर्त्विजः संपूज्य तेभ्यो दक्षिणां च दत्त्वा ग्रहपीठवास्तुपीठदेवताः संपूज्य 'उत्तिष्ठ ब्रह्मणस्पते' 'यान्तु देवगणाः' इति विसृज्याचार्याय दत्त्वा ब्रह्मशिखयाद्युद्देशेन विप्रान्संभोज्य भूयसीं दक्षिणां दत्त्वा सुहृद्युतो भुञ्जीत ।

इति गृहवास्तुशान्तिप्रयोगः ।

अथ गृहदानप्रयोगः ।

गृहमध्ये दक्षिणभागे पद्मं विलिख्य तदुपरि प्रस्थमात्रांस्तिलांस्तदुपरि शय्यां स्थापयित्वा शय्योपरि (सौवर्णशय्योपरि) सौवर्णलक्ष्मीनारायणप्रतिमां संपूज्य प्रतिग्रहीतारं सपत्नीकं प्रतिग्रहार्थं कृत्वा तं करे गृहीत्वा समङ्गलघोषं वक्ष्यमाणमन्त्रैर्गृहं प्रवेशयेत् । ते च मन्त्राः—

एह्येहि नारायण दिव्यरूप सर्वामरैर्वन्दितपादपद्म ।
शुभाशुभानन्दशुचामधीश लक्ष्मीयुतस्त्वं च गृहं गृहाण ॥
नमः कौस्तुभनाथाय हिरण्यकवचाय च ।
क्षीरोदार्णवसुप्ताय जगद्धात्रे नमो नमः ॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः ।
चराचरस्य जगतो गृहभूताय वै नमः ॥
भूर्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः ।
नन्दन्ति यावत्कल्पान्तं तथाऽस्मिन्भवने गृही ॥
त्वत्प्रसादेन देवेश पुत्रपौत्रैर्युतो गृहे ।
पञ्चयज्ञक्रियायुक्तो वसेदाचन्द्रतारकम् ॥

ततस्तं पूर्वस्थापितशय्योपर्युदङ्मुखमुपवेश्य स्वयमासने प्राङ्मुख उपविश्य देशकालकीर्तनोत्तरममुकगोत्रायामुकशर्मणे ब्राह्मणायेदं गृहं पक्वेष्टकादिरचितं यथोपपत्तिसंपादितं कांस्यताम्रादिभाजनसर्वधान्यलवणघृतगुडशर्करागोबलीवर्ददासमञ्चतूलिकावितानादिसर्वोपकरणयुतं

सदीपप्रभोद्द्योतं सर्वदैवतं सर्वपापक्षयपूर्वककल्पकोटिशतावधिनारायण-समीपे क्षीरार्णवनिवासकामस्तुभ्यमहं संप्रददे न मम, इति दद्यात्। मृणमयगृहे दानं 'एकैकमन्वन्तरावच्छिन्नप्रतिलोकपालपुरनिवासकामः' इति। यद्वा सर्वत्र विष्णुप्रीतिकामः। ततः प्रार्थना—

इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम्।
तव विप्र प्रसादेन ममास्त्वतिनवं गृहम्॥
गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम।
प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दनः। इति॥

ततः प्रतिग्रहीता 'देवस्य त्वा' इति यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत्। दक्षिणा तु स्वर्णसहस्रमारभ्यैकसुवर्णपर्यन्तशक्त्या दर्शिता। ततः पादुकोपानच्छत्रचामरादिकं पुनर्दत्त्वा—

संपन्नं वाप्यसंपन्नं गृहोपस्करभूषणम्।
सर्वं संपूर्णमेवास्तु त्वत्प्रसादाद्द्विजोत्तम॥

इति प्रार्थयेत्।

एतत्फलमपि मात्स्ये—

य एवं सर्वसंपन्नं पक्वेष्टं विनिवेदयेत्।
कल्पकोटिशतं यावद्ब्रह्मलोके महीयते॥
शैलजं दारुजं वाऽपि यो दद्याद्विधिपूर्वकम्।
वसेत्क्षीरार्णवे रम्ये नारायणसमीपतः॥
मृण्मयं वाऽपि यो दद्याद्गृहं चोपस्करान्वितम्।
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत्। इति॥

एतच्च वास्तुपूजनम्।

अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे चायतने कुर्यान्न स दुःखमवाप्नुयात्॥

इत्युक्त्वा प्रतिसंवत्सरं कर्तव्यम्। अत्र वास्तुदेवतानां विशेषनैवेद्यादीनि। शिखिने घृतान्नम्। पर्जन्याय सोत्पलं घृतौदनम्। जयन्ताय पीतध्वजं पिष्टमयं कूर्चं च। कुलिशायुधाय पञ्च रत्नानि पैष्टं कुलिशं च। सूर्याय वितानकं धूपं सक्तुं च। सत्याय घृतगोधूमम्। भृशाय मत्स्यान्। अन्तरिक्षाय शष्कुलीः। वायवे सक्तून्। पूष्णे लाजान्। वितथाय चणकौदनम्। गृहक्षताय मध्वन्नम्। यमाय पिशितौदनम्।

गन्धर्वाय गन्धौदनम् । भृङ्गराजाय मेषजिह्विकाम् । मृगाय यावकम् । पितृभ्यः कृसरम् । दौवारिकाय दन्तकाष्ठं, पैष्टं कृष्णबलिं च । सुग्रीवायापूपम् । पुष्पदन्ताय पायसम् । वरुणाय कुशस्तम्बसहितं पद्मम् । असुराय पैष्टं हिरण्मयं सुरां च । शोषाय घृतौदनम् । पापाय गोधाम् । रोगाय घृतलड्डुकान् । अहये फलान्वितं पुष्पम् । मुख्याय सर्पिः । भल्लाटाय गुडौदनम् । सोमाय मधुपायसम् । सर्पेभ्यः शालिपिष्टम् । अदितये पोलिकाम् । दितये पूरिकाम् । आपाय क्षीरम् । आपवत्साय दधि । सावित्राय लड्डुकान्समरीचं कुशोदकं च । सवित्रे गुडापूपम् । जयाय घृतचन्दनम् । विवस्वते रक्तचन्दनं पायसं च । राजयक्ष्मणे आमं पक्वं च मांसम् । इन्द्राय हरितालौदनं घृतसंयुतम् । गुडोदनं तु मित्राय । रुद्राय घृतपायसम् । पृथ्वीधराय मांसानि कूष्माण्डानि च । अर्यम्णे शर्करापायसम् ।

पञ्चगव्यं यवांश्चैव तिलाक्षतहविश्चरून् ।
भक्ष्यं भोज्यं च विविधं ब्रह्मणे विनिवेदयेत् । इति ॥

राक्षसीनां तु, ईशानभागे चरक्यै मांसोदनं घृतं पद्मकेसरं च हविषान्वितम् । आग्नेये विदार्यै सरुधिरमांसौदनं हरिद्रौदनं च । नैर्ऋते पूतनायै सरुधिरं दध्योदनं मत्स्यखण्डैश्च संयुतं पीतरक्तं च बलिम् । वायव्ये पापराक्षस्यै मत्स्यमांसं सुरासवं च । सर्वत्र पायसं वा दद्यात् ।

इति गृहदानप्रयोगः ।

अथ मठदानम् ।

कृत्वा मठं प्रयत्नेन शयनासनसंयुतम् ।
पुण्यकाले द्विजेभ्योऽथ यतिभ्यो वा निवेदयेत् ॥
सर्वान् कामानवाप्नोति निष्कामो मोक्षमाप्नुयात् ।

इति स्कान्दोक्तम् ।

इति मठदानम् ।

अथ प्रतिश्रयदानम् ।

मार्कण्डेये—

कुर्यात्प्रतिश्रयगृहं पथिकार्तां हितावहम् ।
निजगेहैकदेशं वा साधूनां यो निवेदयेत् ॥

अक्षयं पुण्यमुदिष्टं तस्य स्वर्गापवर्गदम् ।
सर्वकामसमृद्धोऽसौ देववद्दिवि मोदते ॥

भविष्यत्पुराणेऽपि—

प्रतिश्रये सुविस्तीर्णे कारिते सजलेन्धने ।
दीनानाथजनार्थाय वद किं न कृतं भवेत् ॥

प्रतिश्रयो धर्मशाला ।

इति प्रतिश्रयदानम् ।

अथ कन्यादानम् ।

बृहस्पतिः—

सहस्रमेव धेनूनां शतं वाऽनडुहां समम् ।
दशानडुत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं ततः परम् ।
ददते सर्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते । इति ॥

देवलः—

तिस्रः कन्या यथान्यायं पालयित्वा निवेद्य च ।
न पिता नरकं याति नारी वा स्त्री प्रसूयिनी ॥

वसिष्ठः—

हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ।
धर्म्येण विधिना दातुमसगोत्रोऽपि युज्यते ॥

स्कान्दे—

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।

ऋष्यशृङ्गः—

वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् ।
नाम सङ्कीर्तयेद्विद्वान्कन्यायाश्चैवमेव हि ॥
तिष्ठेत्पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत् ।
मधुपर्कान्वितायैतां तस्मै दद्यात्सदक्षिणाम् ॥
उदपात्रं ततो गृह्य मन्त्रेणानेन दापयेत् ।
गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् ॥
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ।
भूमिं गावश्च दासीश्च वासांसि च स्वशक्तितः ॥

महिष्यो वाजिनश्चैव दद्यात्स्वर्णमणीनपि।
ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत्॥
यथाचारं विधेयानि माङ्गल्यकुतुकानि च।

कन्यादाता प्राङ्मुखो वरः प्रत्यङ्मुखः। 'दातोदङ्मुखो वरः प्रत्यङ्मुखः' इति भट्टचरणाः आचारश्च॥

अत्रायं प्रयोगः। वरं मधुपर्केण संपूज्य मासपक्षाद्युक्त्वा 'मम समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेऽनेन वरेणास्यां कन्यायामुत्पत्स्यमानसन्तत्या द्वादशावरान्द्वादश परान्पुरुषान्पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये' इति सङ्कल्प्य,

कन्यां कनकसंपन्नां कनकाभरणैर्युताम्।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥
विश्वम्भरः सर्वभूतः साक्षिण्यः सर्वदेवताः।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च॥

इतिमन्त्रं पुनः मम इत्यादि प्रीतये इत्यन्तमुक्त्वा अमुकप्रवरायामुकगोत्रायामुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः पुत्रायामुकशर्मणे वराय श्रीधररूपिणेऽमुकप्रवराममुकगोत्रोत्पन्नाममुकशर्मणः प्रपौत्रीममुकशर्मणः पौत्रीममुकशर्मणः पुत्रीममुकनाम्नीमिमां कन्यां श्रीरूपिणीं तुभ्यमहं संप्रददे इति वरहस्ते दद्यात्। वरस्तु, देवस्य त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा स्वशाखीयां कामस्तुतिं पठेत्। एवं न ममेत्यान्विता संप्रददे इत्यन्तेन वाक्येन त्रिर्दद्यात्। कन्यादानप्रतिष्ठार्थं सुवर्णं दक्षिणां भूमिदास्यादिकं यथाशक्ति दद्यात्। विस्तरस्तु प्रयोगरत्ने भट्टचरणैरुक्तः।

इति कन्यादानम्।

अथ वैवाहिकदानम्।

स्कान्दे—

वैवाहिकप्रदानं हि यो ददाति दयापरः।
विमानेनार्कवर्णेन किङ्किणीजालमालिना॥

महेन्द्रभवनं याति सेव्यमानोऽप्सरोगणैः । इति ॥

वैवाहिकं विवाहोपयोगिद्रव्यवस्त्रालङ्कारादीनि ।

इति वैवाहिकदानम् ।

अथ कपिलादानम् ।

आदित्यपुराणे—

सहस्रं यो गवां दद्यात्कपिलां चापि सुव्रत ।
सममेव पुरा प्राह ब्रह्मा यत्नविदां वरः ॥
रुक्मशृङ्गीं रौप्यखुरां सवस्त्रां कांस्यदोहनाम् ।
सवत्सां कपिलां दत्त्वा वंशान्सप्त समुद्धरेत् ॥
यावन्ति चास्या रोमाणि सवत्साया भवन्ति हि ।
सुरभीलोकमासाद्य रमते तावतीः समाः ।

अद्येत्यादि 'गोसहस्रफलावाप्त्यनन्तरसवत्सकपिलारोममितवर्षपर्यन्तं कामधेनुलोककामः इमां कपिलां सुवर्णशृङ्गाद्युपस्करयुताममुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे न मम' इति दद्यात् ।

मन्त्रो मात्स्ये—

कपिले सर्वभूतानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।

तत्रैव—

वस्त्रं तु त्रिगुणं धेन्वा दक्षिणां च चतुर्गुणाम् ।
एतैरलङ्कृतां धेनुं घण्टाभरणभूषिताम् ।
कपिलां विप्रमुख्याय दत्त्वा मोक्षमवाप्नुयात् ।

मुमुक्षुर्वस्त्रत्रयोपेतां दत्त्वा चतुरः सुवर्णान् दक्षिणां दद्यात् । द्विगुणोपस्करोपेता महती कपिला स्मृता । उपस्कराः सुवर्णशृङ्गवस्त्रदोहनपात्राद्याः सामान्यगोदाने वक्ष्यमाणाः ।

दत्ता सा विप्रमुख्याय स्वर्गमोक्षफलप्रदा ।
सप्तजन्मकृतात्पापान्मुच्यते दशसंयुतः ।
यान्यान्प्रार्थयते कामांस्तांस्तान्प्राप्नोति मानवः ॥

अद्येत्यादिसप्तजन्मकृतपापनाशपूर्वकस्वर्गकामो मोक्षकामः पुत्रकामः शुभकाम ईश्वरप्रीतिकाम इत्यादि यथाकामं फलमुल्लिख्य द्विगुणोपस्करयुतां दद्यात् । इति महाकपिलादानम् । इति दश महादानानि ।

दशधेनवो मात्स्ये—

यास्तु पापविनाशिन्यः कथिता दश धेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ।
प्रथमा गुडधेनुः स्याद्घृतधेनुस्तथाऽपरा ।
तिलधेनुस्तृतीया तु चतुर्थी जलसंज्ञिता ।
क्षीरधेनुस्तु विख्याता मधुधेनुस्तथा परा ।
सप्तमी शर्कराधेनुः कार्पासस्याष्टमी तथा ।
रसधेनुस्तु नवमी दशमी स्यात्स्वरूपतः ।
कुम्भी घृतादिधेनूनामितरासां तु राशयः ।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ।
नवमीं तिलतैलेन तथान्येऽपि महर्षयः ।

रसधेनुस्थाने सुवर्णधेनुस्तिलतैलधेनुश्च । एतद्विधानमपि मात्स्यएव—

कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः ।
लघ्वैणं चाजिनं तद्वद्वत्सस्य परिकल्पयेत् ।

लघ्वैणं चाजिनं लघुकृष्णाजिनम् ।

प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥

प्राङ्मुखीं प्राक्शिरसम् । सवत्सां उत्तरभागस्थितवत्ससहिताम् ।

उत्तमा गुडधेनुः स्याद्यदा भारचतुष्टयम् ।
वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता ॥
अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु ।
चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः ॥

भारः पलसहस्रद्वयमिति परिभाषायामुक्तम् ।

धेनुवत्सौ घृतस्यैतौ सितसूक्ष्माम्बरावृतौ ॥
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ।
सितसूत्रशिरालौ तौ सितकम्बलकम्बलौ ॥
ताम्रगण्डुकपृष्ठौ तौ सितचामररोमकौ ।

गण्डुकं ककुत्प्रदेशे ।

विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ ।
क्षौमपुच्छौ कांस्यदोहौ इन्द्रनीलकतारकौ ॥

सुवर्णशृङ्गाभरणौ राजतक्षुरसंयुतौ ।
नानाफलमयैर्दन्तैर्घ्राणगन्धकरण्डकौ ॥

गन्धकरण्डकः कर्पूरादियुतः पात्रविशेषः ।

इत्येवं रचयित्वा तौ धूपदीपैरथार्चयेत् ॥

वस्त्रमुक्तादीनां सारतो मानतश्चाधिक्ये फलाधिक्यम् ।

अथ प्रयोगः । अद्येत्यादि 'सर्वपापक्षयपूर्वकाशेषयज्ञफलप्राप्तिसहित-भुक्तिमुक्तिकामो गुडधेन्वादिदानं करिष्ये' इतिसङ्कल्प्य विप्रं वृत्वा संपूज्य सवत्सगुडधेनवे नमः इत्यावाहनप्रतिष्ठापनपूजनानि कृत्वा तां प्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रैरामन्त्र्याद्येत्यादि 'सर्वपापक्षयपूर्वका-शेषयज्ञफलप्राप्तिसहितभुक्तिकाम इमां धेनुममुकप्रवरायामुकगोत्राया-मुकशर्मणे विप्राय तुभ्यमहं संप्रददे न मम' इति दद्यात् । विप्रस्तु पुच्छे प्रतिगृह्य स्वस्तीत्युक्त्वा कामस्तुतिं पठेत् । दाता तु सुवर्णदक्षि-णादानविप्रभोजनभूयसीदानादिकर्मशेषं समापयेत् ॥

अथामन्त्रणमन्त्राः—

या लक्ष्मीः सर्वभूतानां या च देवे व्यवस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥
देहस्था या च कल्याणी शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपाऽस्तु सा श्रिये ॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥
स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां तथा ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे । इति ॥
एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
विधानमेतद्धेनूनां सर्वासामिह पठ्यते ॥

सर्वासां प्रत्यक्षधेनुव्यतिरिक्तानामित्यर्थः । उक्तवचनस्य तत्रा-नुपयोगात् ।

एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः ।
मन्त्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि ॥

यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ।
अशेषयज्ञफलदाः सर्वपापहराः शुभाः ॥
अयने विषुवे पुण्ये व्यतीपाते तथा पुनः ।
गुडधेन्वादयो देया उपरागादिपर्वसु ॥

अत्र 'पापविनाशिन्य इत्युपक्रमात्सर्वपापहरा इत्युपसंहाराच्च पापनाश एव फलं न भुक्तिमुक्त्यादि' इति दानसौख्ये। तत्र पुत्रेष्टाविवार्थवादोक्तानां भुक्तिमुक्त्यादीनां त्यागे मानाभावात्। उपक्रमोपसंहारौ त्वप्रयोजकौ। यत्तु "पद्मपुराणादावेकेनैव घटेन घृतादिधेनुः द्रोणमात्रेण च तिलेन धेनुरुक्ता तत्प्रकारान्तरम्' इति कल्पतरौ। दानविवेके तु 'पलसहस्रप्रमाणः कुम्भः' इति। 'द्वादशपलाधिकानि पञ्चपलशतानि कुम्भः' इत्यन्ये। ततश्च यथाधिकारं व्यवस्था ज्ञेया। यद्यपि गुडधेन्वनन्तरं घृतधेनुरुद्दिष्टा तथाऽपि तिलाभावे तथा दद्यात्घृतधेनुमित्युक्त्वा तिलानां प्राधान्यात्तद्धेनुरादावुच्यते।

अथ तिलधेनुः।

तत्र किञ्चित्प्रकारान्तरं विष्णुधर्मोत्तरे—

अनुलिप्ते महीपृष्ठे वस्त्राजिनकुशावृते ।
धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृताम् ॥
धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकम् ।
स्वर्णशृङ्गीं रौप्यखुरां गन्धघ्राणवतीं तथा ॥
कुर्याच्च शर्कराजिह्वां गुडास्याममविकम्बलाम् ।
इक्षुपादां ताम्रपृष्ठां शुचिमुक्ताफलेक्षणाम् ॥
प्रशस्तपत्रश्रवणां फलदन्तवतीं शुभाम् ।
स्रग्दामपुच्छां कुर्वीत नवनीतस्तनान्विताम् ॥
सितसूत्रशिरालां च सितसर्षपरोमिकाम् ।
फलैर्मनोहरैर्भक्ष्यैर्मणिमुक्ताफलान्विताम् ॥
सितवस्त्रयुगच्छन्नां घण्टाभरणभूषणाम् ।
ईदृक्संस्थानसंपन्नां कृत्वा श्रद्धासमन्वितः ॥
कांस्योपदोहनां दद्यात्केशवः प्रीयतामिति ।

फलेतिकर्तव्यतामन्त्रा गुडधेनूक्ता एव ।

वह्निपुराणे तु—

तिलाश्च पितृदैवत्या निर्मिताश्चेह गोसवे ।
ब्रह्मणा तन्मयी धेनुर्दत्ता प्रीणातु केशवम् ॥

इति मन्त्रान्तरमुक्तम् ।

अथ घृतधेनुः ।

विष्णुधर्मोत्तरे—

तिलाभावे तथा दद्याद्घृतधेनुं प्रयत्नतः ।
वासुदेवं जगन्नाथं घृतक्षीराभिषेचनात् ॥
संपूज्य पूर्ववत्पुष्पैर्गन्धधूपादिभिर्नरः ।
अहोरात्रोषितो नाम्ना अभिषूय घृताऽर्चिषम् ॥

अभिषूय प्रज्वाल्य, घृतार्चिषमग्निम् ।

गव्यस्य सर्पिषः कुम्भं पुष्पमालादिभूषितम् ।
कांस्यापिधानसंयुक्तं सितवस्त्रयुगेन च ॥
हिरण्यगर्भसहितं मणिविद्रुममौक्तिकैः ।

अत्र पलसहस्रपरिमाणः कुम्भः । द्वादशपलाधिकानि पञ्चपलशतानीति वा ।

इक्षुयष्टिमयान्पादान्खुरान्रौप्यमयांस्तथा ।
सौवर्णे चाक्षिणी कुर्याच्छृङ्गे चागरुकाष्ठजे ॥
सप्तधान्यमये पार्श्वे पत्रोर्णेन च कम्बलम् ।
कुर्यात्तुरुष्ककर्पूरैर्घ्राणं फलमयान्स्तनान् ॥
तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखम् ।

पत्रोर्णं धौतकौशेयम् । तुरुष्कः सिह्लकम् । सिह्लारस इति यावत् ॥

पुच्छं क्षौममयं कार्यं रोमाणि सितसर्षपैः ।
ताम्रपृष्ठं विचित्रं तु ईदृग्रूपां मनोरमाम् ॥
विधिना कृतवत्सां च कुर्याल्लक्षणलक्षिताम् ।
एतैः कृत्वा तथा नत्वा पूजयित्वा विधानतः ॥
तद्भक्ताय प्रदातव्या सज्जला शास्त्रपारगे ।
एतां ममोपकाराय गृह्णीष्व त्वं द्विजोत्तम ॥
प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः ।
इत्युदाहृत्य विप्राय दद्याद्धेनुं नराधिप ॥

स्कान्दे त्वयं मन्त्रः—

घृतं गावः प्रसूयन्ते घृतं भूम्यां प्रतिष्ठितम् ।
घृतमग्निश्च देवाश्च घृतं मे संप्रदीयताम् । इति ॥

फलं च—

घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
तेषु लोकेषु सर्वेषु सुपुण्येषूपजायते ॥
सकामानामियं व्युष्टिः कथिता नृपसत्तम ।

व्युष्टिः फलम् ।

विष्णुलोकं नरा यान्ति निष्पापा धेनुदानतः ।

इत्यादि । "दक्षिणा त्रैकसुवर्णप्रभृति यथाशक्ति" इति मदनरत्ने । 'यथाशक्ति हिरण्यम्' इति हेमाद्रौ ॥

अथ जलधेनुः ।

तत्रैव जलधेनुं प्रक्रम्य—

जलकुम्भं नरव्याघ्र सुवर्णरजतान्वितम् ।

'सुवर्णरजतशृङ्गखुरान्वितम्' इति सांप्रदायिकाः ।

रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वितम् ।
सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम् ॥
कुष्ठमांसीमुरोशीरबालकामलकैर्वृतम् ।
प्रियङ्गुपत्रसहितं सितवस्त्रोपवीतिनम् ॥
सच्छत्रं सउपानत्कं दर्भविष्टरसंस्थितम् ।
चतुर्भिः संभृतं भूप तिलपात्रैश्चतुर्दिशम् ॥
स्थगितं दधिपात्रेण घृतक्षौद्रवता मुखे ।

'तिलपात्राणि ताम्रस्य दधिपात्रं कांस्यस्य' इति दानविवेके ।

उपोषितः समभ्यर्च्य वासुदेवं जलेशयम् ।
पुष्पधूपोपहारैश्च यथाविभवमादृतः ॥
सङ्कल्प्य जलधेनुं च कुम्भं तमभिपूज्य च ।
पूजयेद्वत्सकं तद्वत्कृतं जलमयं बुधः ॥
एवंसंपूज्य गोविन्दं जलधेनुं सवत्सकाम् ।
सितवस्त्रधरः शान्तो वीतरागो विमत्सरः ॥
दद्याद्द्विजाय राजेन्द्र प्रीत्यर्थं जलशायिनः ।

जलशायी जगद्योनिः प्रीयतां मम केशवः ॥
इति चोच्चार्य भूनाथ विप्राय प्रतिपाद्यताम् ।
अपकान्नाशिना स्थेयमहोरात्रमतः परम् ।

तथा—धान्यानि पार्श्वद्वये, कुष्ठादीनि घ्राणदेशे, प्रियङ्गुपत्रं श्रवणे, यज्ञोपवीतं मूर्ध्नि स्थापयेत् । वत्सश्चतुर्थांशेनैव, दक्षिणा शक्तितः सुवर्णम् ।

अनेन विधिना दत्त्वा जलधेनुं नराधिप ।
सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः । इति ॥

अथ क्षीरधेनुः ।

स्कान्दे—

क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ।
अनुलिप्ते महीपृष्ठे गोमयेन नराधिप ॥
गोचर्ममात्रमानेन कुशानास्तीर्य सर्वतः ।
तत्रोपरि महाराज न्यसेत्कृष्णाजिनं ततः ॥
तत्रोपरि कुण्डलिकां गोमयेन कृतामपि ।
क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥
सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च ।
प्रशस्तपत्रश्रवणं तिलपात्रोपरि न्यसेत् ॥
मुखं गुडमयं तस्या जिह्वा शर्करया तथा ।
मूलप्रशस्तदन्ता च मुक्तामयफलेक्षणा ॥
इक्षुपादा दर्भरोमा सितकम्बलकम्बला ।
ताम्रपृष्ठा कांस्यदोहा पट्टसूत्रमयं तथा ॥
पुच्छं च नृपशार्दूल नवनीतमयस्तनी ।
स्वर्णशृङ्गी रौप्यखुरा पञ्चरत्नमयी भुवि ॥
चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि स्थापयेत् ।
सप्तव्रीहिसमायुक्तो दिक्षु सर्वासु प्रक्षिपेत् ॥
एवंलक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्चयेत् ॥
धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
अनेनैव तु मन्त्रेण क्षीरधेनुं प्रकल्पयेत् ॥

अनेन गुडधेनूक्तेन प्रकल्पयेदनुमन्त्रयेत् ।

आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥

गृह्णामि त्वां देवि भक्त्या ग्राहको मन्त्रमुच्चरेत् ।

एवं धेनुं प्रदत्त्वा च क्षीराहारो दिनं चरेत् ॥

त्रिरात्रं तु पयोभक्षो ब्राह्मणो राजसत्तम ।

मन्त्रस्तु—

गृह्णामि त्वां देवि भक्त्या कुटुम्बार्थे विशेषतः ।

भरस्व कामैर्मां सर्वैः क्षीरधेनो नमोऽस्तु ते ॥ इति ।

एतां हेमसहस्रेण शतेनाथ स्वशक्तितः ।

शतार्द्धमथवाऽप्यर्द्धं तत्रैवार्द्धं स्वशक्तितः ॥

दद्याद्धेनुं महाराज शृणु तस्यापि यत्फलम् ।

दिव्यं वर्षसहस्रं तु रुद्रलोके महीयते ॥

दिव्यवर्षसहस्रावधि रुद्रलोककामः इति फलोल्लेखः सङ्कल्पवाक्ये, अन्यद्गुडधेनुवत् ।

अथ दधिधेनुः ।

तत्रैव भूलेपनकुशकृष्णाजिनान्युक्त्वा—

दधिकुम्भं च संस्थाप्य सप्तधान्यस्य चोपरि ।

चतुर्थांशेन वत्सं तु सौवर्णमुखसंयुतम् ॥

प्रशस्तपत्रश्रवणा मुक्ताफलमयेक्षणा ।

चन्दनागरुशृङ्गा च मुखं वै गन्धमालिका ॥

गन्धमालिका गन्धद्रव्यविशेष इति केचित् । 'सुगन्धपुष्पस्रक्' इत्यन्ये । 'कर्पूरादिसुगन्धद्रव्यसमूहः' इति बहवः ।

जिह्वां शर्करया राजन्घ्राणं श्रीखण्डकं तथा ।

फलमूलमया दन्ताः सितसूत्रस्य कम्बलः ॥

ताम्रपृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा ।

सुवर्णशृङ्गीं रौप्यखुरां नवनीतमयस्तनीम् ॥

इक्षुपादां सुसंस्कृत्य सर्वाभरणभूषिताम् ।

आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैः सुपूजिताम् ॥

ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ।

पुच्छदेशोपविष्टाय मुद्रिकाकर्णमात्रकैः ॥

पादुकोपानहौ छत्रं दत्त्वा मन्त्रमनुस्मरेत् ।

मन्त्रो गुडधेनूक्तः ।

दधिक्राव्णेति मन्त्रेण दधिधेनुं प्रदापयेत् ।
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ॥
एकाहारो दिनं तिष्ठेद्दध्ना च नृपनन्दन ।
यजमानो वसेद्राजन्त्रिदिनं च द्विजोत्तमः ॥
यत्र मधुवहा नद्यो यत्र पायसकर्दमाः ।
मुनयो ऋषयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
दातारो दायकाश्चैव तेऽपि यान्ति परां गतिम् ।

मधुनदीकबहुपायसकऋषिसिद्धलोककामः, इति शेषफलोल्लेखः ॥

अथ मधुधेनुः ।

स्कान्दे—

मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णघटपूरिताम् ।
तद्वच्चतुर्थभागेन वत्सकं परिकल्पयेत् ॥
सौवर्णं तु मुखं कृत्वा शृङ्गाण्यगुरुचन्दनम् ।
पृष्ठं ताम्रमयं तस्याः पुच्छं सूत्रमयं तथा ॥
पादास्त्विक्षुमयाः कार्याः सितकम्बलकम्बलम् ।
मुखं गुडमयं कृत्वा जिह्वा शर्करयाऽन्विता ॥
मौक्तिके नयने तस्या दन्ताः फलमयाः स्मृताः ॥
दर्भरोमधरा देवी रौप्यखुरविभूषिता ॥
प्रशस्तपत्रश्रवणा नवनीतमयस्तनी ।
सर्वलक्षणसंयुक्ता सप्त धान्यानि दापयेत् ॥
चत्वारि तिलपात्राणि चतुर्दिक्षु च विन्यसेत् ।
आच्छाद्य वस्त्रयुग्मेन घण्टाभरणभूषिताम् ॥
कांस्योपदोहनीं कृत्वा गन्धपुष्पैस्तु पूजिताम् ।
पुच्छदेशोपविष्टाय ब्राह्मणाय प्रतिपादयेत् ॥
उदपूर्वं तु कर्तव्यं पश्चाद्दानं समाचरेत् ।
रसज्ञा सर्वदेवानां सर्वभूतहिते रता ॥
प्रीयन्तां पितरो देवा मधुधेनो नमोऽस्तु ते ।

एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
अहं गृह्णामि त्वां देवि कुटुम्बार्थे विशेषतः ।
कामान्कामदुघे धुङ्क्ष्व मधुधेनो नमोऽस्तु ते ॥
मधुव्रातेति मन्त्रेण प्रदाप्यायतचेतसा ।
धेनुं दत्त्वा च मधुपायसाभ्यां च दिनं नयेत् ॥

ब्राह्मणोऽपि तथैव त्रिरात्रं नयेत् ।

फलश्रुतिरपि—

यत्र मधुवहा नद्यो यत्र पायसकर्दमाः ।
ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगान्वरान्भुङ्क्ते ब्रह्मलोके स तिष्ठति ।

मधुनदीकबहुपायसकर्दममुनिसिद्धलोकोत्तमभोगोत्तरब्रह्मलोककामः, इति विशेषफलोल्लेखः ॥

अथ रसधेनुः ।

स्कान्दे—

रसधेनुं महाराज कथयामि समासतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
रसस्य तु घटं राजन्संपूर्णमैक्षवस्य तु ।
तद्वत्सङ्कल्पयेत्प्राज्ञश्चतुर्थांशेन वत्सकम् ॥
इक्षुदण्डमयाः पादा राजतखुरसंयुताः ।
सुवर्णशृङ्गाभरणा वस्त्रपुच्छा घृतस्तनी ॥
पुष्पकम्बलसंयुक्ता शर्करामुखजिह्विका ।
दन्ताः फलमयास्तस्याः पृष्ठं ताम्रमयं शुभम् ॥
पुष्परोमा तु राजेन्द्र मुक्ताफलकृतेक्षणा ।
सप्तव्रीहिसमायुक्ता चतुर्दिक्षु सदीपिका ॥
सर्वोपस्करसंयुक्ता सर्वगन्धविभूषिता ।
चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् ॥
धेनुं तु पूजयित्वाऽग्रे पुष्पगन्धस्रगादिभिः ।
पूर्वोक्ता ये च मन्त्राश्च तानेव प्रयतः स्मरेत् ॥

मन्त्रा गुडधेनूक्ताः ।

एवमुच्चारयित्वा तु दीयते वै द्विजोत्तमे ।

दश पूर्वान्परांश्चैव आत्मानं चैकविंशकम् ॥
नयेत्तु परमं स्थानं यस्मान्न निवर्तते पुनः ।
दाता वा ग्राहको वाऽपि एकाहं रसभोजकौ ॥
सोमपानं भवेत्तस्य सर्वक्रतुफलं लभेत् । इत्यादि ॥

स्वाधिकदशपूर्वदशपरपुरुषाणां निवृत्तिरहितपरपदप्राप्तये आत्मनश्च सोमपानसर्वक्रतुफलप्राप्तिकामः, इति विशेषफलोल्लेखः ॥

अथ शर्कराधेनुः ।

स्कान्दे—

तद्वच्च शर्कराधेनुं शृणु राजन्यथाऽर्थतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुः शर्करया राजन्सदा भारचतुष्टयम् ।
उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकः ॥
तदर्द्धं मध्यमा प्रोक्ता चतुर्थांशेन कनीयसी ।
तद्वद्वत्सं प्रकुर्वीत चतुर्थांशेन मानवः ॥
अथवाऽष्टांशतः कुर्याच्चतुर्थांशेन वत्सकम् ।

अष्टांशत इति भारचतुष्टयस्याष्टमांशेन अर्द्धभारेणेत्यर्थः ।

स्वशक्त्या कारयेद्धेनुमात्मपीडां न कारयेत् ।
सर्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः ॥
सौवर्णमुखशृङ्गाणि मौक्तिकैर्नयनानि च ।
गुडेन च मुखं कार्यं जिह्वा पिष्टमयी तथा ॥
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषिता ।
इक्षुपादा रौप्यखुरा नवनीतमयस्तनी ॥
प्रशस्तपत्रश्रवणा सितचामरभूषिता ।
पञ्चरत्नसमायुक्ता दर्भरोमसमन्विता ॥
कांस्योपदोहना सम्यग्गन्धपुष्पैः समन्विता ।
ईदृग्विधानसंयुक्ता वस्त्रैराच्छादितोपरि ॥
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय निवेदयेत् ।
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते ॥
वेदवेदाङ्गविदुषे विशेषेणाग्निहोत्रिणे ।
अनसूयवे प्रदातव्या न मत्सरयुताय वै ॥

अयने विषुवे पुण्ये व्यतीपातेषु षण्मुख ।
अन्येषु पुण्यकालेषु इच्छया वाऽपि दापयेत् ॥
सत्पात्रं तु द्विजं दृष्ट्वा स्वागतं श्रोत्रियं गृहे ।
तादृशाय प्रदातव्या पुच्छदेशे निवेदयेत् ॥
पूर्वामुखः सदा दाता अथवा स्यादुदङ्मुखः ।
धेनुं पूर्वमुखीं कृत्वा वत्समुत्तरतो न्यसेत् ॥
दानकाले तु ये मन्त्रास्तान्पठित्वा समर्चयेत् ।

मन्त्राः गुडधेनूक्ताः ।

आच्छाद्य चैव तं विप्रं मुद्रिकाकर्णवेष्टनैः ।
स्वशक्त्या दक्षिणां दद्याद्गन्धपुष्पं सचन्दनम् ॥
धेनुं समर्चयेत्तस्य मुखं च न विलोकयेत् ।
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत् ॥
सर्वपापहरा धेनुः सर्वकामप्रदायिनी ।
सर्वकामसमृद्धश्च जायते नात्र संशयः । इति ॥

अथ कार्पासधेनुः ।

वाराहे—

अतः परं प्रवक्ष्यामि धेनुं कार्पासकीं शुभाम् ।
एवं विश्वस्य गुप्त्यर्थं ब्रह्मणा चांशुकं कृतम् ॥
कार्पासमूलं तथापि तेनासावुत्तमः स्मृतः ।
सा च कार्पासभारेण धेनुः श्रेष्ठा प्रकीर्तिता ॥
मध्यमा च तदर्द्धेन तदर्द्धेन कनीयसी ।
पूर्ववद्वस्त्रधान्ये च हिरण्यं च तथैव च ॥
वत्सकं तु चतुर्थांशाद्दानमन्त्रो विधीयते ।
कुर्वीत पूर्ववद्वत्सं वस्त्रधान्याद्युपस्कृतम् ॥

पूर्ववद्वराहोक्ततिलधेनुदानवत् ।

हेमकुन्देन्दुसदृशे क्षीरार्णवसमुद्भवे ॥
सोमप्रिये सुधेन्वाख्ये सौरभेयि नमोऽस्तु ते ।
दत्तेयमिन्दुनाथाय शशाङ्कायामृताय च ॥
अत्रिनेत्रप्रजाताय सोमराजाय वै नमः ।

यस्त्वेवं परया भक्त्या ब्राह्मणाय प्रयच्छति ॥
स याति चन्द्रलोकं तु सोमेन सह मोदते ।
इति चन्द्रलोकगमनानन्तरचन्द्रसहवाससुखकामः, इति विशेषफलोल्लेखः ।

अथ लवणधेनुः ।

विष्यत्पुराणे युधिष्ठिरं प्रति कृष्णः—

शृणु राजन्प्रवक्ष्यामि लवणस्येह कल्पितम् ।
गोमयेनानुलिप्ते तु दर्भसंस्तरसंस्थितम् ॥
आविकं चर्म विन्यस्य पूर्वाशाभिमुखं स्थितम् ।
वस्त्रेण छादितं कृत्वा धेनुं कुर्वीत बुद्धिमान् ॥
हाटकेनैव कुर्वीत बहुवित्तोऽल्पवानपि ।
स्वर्णशृङ्गीं रौप्यखुरामिक्षुपादां फलस्तनीम् ॥
कार्या शर्करया जिह्वा गन्धघ्राणवती तथा ।
समुद्रोदरजां शुक्तिं कर्णौ च परिकल्पयेत् ॥
शृङ्गे चन्दनकाष्ठाभ्यां मौक्तिके चाक्षिणी उभे ।
कपोलौ सक्तुपिण्डाभ्यां यवानास्ये प्रदापयेत् ॥
कम्बलं पट्टसूत्रेण ग्रीवायां छत्रिकां तथा ।
पृष्ठे वै ताम्रपात्रं तु अपाने गुडपिण्डिकाम् ॥
लाङ्गूले कम्बलं दद्याद्रसान्क्षीरप्रदेशतः ।
योनिप्रदेशे तु मधु सर्वतस्तु फलान्विताम् ॥
एवंसम्यक् परिस्थाप्य लवणस्य कृतां तु गाम् ।
स्थापयेद्वत्सकं चापि चतुर्भागेन मानवः ॥
एवं धेनुं समभ्यर्च्य माल्यवस्त्रविभूषणैः ।
स्नात्वा देवार्चनं कुर्याद्ब्राह्मणानभिपूज्य च ॥
कृतां प्रदक्षिणं गां तु पुत्रभार्यासमन्वितः ।

दानमन्त्रः—

लवणे वै रसाः सर्वे लवणे सर्वदेवताः ।
सर्वदेवमये देवि लवणाख्ये नमोऽस्तु ते ॥
प्रदक्षिणा मही तेन कृता भवति भारत ।
सर्वदानानि दत्तानि सर्वर्तुकफलानि तु ॥

सर्वे रसाः सर्वमन्त्राः सर्वमेतच्चराचरम्।
सौभाग्यं च परा वृद्धिः शरीरारोग्यसंपदः॥
नृणां भवन्ति दत्त्वा तु रसधेनुं न संशयः।
सौभाग्यपरमवृद्ध्यारोग्यकामः। इति विशेषफलोल्लेखः॥
पुराणान्तरे गां लवणमयीं कृत्वा षोडशप्रस्थसंयुताम्। चतुर्भिर्वत्सं राजेन्द्र इत्यादिना लवणपरिमाणान्तरमुक्तम्।

अथ सुवर्णधेनुः

विष्णुधर्मे भगवानुवाच—

यद्ब्रह्मणोऽपि राजेन्द्र कथितं विष्णुना पुरा।
तत्ते विस्तरतो राजन्कथयाम्यनुपूर्वशः॥
सुवर्णस्य सुवर्णस्य शुद्धस्य परिकल्पितम्।
एकं सुवर्णपदं शोभनं रूपमाह अपरं मानम्।
रौप्यवत्सकसंयुक्तां मुक्ताफलविभूषिताम्।
प्रवालशृङ्गोपयुतां पद्मरागादिशालिनीम्॥
घृतपात्रस्तनवतीं कर्पूरागरुनासिकाम्।
शर्करारसनोपेतां मिष्टान्नरसवासिताम्॥
शङ्खशृङ्गान्तरां शुक्तिं ललाटस्थानकल्पिताम्।
फलदन्तां वस्त्रयुग्मपार्श्वां क्षौमसुकम्बलाम्॥
इक्षुपादां नालिकेरश्रवणां गुडजानुकाम्।
पञ्चगव्यापानवतीं कांस्यपृष्ठसमन्विताम्॥
सुपट्टसूत्रलाङ्गूलां सप्तधान्यसमन्विताम्।
फलपुष्पसमोपेतां छत्रोपानत्समन्विताम्॥
सुवर्णधेनुं विप्राय प्रतिपाद्येदृशीं नरः।
हिरण्यरेताः पुरुषः पुराणः कृष्णपिङ्गलः॥
तप्तहेमच्छविः स्रष्टा विश्वात्मा प्रीयतामिति।
अनेनैव तु मन्त्रेण धेनोर्दानं प्रकीर्तितम्॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयम्॥
कुलानां तु सहस्रं च स्वर्गं नयति तद्बुधः। इति॥
'अश्वमेधसहस्रतुल्यफलप्राप्तिकुलसहस्रस्वर्गनयनकामः', इति कामफलोल्लेखः।

वह्निपुराणे तु—

सुवर्णधेनुश्चाप्यत्र सुवर्णाश्च चतुर्दश ।
सुनिर्णिक्तसुवर्णैश्च सप्तभिर्मध्यमा मता ॥
चतुर्भिः कन्यसी प्रोक्ता चतुर्थांशेन वत्सकः ।
गुडधेनुविधानेन दत्ता सर्वफलप्रदा ॥

इत्यादिना सर्वं गुडधेनुवदुक्तम् ॥

अथ वन्ध्यात्वहरं सुवर्णधेनुदानम् ।

वायुपुराणे—

चतुर्विधा तु या वन्ध्या भवेद्वत्सवियोजनात् ।

चतुर्विधा—

वन्ध्या च काकवन्ध्या च स्त्रीप्रसूश्च मृतप्रजा । इति ॥

वन्ध्या अपत्यसामान्याभाववती । काकवन्ध्या काकवदेकापत्या ।

वक्ष्ये तस्याः प्रतीकारं तत्स्वरूपं निबोध मे ।
हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढाम् ॥
धेनुं पलेन वत्सं च पादेन गुरुरब्रवीत् ।
धेनुं रौप्यखुरां रत्नं तस्याः पुच्छे नियोजयेत् ॥
घण्टां गले च बध्नीयात्तिलकं चोभयोरपि ।
अर्चयेद्विधिना तां तु नैवेद्यं पायसं भवेत् ॥
मोदकांश्च तथाऽपूपान्गुडं लवणमेव च ।
जीरकं च सुविस्तीर्णे शूर्पे वेणुमये दृढम् ॥
धेनोरेकं प्रदातव्यं ब्राह्मणस्त्रीषु चैव हि ॥
षडष्टौ दश वा दद्यात्तदनन्तरमेव च ।
ब्राह्मणं सर्वशास्त्रार्थकुशलं धर्मवेदिनम् ॥
विद्याविनयसंपन्नं शान्तं दान्तं जितेन्द्रियम् ।
अलोलुपं सर्वजनप्रियं कल्मषवर्जितम् ॥
आहूय भक्त्या संपूज्य वस्त्राद्यैर्गन्धपुष्पकैः ।
तेनैव कारयेत्पूजामाद्दतो धेनुवत्सयोः ॥
होमं च कारयेत्तत्र समिदाज्यचरूत्कटम् ।
सोमो धेनुमिमं मन्त्रं समुच्चार्य ततः पुनः ॥
प्राङ्मुखायोपविष्टाय प्रदद्यात्तामुदङ्मुखः ।

मन्त्रेणानेन विधिवत्पुच्छे हस्तं निधाय च ॥
धेनुर्याऽङ्गिरसः सत्रे वसिष्ठे सुरभी च या ।
दुहिता च तथा भानोरग्नेश्च वरुणस्य च ॥
याश्च गावः प्रवर्तन्ते वनेषूपवनेषु च ।
प्रीणन्तु ता मम सदा पुत्रपौत्रप्रवर्द्धनाः ॥
प्रयच्छन्तु दिवारात्रमविच्छेदं च सन्ततेः ।
वन्ध्यात्वं काकवन्ध्यात्वं कन्याप्रसव एव च ॥
तथैव मृतवत्सात्वं दोषं मम चतुर्विधम् ।
दानेतानेन हरतु या सा कामदुघाऽनघा । इति ॥

अथ स्वरूपतो गोदानम् ।

तत्र याज्ञवल्क्यः—

यथाकथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥

जाबालः—

होमार्थमग्निहोत्रस्य यो गां दद्याद्दयान्वितः ।
त्रिवित्तपूर्णा पृथिवी तेन दत्ता न संशयः ॥

अङ्गिराः—

गौरेकस्यैव दातव्या श्रोत्रियस्य विशेषतः ।
सा हि तारयते पूर्वान्सप्त सप्त च सप्त च ॥

आत्रेयः—

सीदते बहुभृत्याय श्रोत्रियायाऽऽहिताग्नये ।
अतिथिप्रियाय दान्ताय देया धेनुर्गुणान्विता ॥

देवलः—

सुशीलां लक्षणवतीं युवतीं वत्ससंयुताम् ।
बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः ॥

व्यासः—

सङ्ग्रामेष्वर्जयित्वा तु यो वै गाः संप्रयच्छति ।
यादृशीः स्पर्शयेद्गावः स तावत्फलमश्नुते ॥

तावत्तद्रोममितवत्सरं स्वर्गफलम् ।

योो वै द्यूते धनं जित्वा गाः क्रीत्वा संप्रयच्छति ।
स दिव्यमयुतं शक्र वर्षाणां फलमश्नुते ॥

भारते—

न गोदानात्परं दानं किञ्चिदस्तीति मे मतिः ।
सा गौर्न्यायार्जिता दत्ता कृत्स्नं तारयते कुलम् ॥

तथा—

अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च ।
हव्यकव्यव्यपेताय गौर्न देया कथञ्चन ॥

तृणानि खादन्ति वसन्त्यरण्ये पिबन्ति तोयान्यपरिग्रहाय ।
दुह्यन्ति वाह्यन्ति पुनन्ति पापं गवां रसैर्जीवति जीवलोकः ॥

इति प्रशंसा ।

अथ विधिः ।

याज्ञवल्क्यः—

हेमश्रृङ्गी शफैः रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥

विश्वामित्रः—

प्राङ्मुखीं गामवस्थाप्य सवत्सां गां सुपूजिताम् ।
पुच्छदेशे तु दाता वै ततो बद्धशिखो भवेत् ॥
उदङ्मुखस्तु विप्रः स्यात्पात्रलक्षणलक्षितः ।
आज्यपात्रं करे कृत्वा कनकेन समन्वितम् ॥
निक्षिप्य पुच्छं तस्मिंस्तु घृतदिग्धं प्रगृह्य च ।
सतिलं विप्रपाणिं च प्रागग्रं तु निधापयेत् ॥
सतिलं सकुशं चापि गृहीत्वा दानमाचरेत् ।
अनेनैव तु मन्त्रेण पात्रहस्ते जलं क्षिपेत् ॥

मन्त्रो वक्ष्यते ।

अनुव्रज्य च तां धेनुं ब्राह्मणेन समन्विताम् ।
गौतमीं तु ततो विद्यां जपेत प्रयतः शुचिः ॥
उद्दिश्य वासुदेवं च प्रीयतामिति चालये ।
पात्रं मनसि सञ्चिन्त्य तोयमप्सु विनिक्षिपेत् ॥

अथ प्रयोगः । अद्येत्यादिगोमात्रदाने स्वर्गकामः सवत्सधेनुदाने वत्सधेनुरोममितवर्षावधिस्वर्गकामः । अग्निहोत्राय दानं तु वित्तपूर्णा-त्रिवारपृथ्वीदानफलतुल्यफलकामः सर्वत्रापि कृत्स्नकुलतारणकामः सर्व-पापक्षयकाम ईश्वरप्रीतिकामो वा गोदानं करिष्ये, इतिसङ्कल्प्य प्राङ्मुखीं सवत्सां गां विप्रं च संपूज्य ससुवर्णमाज्यपात्रं हस्ते गृहीत्वा तत्र पुच्छं घृताक्तं कृत्वा विप्रहस्ते कुशतिलजलान्यादाय उक्तफलेष्वभि-लषितं फलमुक्त्वा—

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

इति मन्त्रं,

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे ॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥

इतिपौराणमन्त्रं च पठित्वा जलमुत्सृजेत् । दानप्रतिष्ठार्थं दक्षिणां दत्त्वा ब्राह्मणधेनू अनुव्रज्य—

गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतानां क्षरन्ति च वहन्ति च ॥
हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि ।
ऋषीणामपि होतॄणां गावो होमे प्रतिष्ठिताः ॥
सर्वेषामेव भूतानां गावः शरणमुत्तमम् ।
गावः पवित्रं परमं गावो मङ्गलमुत्तमम् ॥
गावः सर्वस्य लोकस्य गावो धन्याः सवाहनाः ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ।

इतियमोक्तां गोमतीं विद्यां जपेत्
महाभारतेऽपि गोमती—

गावो मामुपतिष्ठन्तु हेमशृङ्ग्यः पयोमुचः ।
सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा ॥
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् । इति ॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

इति पठित्वा धेनुं द्विजं च प्रदक्षिणीकृत्य दद्यादित्यपि वदन्ति दक्षिणामाह वसिष्ठो गोदानप्रकरणे—

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सुवर्णं पावनं प्राहुः परिमाणं परं तथा ॥
यजमानस्ततो दद्याद्यथाशक्त्या तु दक्षिणाम् । इति ॥

'तदशक्तपरम्' इति मदनः ।

इति सामान्यप्रत्यक्षगोप्रदानविधिः ।

अथ प्रकारान्तरेण सामान्यगोः पूजनं दानं च ।

अद्येत्यादि 'गृहसमुद्रशैलवनोपेतपृथ्वीदानसमफलैतद्धेनुवत्सरोमसङ्ख्ययुगदेवलोकमहितत्वपितृपितामहप्रपितामहनरकोद्धरणघृतक्षीरवहबहुकुल्याकदधिपायसकर्दमदेशाधिकरणेप्सितकामगत्यात्मलोकसुलभत्वब्रह्मलोकसुलभत्वाजस्रचन्द्रसमानवक्त्रसुतप्तजाम्बूनदसमानवर्णमहानितम्बस्तनवृत्तमध्यनलिनाभनेत्रानेकस्त्रीसेव्यमानत्वकामो मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं देशकालाद्यनुसारतो गोदानमहं करिष्ये' इति सङ्कल्प्य तदङ्गब्राह्मणवरणं ब्राह्मणपूजनं गोः पूजनं च करिष्ये ।

ब्राह्मणपूजनम्—

तव पादोदकं तीर्थं मुखे वेदाः प्रतिष्ठिताः ।
पाद्यं गृहाण विप्राग्र्य भूमिदेव नमोऽस्तु ते ॥ पाद्यम् ।
भूमिदेवाग्रजन्माऽसि त्वं विष्णुः पुरुषोत्तमः ।
प्रत्यक्षो ह्यग्निपुरुष अर्घोयं प्रतिगृह्यताम् ॥ अर्घम् ।

आचमनगन्धपुष्पवस्त्रादिना पूजयेत् । ततो धेनोरङ्गेषु देवता न्यसेत् ।

गोभ्यो यज्ञाः प्रवर्तन्ते गोभ्यो यज्ञाः समुत्थिताः ।
गोभ्यो वेदाः समुत्तीर्णाः सषडङ्गपदक्रमाः ॥
शृङ्गमूले गवां नित्यं ब्रह्मविष्णू समाश्रितौ ।
कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ ॥
दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः ।
सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः ॥
सन्ध्याद्वयं चोष्ठदेशे ग्रीवायामिन्द्र आश्रितः ।
रक्षांसि कुक्षिदेशे तु साध्याश्चोदरसंस्थिताः ॥
चतुष्पादेषु वै धर्मः सायं जङ्घासु संस्थिताः ।
खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥
पुराणानि च आन्त्रेषु गात्रे चाप्सरसः स्थिताः ।
पृष्ठैकादशरुद्राश्च वसवः सर्वसन्धिषु ॥
श्रोणितटस्थाः पितरः सोमो लाङ्गूलमास्थितः ।
आदित्याश्चाप्यधो वालाः पिण्डीभूता व्यवस्थिताः ॥
साक्षाद्गङ्गा च गोमूत्रे गोमये यमुना तथा ।
क्षीरे सरस्वती देवी नर्मदा रुधिरे स्थिता ॥
हुताशनः स्वयं सर्पिर्ब्राह्मणानां गुरुः परः ।
अष्टाविंशतिदेवानां कोट्यो रोमसु संस्थिताः ॥
उदरे पृथिवी ज्ञेया सशैलवनकानना ।
चत्वारः सागराः पूर्णा गवां ये तु पयोधराः ॥

इति नित्यं ध्यायेत् ।

या लक्ष्मीः सर्वभूतानां सर्वदेवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
विष्णुवक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपा समाश्रये ॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
या लक्ष्मीर्लोकपालानां सा धेनुर्वरदा भव ॥
सौरभेयि सर्वहिते पवित्रे पापनाशिनि ।
प्रगृह्णीष्व मया दत्तं पाद्यं त्रैलोक्यवन्दिते ॥ पाद्यम् ।
सर्वदेवमये देवि सर्वतीर्थमये शुभे ।

गृहाणार्घ्यं मया दत्तं सौरभेयि नमोऽस्तु ते ॥ अर्घ्यम् ।
देहस्थिता च रुद्राणी शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ आचमनीयम् ।
सर्वतीर्थमये देवि सर्वदेवमये शुभे ।
गृहाणेदं मया दत्तं स्नानं ते देविरूपिणि ॥ स्नानम् ।
आच्छादनं गवे दद्याच्छुभं शुचि सुनिर्मलम् ।
सुरभे वस्त्रदानेन प्रीयतां परमेश्वरि ॥ वस्त्रम् ।
या लक्ष्मीः सर्वभूतानां सर्वभूतेष्ववस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ चंदनम्, अक्षताः ।

अथाङ्गपूजा । ललाटे देव्यै नमः । नासावंशे षण्मुखाय नमः । नासापुटे कम्बलाश्वतराभ्यां नमः । कर्णयोरश्विभ्यां देवाभ्यां नमः । चक्षुषोः शशिभास्कराभ्यां नमः । दन्तेषु सर्ववायुभ्यो नमः । जिह्वायां वरुणाय नमः । हुङ्कारे सरस्वत्यै नमः । गण्डयोर्यमयक्षाभ्यां नमः । कुक्षिदेशे रक्षोभ्यो नमः । उरसि साध्येभ्यो नमः । चतुष्पादेषु धर्माय नमः । जङ्घयोः सायंकालाय नमः । ओष्ठयोः सन्ध्याद्वयाय नमः । ग्रीवायामिन्द्राय नमः । कण्ठे सामवेदाय नमः । शृङ्गमूले ब्रह्मविष्णुभ्यां नमः । शृङ्गाग्रे स्थावरजङ्गमेभ्यस्तीर्थेभ्यो नमः । शिरोमध्ये महादेवाय नमः । खुरमध्ये गन्धर्वेभ्यो नमः । खुराग्रे पन्नगेभ्यो नमः । सर्वगात्रेषु प्रजापतये नमः । पृष्ठे एकादशरुद्रेभ्यो नमः । सर्वसन्धिषु वसुभ्यो नमः । श्रोणितटे पितृभ्यो नमः । लाङ्गूले सोमाय नमः । वालेष्वादित्येभ्यो नमः । गोमूत्रे गङ्गायै नमः । गोमये यमुनायै नमः । क्षीरे सरस्वत्यै नमः । दध्नि नर्मदायै नमः । सर्पिषि हुताशनाय नमः । रोमसु त्रयस्त्रिंशत्कोटिदेवताभ्यो नमः । उदरे पृथिव्यै सकाननायै सशैलायै नमः । पयोधरेषु चतुःसागरेभ्यो नमः । इत्यङ्गपूजा । ततो गवेऽलङ्कारान्दद्यात् । यथा—स्वर्णं शृङ्गे । खुरे रौप्यम् । पृष्ठे ताम्रम् । भाले आदर्शम् । नेत्रयो रत्नद्वयम् । कण्ठे घण्टां चामरं यज्ञोपवीतं वस्त्रं च । पुच्छे मुक्ताप्रवालानि च ।

देवद्रुमरसोद्भूतं गोघृतेन समन्वितम् ।
प्रयच्छामि महाभागे गौर्धूपं प्रतिगृह्यताम् ॥ धूपम् ।

आनन्दकृत्सर्वलोके देवानां च सदा प्रिये ।
गौस्त्वं पाहि जगन्नाथे दीपोऽयं प्रतिगृह्यताम् ॥ दीपम् ।
सुरभे त्वं जगन्मातर्देवि विष्णुपदे स्थिता ।
सर्वदेवमये ग्रासमिमं दत्तं मयाऽग्रतः ॥ गोग्रासम् ।

गोरङ्गेष्वावाहितदेवताभ्यश्च धूपदीपनैवेद्यफलताम्बूलदक्षिणां दद्यात् ।

गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतेभ्यो रसन्ति च वहन्ति च ॥
हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि ।
ऋषीणामग्निहोत्राणां गावो मे सप्रतिष्ठिताः ॥

इति प्रार्थ्य, अद्येत्यादिकामं सङ्कल्प्य गोपुच्छे तर्पणं कुर्यात् । तद्यथा–ब्रह्मा तृप्यतु । रुद्रस्तृप्यतु । विष्णुस्तृप्यतु । राकाद्या देवतास्तृप्यन्तु । मनवस्तृप्यन्तु । ऋषयस्तृप्यन्तु । रुद्रास्तृप्यन्तु । दितिपुत्रास्तृप्यन्तु । साध्यास्तृप्यन्तु । मरुद्गणास्तृप्यन्तु । ग्रहास्तृप्यन्तु । नक्षत्राणि तृप्यन्तु । योगास्तृप्यन्तु । राशयस्तृप्यन्तु । वसुधा तृप्यतु । अश्विनौ तृप्यताम् । यक्षास्तृप्यन्तु । रक्षांसि तृप्यन्तु । मातरस्तृप्यन्तु । देवमातरस्तृप्यन्तु । श्रीस्तृप्यतु । रुद्राणी तृप्यतु । पिशाचास्तृप्यन्तु । सुपर्णास्तृप्यन्तु । पशवस्तृप्यन्तु । दानवास्तृप्यन्तु । दैत्यास्तृप्यन्तु । योगिनस्तृप्यन्तु । विद्याधरास्तृप्यन्तु । औषधयस्तृप्यन्तु । दिग्गजास्तृप्यन्तु । देवतागणास्तृप्यन्तु । यज्ञास्तृप्यन्तु । देवपत्न्यस्तृप्यन्तु । लोकपालास्तृप्यन्तु । अनिरुद्धस्तृप्यतु । बलदेवस्तृप्यतु । नारदस्तृप्यतु । जन्तवस्तृप्यन्तु । स्थावराणि तृप्यन्तु । जङ्गमानि तृप्यन्तु । नीवीतं कृत्वा । सनकस्तृप्यतु । सनन्दनस्तृप्यतु । सनातनस्तृप्यतु । कपिलस्तृप्यतु । आसुरिस्तृप्यतु । वोल्हस्तृप्यतु । पञ्चशिखस्तृप्यतु । अपसव्यं कृत्वा । कव्यवाहनस्तृप्यतु । अनलस्तृप्यतु । सोमस्तृप्यतु । यमस्तृप्यतु । अर्यमा तृप्यतु । अग्निष्वात्तास्तृप्यन्तु । बर्हिषदस्तृप्यन्तु । सोमपास्तृप्यन्तु । पितरस्तृप्यन्तु । यमतर्पण–यमं तर्पयामि । धर्मराजं त० । मृत्युं त० । अन्तकं त० । वैवस्वतं त० । कालं त० । सर्वभूतक्षयकरं त० । औदुम्बरं त० । दध्नं त० । नीलं त० । परमेष्ठिनं त० । वृकोदरं त० । चित्रं त० । चित्रगुप्तं तर्पयामि । पक्षद्वयजातान्पितॄन्तर्पयामि ।

मातृपक्षाश्च ये केचिद्ये केचित्पितृपक्षकाः ।
गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥
ये चान्ये लुप्तपिण्डा वै पुत्रदारविवर्जिताः ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ।
विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।

ततः सविप्रां सवत्सां गां त्रिःप्रदक्षिणीकृत्य 'आ गावो अग्मन्' इतिसूक्तं पठेत् 'वरुणस्योत्तम्भनमसि' इति जलं पिबेताम् ।

अथ दानम् ।

कांस्यपात्रे घृतं निधाय तिलदर्भपुष्पफलतुलसीसहितपात्रे विप्रहस्तं निधाय तदुपरि गोपुच्छं दत्त्वा जलधारां पुच्छोपरि विप्रहस्ते दद्यात् । प्राङ्मुखीं गामवस्थाप्य स्वयं प्राङ्मुख उदङ्मुखाय विप्राय दद्यात् । अमुकप्रवरोपेतोऽमुकगोत्रोऽमुकशर्माऽहं रुद्रदेवत्यां सवस्त्रां ताम्रपृष्ठीं सुवर्णशृङ्गीं रौप्यखुरां दोहनपात्रसहितां सवत्सामिमां गाममुकप्रवरोपेतायामुकगोत्रायामुकशर्मणे तुभ्यमहं संप्रददे । प्रतिग्रहीता 'देवस्य त्वा' इत्यादि 'प्रतिगृह्णामि' इत्यन्तमुक्त्वा गृहीत्वा 'क इदं कस्मा अदात् पृथिवी प्रतिगृह्णातु' यजमानः 'प्रतिगृह्णातु भवान्' द्विजः । 'गृह्णामि सुरभीं देवीं सर्वदेवमयीं शुभाम् । (?) हि वरदे उभयोस्तारका भव' इति । ततो यजमानः—

यज्ञसाधनभूता या विश्वस्याघौघनाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

इति मन्त्रमुक्त्वा—

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे ॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥

इतिपौराणमन्त्रान्पठित्वा जलमुत्सृजेत् । ततो गोदानप्रतिष्ठासिद्ध्यर्थं सुवर्णं दक्षिणां दत्त्वा ब्राह्मणधेनू अनुव्रज्य 'गावः सुरभयः'

इत्यादि पठेत्। प्रतिग्रहीता 'सुवर्णं दक्षिणात्वेन प्रतिगृह्णामि' 'राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमश्यां वयो दात्रे मयो मह्यमस्तु प्रतिग्रहीत्रे क इदं कस्मा अदात्'।

सर्वेषामेव भूतानां गावः शरणमुत्तमम् ।
गावः पवित्रं परमं गोष्ठ मङ्गलमुत्तमम् ॥
गावः सर्वस्य लोकस्य गावो धन्याः सवाहनाः ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ।

इति यमोक्तां गोमतीं विद्यां जपेत् । यजमानः—

गावो मामुपतिष्ठन्तु हेमश्रृङ्ग्यः पयोमुचः ।
सुरभ्यः सौरभेयाश्च सरितः सागरं यथा ॥
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् । इति ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥

इतिप्रार्थ्य'यस्य स्मृत्या' इति कर्मेश्वरार्पणं कुर्यात् । इति प्रकारान्तरेण स्वरूपतः सामान्यगोदानविधिः ।

अथ हेमश्रृङ्गीदानम् ।

अथ मात्स्ये हेमश्रृङ्गी—

दश सौवर्णिके श्रृङ्गे खुराः पञ्चपलान्विताः ।
पञ्चाशत्पलिकं कांस्यं ताम्रं चापि तथैव च ॥
दाताऽस्याः सर्वमाप्नोति यावदाभूतसंप्लवम् ।

सुवर्णमत्र दक्षिणा ।

इति हेमश्रृङ्गीदानम् ।

शिवाय विष्णवे वाऽपि यस्तु दद्यात्पयस्विनीम् ।
धेनुं स्नानोपहारार्थं स परं ब्रह्म गच्छति । इति ॥

स्कान्दे देवताभ्यो गोदानम्—

सवृषं गोशतं दद्याच्छिवायातीव शोभनम् ।
त्रिःसप्तकुलजैः सार्द्धं शृणु तत्पदमाप्नुयात् ॥

इत्यादिना शिवधर्मोक्तं शिवाय वृषाधिकगोशतदानम् । देवताभ्यो दाने देवतैव संप्रदानं न ब्राह्मणः । दत्तं च तत्तद्देवतायतने दक्षिणभागे स्थाप्यं, इति दानसौख्ये ।

अथोभयतोमुखी ।

तद्दानकालः स्कान्दे—

अर्द्धप्रसूतां गां दद्यात्कालादि न विचारयेत् ।
कालः स एव ग्रहणे यदा सा द्विमुखी तु गौः ॥

मात्स्ये—

रुक्मशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योपदोहनां राजन्सवत्सां द्विजपुङ्गवे ॥
प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ।
यावद्वत्सो योनिगतो यावद्गर्भं न मुञ्चति ॥
तावद्गौः पृथिवी ज्ञेया सशैलवनकानना ।

देवलः—

अलङ्कृत्योक्तविधिना सुवर्णत्रिपलान्विता ।
दातव्या द्विपला मध्यैकपला च कनीयसी ॥

वाराहे—

यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ।
तद्दिनं पायसाहारः पयसा वाऽतिवाहयेत् ॥
सुवर्णस्य सहस्रेण तदर्द्धेनापि वा पुनः ।
तस्याप्यर्द्धशतं वाऽथ पञ्चाशच्च तथाऽर्द्धकम् ॥
यथाशक्त्याऽपि दातव्यं वित्तशाठ्यविवर्जितम् ।

योगी—

सवत्सा रोमतुल्यानि युगान्युभयतोमुखी ।
दाताऽस्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥

मात्स्ये—

गोलोकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव।
स्त्रियश्च तं चन्द्रसमानवक्त्राः प्रतप्तजाम्बूनदतुल्यवर्णाः।
महानितम्बस्तनमध्यवृत्ता भजन्त्यजस्रं नलिनाभनेत्राः। इति॥

अथ प्रयोगः। अद्येत्यादि 'गृहसमुद्रशैलवनोपेतपृथिवीदानसमफलै-तद्धेनुवत्सरोमसङ्ख्ययुगदेवलोकमहितत्वपितृपितामहप्रपितामहनरकोद्ध-रणघृतक्षीरवहबहुकुल्याकदधिपायसकर्दमकदेशाधिकरणकेप्सितकामग-त्यात्मलोकसुलभत्वब्रह्मलोकसुलभत्वाजस्रचन्द्रसमानवक्त्रसुतप्तजाम्बूनद-तुल्यवर्णमहानितम्बस्तनवृत्तमध्यनलिनाभनेत्रानेकस्त्रीसेव्यमानत्वकामः, उभयतोमुखीं दास्ये' इतिसङ्कल्प्य, 'ॐ त्वं महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम्। अरमयो नमसैजदर्णस्सुतरणाँ अकृणोरि-न्द्रसिन्धून्' इति गामनुमन्त्र्य विप्रं वस्त्रादिभिर्गां च सुवर्णशृङ्गरूप्यखु-रादिभिरलङ्कृत्य गन्धादिनाऽभ्यर्च्य गृहस० इत्यादिकामः इत्यन्तं प्रयोगान्ते 'इमां सोपस्करामुभयतोमुखीं गां रुद्रदैवतां। अमुक-गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे न मम' इति ब्राह्मणकरे दद्यात्। विप्रस्तु विधिवत्प्रतिगृह्य 'ॐ स्वस्ति' इत्युक्त्वा गोपुच्छं स्पृष्ट्वा दत्तां दक्षिणां च प्रतिगृह्य गां स्पृष्ट्वा 'इरावती धेनुमती' 'स्योना पृथिवि भव' इति मन्त्रद्वयं जप्त्वा—

प्रतिगृह्णामि त्वां धेनुं कुटुम्बार्थे विशेषतः।
स्वस्तिभवतु मे नित्यं रुद्रमातर्नमो नमः॥

इतिमन्त्रेण गृहीतायां दक्षिणेन पाणिना 'गर्भेऽनुसन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मायुरआयसीररक्षं नधश्येनो जवसा-निरदीयम्' इतिमन्त्रेणानेन गर्भमाकृष्येत्। अनन्तरकृत्यमाह च्यवनः-निष्क्रान्तेऽग्निमुपसमाधाय देवान्पितॄन्नदीः पर्वतान्वनस्पतीनुदधीन्नागा-नोषधीस्तर्पयेत्। तत्र क्रमेण मन्त्राः— 'ये देवासः' 'उशन्तस्त्वा' 'इमं मे गङ्गे' 'अद्रिभिः सुतो मतिभिश्चनो हितः' 'वनस्पते' 'समुद्रज्येष्ठाः' 'अहिरिव भोगैः' 'मधुवाताः' इति। तदनु पृथिवीं तर्पयेत्। मन्त्रास्तु 'इळेद्यावा' 'मही द्यौः' 'उर्वी पृथिवी' 'गौरीर्मिमाय'। ततः समस्तव्याहृतिभिश्चतुरशीत्याज्याहुतीर्हुत्वा ब्राह्म-णान्भोजयित्वा स्वस्त्ययनं वाचयित्वा गामनुव्रज्य प्रागुक्तां गोमतीं विद्यां जप्त्वा पायसमात्रं भुञ्जीत। इत्युभयतोमुखीगोदानविधिः॥

भारते—

इतिकण्ठमनड्वाहं सर्वरत्नैरलङ्कृतम् ।
दत्त्वा प्रजापतेर्लोकान्विशोकः प्रतिपद्यते ॥

इत्यादिसुवर्णशृङ्गरौप्यलाङ्गूलादिकमपि भारतोक्तं बोध्यम् ।
इतिकण्ठं प्रबलगलकम्बलम् ।

अथ वैतरणी ब्रह्मवैवर्ते ।

या सा वैतरणी नाम यमद्वारे महानदी ।
शतयोजनविस्तीर्णा पृथुत्वे सा महासरित् ॥
अगाधाऽनन्तरूपा च दृष्टमात्रा भयावहा ।

तथा—

पतन्ति तत्र वै मर्त्याः क्रन्दमानाः सुदारुणम् ।
तच्छृणुष्व नरव्याघ्र कथ्यमानं युधिष्ठिर ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
पाटलामथवा कृष्णां कुर्याद्वैतरणीं शुभाम् ॥
स्वर्णशृङ्गीं रौप्यखुरां कांस्यपात्रसदोहनाम् ।
कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमन्विताम् ॥
कार्पासद्रोणशिखर आसीनं ताम्रभाजने ।
यमं हैमं प्रकुर्याद्वै लोहदण्डसमन्वितम् ॥
महामहिषमारूढमूढपाशं करे परे ।
इक्षुदण्डमयं बद्ध्वा उडुपं पट्टबन्धनैः ॥
उडुपोपरि तां धेनुं सूर्यदेहसमुद्भवाम् ।
कृत्वा प्रकाशयेद्विद्वाञ्छत्रोपानहसंयुताम् ॥
इममुच्चारयेन्मन्त्रं संगृह्योदकमण्डलुम् ।

अथ प्रयोगः । पूर्वोक्तायनादिकाले वा पाटलां कृष्णां वा हेमशृङ्गाद्युपेतां कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसंयुक्तां छत्रोपानद्युगलसंयुतां गां संनिधाप्य द्रोणमितकार्पासशिखरे ताम्रपात्रं तत्र च महिषारूढं दक्षिणवामहस्तधृतलोहदण्डपाशं हैमं यमं स्थापयित्वा तदग्रे पट्टबद्धेक्षुदण्डनिर्मितप्लवोपरि तां धेनुं स्थापयित्वा उदङ्मुखं प्रतिग्रहीतारमुपवेश्य स्वयं प्राङ्मुखः—

यमद्वारे महाघोरा या सा वैतरणी नदी ।
तर्तुकामो ददाम्येनां तुभ्यं वैतरणीं च गाम् ॥

इतिमन्त्रेण गामधिवासयेत् । ततः तिथ्यादि संकीर्त्य 'वैतरणीं तर्तुं गां दास्ये' इतिसंकल्प्य प्रतिमायामक्षतपुञ्जे वा विष्णुं गां विप्रं च संपूज्य, अद्येत्यादिअमुकगोत्रायामुकशर्मणे ब्राह्मणायाहं यमद्वारे स्थिताया नद्याः सुखेनोत्तरणार्थमिमां वैतरणीं गां सवत्सां सोपस्करां हैमयममूर्तिसहितां विष्णुदैवतां संप्रददे ।

दानमन्त्रः—

विष्णुरूप द्विजश्रेष्ठ भूदेव पङ्क्तिपावन ।
सदक्षिणा मया तुभ्यं दत्ता वैतरणी च गौः । इति ॥

ततः सुवर्णं दक्षिणां दत्त्वा तद्धेनोः पुच्छं प्रगृह्यानुव्रजेत् । तत्र मन्त्रः—

धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ।
उत्तितीर्षुरहं देवि वैतरण्यै नमो नमः ॥

इति वैतरणीदानम् ।

अथ महिषीदानम् ।

भविष्योत्तरे—

महिषीदानमाहात्म्यं कथयामि युधिष्ठिर ।
पुण्यं पवित्रमायुष्यं सर्वकामप्रदं सुखम् ॥
चन्द्रसूर्यग्रहे पुण्ये कार्तिक्यामयने तथा ।
शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रान्तिवासरे ॥
यदा वा जायते वित्तं चित्तं च कुरुनन्दन ।
तदैव देया महिषी संसारभयभीरुणा ॥
प्रथमप्रसूता तरुणी सुशीला दोषवर्जिता ।
सुवर्णशृङ्गतिलका घण्टाभरणभूषिता ॥
रक्तवस्त्रावृता रम्या ताम्रदोहनिकान्विता ।
पिण्याकपिटकोपेता सहिरण्या च शक्तितः ॥

पिण्याकपिटकं बलिपूर्णवंशादिपात्रम् ।

सप्तधान्ययुता देया ब्राह्मणे वेदपारगे ।
द्रव्यैरेभिः समायुक्ता पुण्येऽह्नि विधिपूर्वकम् ॥

दद्यान्मन्त्रेण राजेन्द्र पुराणपठनेन तु ।
दद्यात्प्रदक्षिणीकृत्य ब्राह्मणे तां पयस्विनीम् ॥
प्रतिग्रहः स्मृतस्तस्याः पृष्ठदेशे स्वयम्भुवा ।

दानवाक्यं तु, ॐ अद्येत्यादि ।

इन्द्रादिलोकपालानां या राज्यमहिषी शुभा ।
महिषीदानमाहात्म्यात्साऽस्तु मे कामदा सदा ॥
धर्मराजस्य माहात्म्ये यस्याः पुत्रः प्रतिष्ठितः ।
महिषासुरस्य जननी या साऽस्तु वरदा मम ॥

इतिमन्त्रमुक्त्वा 'अमुकगोत्रायामुकशर्मणे ब्राह्मणाय इमां महिषीं सुवर्णशृङ्गतिलकाभरणां घण्टाताम्रदोहनिकां पिण्याकपिटकसप्तधान्यपादुकोपेतां यमदैवतामायुष्यसुखमहाराज्यकामस्तुभ्यमहं संप्रददे' इति । स्त्री तु 'राजमहिषीत्वकामा' इति, 'जयकामः' इति क्षत्रियः, 'धनधान्यकामः' इति वैश्यः । एवं शूद्रेणापि स्वाभिलषितं फलमुल्लेख्यम् । 'ईश्वरप्रीतिकामः' इति वा सर्वैः । ततो दक्षिणां दद्यादिति ।

अनेन विधिना दत्त्वा महिषीं द्विजपुङ्गवे ।
सर्वान्कामानवाप्नोति इह लोके परत्र च ॥
या स्त्री ददाति महिषीं सा राजमहिषी भवेत् ।
महाराजः पुमान्राजन्व्यासस्य वचनं यथा ॥
यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत् ।
वैश्यस्तु धान्यधनवाञ्छूद्रः सर्वार्थसंयुतः ॥

इत्यादिफलश्रुतिरिति तत्रैवोक्ता ।

इति महिषीदानम् ।

अथ मेषीदानम् ।

भविष्योत्तरे—

शृणु पार्थ परं दानं सर्वकिल्बिषनाशनम् ।
यद्दत्तं विविधं पापं सद्यो विलयमृच्छति ॥
सुवर्णरोमां सौवर्णीं प्रत्यक्षां वा सुशोभनाम् ।
सुवर्णतिलकोपेतां सर्वालङ्कारभूषिताम् ॥
कौशेयपरिधानां च दिव्यचन्दनभूषिताम् ।

दिव्यपुष्पोपहारां च सर्वधातुरसैर्युताम् ॥
सप्तधातुसमायुक्तां फलपुष्पवतीं तथा ।
शतेन कारयेत्तां तु सुवर्णस्य प्रयत्नतः ॥
यथाशक्त्याऽथवा कुर्याद्वित्तशाठ्यं न कारयेत् ।
अयने विषुवे पुण्ये ग्रहणे शशिसूर्ययोः ॥
दुःस्वप्नदर्शने चैव जन्मर्क्षे तिथिसङ्क्षये ।
यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितम् ॥
तदैव दानकालः स्याद्यतोऽनित्यं हि जीवितम् ।
नद्यां तीर्थे गृहे वाऽपि यत्र वा रमते मनः ॥
तत्र संस्थाप्य देवेशमुमया सह शङ्करम् ।
ब्रह्माणं सह गायत्र्या सश्रीकं श्रीधरं तथा ॥
रत्या सह तथाऽनङ्गं लोकपालान्ग्रहानपि ।
तांस्तु पूज्य विधानेन गन्धपुष्पनिवेदनैः ॥

उमाशङ्कररूपम्—

चर्माम्बरश्चतुर्बाहुः शूलखट्वाङ्गपाशभृत् ।
वृषाङ्कः शङ्करो गौरी वामोत्सङ्गे स्थिता भवेत् । इति ॥

ब्रह्मगायत्र्यादिरूपाणि तु प्रागुक्तानि । तानि च यथाशक्ति सौवर्णानि कार्याणि ।

तदग्रे कारयेद्धोमं तिलाज्येन महीतले ।
अलङ्कृत्य द्विजं शान्तं वासोभिः परिपूज्य च ॥
तल्लिङ्गमन्त्रैर्होमश्च कर्तव्यो ज्वलितेऽनले ।
ततस्तां तिलकुम्भस्थां लवणाभिमुखां स्थिताम् ॥
पूजयित्वा विधानेन मन्त्रमेतमुदीरयेत् ।

मन्त्रः प्रयोगे ज्ञेयः ।

एवमुच्चार्य तां दद्याद्ब्राह्मणाय कुटुम्बिने ।
नाभिभाषेत्ततो दत्वा न मुखं वाऽवलोकयेत् ॥
दुष्टप्रतिग्रहणतो विप्रो भवति पातकी ।
अपुत्रो लभते पुत्रमधनो लभते धनम् ॥
दत्त्वा दानं शुभां कान्तिं कीर्तिं च विपुलां तथा । इति ॥

अथ प्रयोगः । उक्तायनादिकाले गृहे तीर्थे वा दाताऽद्येत्यादि 'सर्व-

पापक्षयपूर्वकपुत्रधनकान्तिकीर्तिप्राप्तिकामो मेषीदानं करिष्ये ' इति सङ्कल्पयेत् । दुःस्वप्ने तु ' तत्सूचितानिष्टनिवृत्तिकामः ' इतिविशेषः । प्रतिमासु तण्डुलपुञ्जेषु वा उमासहितं शङ्करं गायत्रीसहितं ब्रह्माणं श्रीसहितं श्रीधरं रतिसहितमनङ्गं लोकपालान्ग्रहांश्च संपूज्यैतत्प्रकाशकैर्मन्त्रैराज्याक्ततिलैरष्टाष्टाविंशत्यादिसंख्यया हुत्वा सुवर्णतिलकाद्यलङ्कारकौशेयचन्दनपुष्पसुवर्णरूप्यादिसप्तधातुसप्तरससकलपुष्पयुतां मध्यस्थापिततिलकुम्भां संमुखस्थापितलवणां मेषीं च संपूज्य—

रोमत्वङ्मांसमज्जाद्यैः सर्वोपकरणैः सदा ।
जगतः संप्रवृत्ताऽसि त्वामतः प्रार्थयेप्सितम् ॥
वाङ्मनःकायजनितं यत्किञ्चिन्मम दुष्कृतम् ।
तत्सर्वं विलयं यातु त्वद्दानानुपसेवितम् ॥

इतिमन्त्रमुक्त्वा तिथ्यादि सङ्कीर्त्य ' सर्वपापक्षयपूर्वकपुत्रधनकान्तिकीर्तिप्राप्तिकामो दुःस्वप्नसूचितानिष्टनिवृत्तिकामो वेमां मेषीं सर्वोपस्करयुतामगुकगोत्रायामुकशर्मणे विप्रायाहं संप्रददे न मम ' इति दत्त्वा विप्रेण यथाविधि प्रतिग्रहे कृते दक्षिणां दद्यात् । एवमेव सुवर्णमेषी देया । प्रतिग्रहीतृविप्रसंभाषणमुखावलोकने वर्जयेत् ।

इति मेषीदानम् ।

अथाजादानम् ।

सुमन्तुः—

अजापालो महीपालो ह्यजादानैर्दिवं गतः ।
अयने विषुवे चैव युगादौ ग्रहणेषु च ॥
अमावास्यामजादानं पौर्णमास्यां च शस्यते ।
विधिं तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितम् ॥
सर्वरत्नोपसंपन्नां सप्तधान्योपरिस्थिताम् ।
वस्त्रमाल्योपमालां तु भूषितां पशुजानकीम् ॥
वज्रनेत्रां हेमशृङ्गां ताम्रपृष्ठां सदोहनाम् ।
ससुतां रौप्यपादां च कुक्षौ दद्यात्तिलोदकम् ॥
गोदानवत्प्रयुञ्जीत मन्त्रेणानेन संयुतः ।
मन्त्रवासो अजे श्लक्ष्णे यज्ञसंपत्करे शुभे ॥
सृष्टा त्वं दह मे पापं जन्मान्तरशतैः कृतम् । इति ॥

एवं समुच्चरेद्भक्त्या विप्रहस्ते जलं क्षिपेत् ।
प्रीयतां यज्ञनाथाय वासुदेवाय वै नमः ॥
एवंप्रदक्षिणीकृत्य सूर्यं समवलोकयेत् ।
ततश्च गच्छेत्स्वगृहं हरिं संस्मृत्य मानवः ॥
ये बालत्वे कृताः पापाः कामतो वाऽप्यकामतः ।
यौवने वार्द्धकोन्मादे प्रसङ्गेनापि पातकम् ॥
अजादानस्य माहात्म्यान्निष्पापो जायते नरः ।
पुत्रपौत्रसमायुक्तः सदाचारमतिश्चिरम् ॥

विष्णुधर्मोत्तरे—

उष्ट्रं वा गर्दभं वाऽपि यः प्रयच्छति सुद्विजे ।
अजामुरभ्रं तुरगं यथाशक्त्या सदक्षिणम् ॥
अलकां स समासाद्य यक्षेन्द्रैः सह मोदते ।
सर्वकामसमृद्धात्मा सर्वयज्ञफलं लभेत् ॥
तस्मादजां प्रयच्छस्व ततः सर्वमवाप्स्यसि ।
मन्त्रेणानेन विधिवदलङ्कृत्य स्वशक्तितः ॥
त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रं भवती परम् ।
त्वत्प्रसूतौ स्थिता यज्ञास्तस्माच्छान्तिकरी भव ॥
प्रतिगृह्णीत तां चैव पृष्ठदेशे द्विजोत्तमः ।

दानवाक्यं तु महिषीदानवज्ज्ञेयम् ।

अजाविकं च महिषं दत्त्वा विप्राय शक्तितः ।
घृतक्षीरवहा नद्यो यत्र तत्र समेधते ॥

इत्यजादानम् ।

अथ मेषदानम् ।

बौधायनः—

अग्नेर्मान्द्यं भवेत्तस्य यस्तेताग्निविनाशनः ।
वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा पुरा ॥
पलार्द्धेन तदर्द्धेन तदर्द्धेनाथवा पुनः ।
राजतं कारयेत्सौम्यमग्नेर्वाहनमुत्तमम् ॥
सौवर्णाश्च खुराः कार्याः श्वेतवस्त्रेण वेष्टयेत् ।

श्वेतमाल्यैः श्वेतगन्धैर्धूपं दद्यान्मधूकटे ॥
तण्डुलोपरि संस्थाप्य पुनस्तं पूजयेत्सुधीः ।
तन्दुलानां परीमाणं द्रोणद्वयमुदाहृतम् ॥
आग्नेय्यां दिशि होमश्च समिदाज्यतिलैरपि ।
आचार्येण विनीतेन सर्वशास्त्रार्थवेदिना ॥
बह्वृचेन च कर्तव्यस्तत्र मन्त्रानिमाञ्छृणु ।
अग्निर्मूर्द्धेतिमन्त्रेण समिद्धोमः प्रशस्यते ॥
अग्ने नयेत्याज्यहोमोऽप्यग्निनाग्निस्तिलाक्षतैः ।
मन्त्राध्यायोक्तमार्गेण चाग्निसंस्थापनं भवेत् ॥
अग्नेः प्रागुत्तरे देशे शुभं कुम्भं च विन्यसेत् ।
प्रणीतामोक्षपर्यन्ते कृते स्नानं विधीयते ॥
आपोहिष्ठेत्यपि तृचं हिरण्येति चतुरृचम् ।
पवमानानुवाकेन मार्जयेद्रोगिणं ततः ॥
शन्नोवातानुवाकेन शान्तिं चापि प्रकल्पयेत् ।
तस्मै हुतवते रोगी प्राङ्मुखाय ह्युदङ्मुखः ॥
पूजिताय यथाशक्त्या दद्यात्तं तु सदक्षिणम् ।
देवानां यो मुखं हव्यवाहनः सर्वपूजितः ॥
तस्य त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः ।
अग्निमान्द्यं पूर्वकर्मविपाकोत्थं तु यन्मम ॥
तत्सर्वं नाशय क्षिप्रं जाठराग्निं प्रवर्द्धय ।

इति दानमन्त्रः ।

एवं विप्राय यो दद्यादग्नेर्वाहनमुत्तमम् ।
बलवानग्निमान्मर्त्यो जीवेद्वर्षशतं पुनः ॥
ततः स्वबन्धुभिर्विप्रैः स्नात्वा भुञ्जीत मानवः ।

इति मेषदानम् ।

अथ पर्वतदानानि ।

मात्स्ये—

प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ।
गुडाचलस्तृतीयः स्याच्चतुर्थो हेमपर्वतः ॥

पञ्चमस्तिलशैलः स्यात्षष्ठः कार्पासपर्वतः।
सप्तमो घृतशैलः स्याद्रत्नशैलस्तथाऽष्टमः॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः॥
अयने विषुवे चैव व्यतीपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः॥
धान्यशैलादयो देया यथाश्रद्धं विधानतः।
तीर्थे वायतने वापि गोष्ठे वाऽथ नवाङ्गणे॥
मण्डपं कारयेद्भक्तया चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधानतः॥

प्राच्यामुदीच्यां चैकमेव द्वारम्, न चत्वारि द्वाराणीत्यर्थः। द्वारैक्याच्च तोरणमप्येकमेव द्वारपरिष्कारणत्वात्तस्य। मण्डपोऽष्टादशहस्तोऽन्यथा द्रोणसहस्रादिमितपर्वतनिवेशायोगात्।

गोमयेनोपलिप्तायां भूमावास्तीर्य वै कुशान्।
तन्मध्ये पर्वतं कुर्याद्विष्कम्भैः पर्वतैर्युतम्॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः॥
मेरुर्महान्व्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात्।

वृक्षत्रयं मन्दारपारिजातकल्पवृक्षरूपम्। मध्ये कल्पतरुर्दक्षिणोत्तरयोर्मन्दारपारिजातौ। शक्तौ हरिचन्दनसन्तानावपि पूर्वपश्चिमयोः स्थाप्यौ। निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराऽचले, इतिवक्ष्यमाणवाक्याच्छर्कराचलदानं त्वावश्यकम्।

पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः।
पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैडूर्यसरोजरागैः॥

सरोजरागः पद्मरागः। मुक्ताफलादीनि पूर्वादिदिगवस्थितराजतशृङ्गेषु निवेश्यानि।

मन्त्रः—

श्रीखण्डखण्डैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात्।

ब्रह्मा च विष्णुर्भगवान्पुरारिर्दिवाकरो यत्र हिरण्मयः स्यात् ॥
मूर्द्धव्यवस्थागतमत्सरेण कार्यास्त्वनेके च तथा द्विजौघाः ।

'ब्रह्मादिप्रतिमा ब्रह्माण्डदाने, द्विजाः पक्षिणो मुनयश्च हैमाः अनेकपदस्वरसात्' इति मदनः ।

चत्वारि शृङ्गाणि च राजतानि नितम्बभागेपि च राजतः स्यात् ।
आर्द्रेक्षुवंशावृतकन्दरस्तु घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्पूर्वेण पीतानि च दक्षिणे स्यात् ।
वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घनाली ॥

आर्द्रेक्षव एव वंशाः । घृतमेवोदकम् । शुक्लाण्यम्बराण्येव मेघावली ।

रौप्यान्महेन्द्रप्रमुखानथाष्टौ संस्थाप्य लोकाधिपतीन्क्रमेण ।

महेन्द्रादिलक्षणं तुलादाने—

नानाफलाली च समन्ततः स्यान्मनोरमं माल्यविलेपनं च ।
वितानकं चोपरि पञ्चवर्णमम्लानपुष्पाभरणं सितं च ॥
इत्थं निवेश्यामरशैलमग्र्यं मेरोस्तु विष्कम्भगिरीन्क्रमेण ।
तुरीयभागेन चतुर्दिशं तु संस्थापयेत्पुष्पविलेपनाढ्यान् ॥

'प्रतिविष्कम्भपर्वतं तुरीयांशेन चतुर्थांशेन विष्कम्भपर्वतान्कारयेत्पृथगिति लवणाचले वक्ष्यमाणत्वात्' इति मदनः । वास्तवं तु एकेनैव चतुर्थांशेन चत्वारोऽपि विष्कम्भपर्वताः कार्या इति तत्रैव वक्ष्यते ।

पूर्वेण मन्दरमनेकफलैश्च युक्तं
युक्तं गणैः कनकभद्रकदम्बचिह्नम् ।
कामेन काञ्चनमयेन विराजमान-
माकारयेत्कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसा च वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम् ।

कामरूपमाह विश्वकर्मा—

चापबाणधरः कामो रतिप्रेयान्सुमध्यमः ।
मालापी नन्दने रागी रूपवान्विश्वमोहकः । इति ॥

'हैमेरुसन्निधानाद्धान्यान्तरानुपदेशाच्च मन्दरोऽपि व्रीहिमय एव' इति मदनः । तन्न 'विष्कम्भपर्वतं चैव यवैः कुर्यात्तु पूर्वतः' इति ब्रह्माण्डोक्तेः । गणैरिति नराकृतिभिस्त्रिभिर्गणैर्युक्तम् । कपिञ्जलवत् ।

कनकेति कनकनिर्मितो भद्रकन्दरः। तद्रूपं प्रयोगे ज्ञेयम्। क्षीरेति। क्षीरपूर्णेन रौप्येणारुणोदाख्येन सरसा रौप्येण वनेन च विराजमानम्।

यामेन गन्धमदनश्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजम्ब्वा।
हैमेन यक्षपतिना घृतमानसेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात्॥

कलधौतजम्ब्वा हैमजम्बूवृक्षेण। यक्षपतिरूपं हेमाद्रौ श्रीप्रश्ने—

ह्रस्वमापिङ्गनेत्रं च गदिनं पीतविग्रहम्।
पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा। इति॥

सघृतेन राजतेन मानससरसा।

पश्चात्तिलाचलमनेकसुवर्णपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पमयेन तद्वद्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे॥

आकारयेत्कुर्यात्। दधीति सद्धिराजतं पात्रं सितोदाख्यं सरः।

संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सवस्त्रम्।
पुष्पैश्च हेमवरपादपशेखरं त-
माकारयेत्कनकधेनुविराजमानम्।
माक्षीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्करवता च युतं विधाय।

संस्थाप्येति शैलान्तं पूर्वोक्ततिलाचलानुवादकम्। अथेत्यादिः पुनः पार्श्वविधिः। माक्षीकेति समधुरूपभद्राख्यसरसेत्यर्थः।

होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरितैः कृतिभिर्द्विजेन्द्रैः।
पूर्वेण हस्तमितमत्र विधाय कुण्डं
कार्यं तिलैर्यवघृतेन समित्कुशैश्च॥

ब्रह्माण्डे—

इन्द्राद्या लोकपालाश्च तेषां होमो विधीयते।
तल्लिङ्गैश्चैव मन्त्रैश्च समिद्भिरथवा तिलैः॥
पौरुषेण तु सूक्तेन ब्रह्मादीनां विधीयते।
तथा व्याहृतिभिर्होमस्तिलैराज्येन चैव हि॥
अष्टशतं तु होतव्यं सर्वकामसमृद्धये। इति॥

वसुरुद्रादित्यसमुच्चायको लोकपालाश्चेति चकारः । ग्रहादिकामधेन्वन्तानामेकाशीतिदेवतानां तिलयवघृतौदुम्बरसमित्कुशैः पञ्चभिर्द्रव्यैः पृथक्त्रयोदशसंख्यया होम इति त्रिपञ्चाशदधिकं सहस्रं सर्वा आहुतयः इति दानविवेके । तन्न । तिलैर्यवघृतेन समित्कुशैरिति पृथक्समस्तया च तृतीयया साधनवैषम्यात् । समित्कुशैरिति द्वन्द्वापेक्षया कर्मधारयस्य लघुत्वात् । ब्रह्माण्डवचोविरोधात्त्रिपञ्चाशदधिकसहस्रसंख्यायाः प्रचयशिष्टायाः कथमप्यसङ्गतेश्च । समिधश्च कुशा इति कर्मधारयः । तेन तिलानां पृथक्साधनता यवघृतयोर्व्यासक्ता, समस्तयोस्तृतीयाश्रुतेः । कुशानां तु पृथगिति त्रीण्येव होमसाधनानि । तैः प्रत्येकमष्टसंख्यया ग्रहादिद्वात्रिंशद्देवता हुत्वेन्द्रादिदशलोकपालेभ्योऽष्टवसुभ्य एकादशरुद्रेभ्यो द्वादशादित्येभ्यश्च तिलैः समिद्भिर्वा प्रत्येकमष्टसंख्यया हुत्वा सूर्यकामदेवधनदहंसकामधेनुभ्यः समस्तव्याहृतिभिस्तिलैराज्येन च जुहुयात् । अष्टोत्तरशतं तत्र चतुःपञ्चाशत्तिलैश्चतुःपञ्चाशदाज्येन ।

रात्रौ च जागरमनुद्धतगीततूर्यैरावाहनं च कथयामि शिलोच्चयानाम् ।
मन्त्रा वक्ष्यन्ते ।

एवमभ्यर्च्य तं मेरुं मन्दरं चाभिपूजयेत् ।
एवमामन्त्र्य तान्सर्वान्प्रभाते विमले पुनः ॥
स्नात्वाऽथ गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ।
विष्कम्भपर्वतान्दद्यादृत्विग्भ्यः क्रमशो बुधः ॥
गाश्च दद्याच्चतुर्विंशदथवा दश पार्थिवः ।
शक्तितः सप्त वाऽष्टौ वा पञ्च दद्यादशक्तिमान् ॥
एकां वा गुरवे दद्यात्कपिलां च पयस्विनीम् ।
ऋत्विग्भ्यो दक्षिणा देया यथासंभवकाञ्चनम् ॥
पर्वतानामशेषाणामेष एव विधिः स्मृतः ।
त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः ॥
ग्रहाणां लोकपालानां ब्रह्मादीनां च सर्वशः ।
स्वमन्त्रेणैव सर्वेषु होमः शैलेषु पठ्यते ॥
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ।
विधानं सर्वशैलानां क्रमशः शृणु पार्थिव ॥
दानकालेषु ये मन्त्राः पर्वतेषु च यत्फलम् ।

मन्त्राः प्रयोगे ज्ञेयाः ।

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरशतं साग्रं ब्रह्मलोके महीयते ॥
अप्सरोगणगन्धर्वैराकीर्णेन विराजितः ।
विमानेन दिवः पृष्ठमायाति सुरसेवितः ॥
कर्मक्षयाद्राजराज्यं प्राप्नोतीह न संशयः ।

इति धान्यादिशैलदानम् ।

अथ साधारणः प्रयोगः । यजमानः पूर्वोक्तदेशेऽष्टादशहस्तं मण्डपं पूर्ववत्कुर्यात् । तस्य च प्राच्यामुदीच्यां वैकमेव द्वारं तोरणं च, न चत्वारि । कुण्डं चैकमेव प्राच्यामेकहस्तम् । प्राच्यां हस्तमात्रा ग्रहवेदी ॥

अथ शैलनिर्माणम् । मध्ये कुशानास्तीर्य सहस्रद्रोणमितराजशालिनामकमहाव्रीहिभिरुत्तमं तदर्द्धेन मध्यमं द्रोणशतत्रयेणाधममिति मेरुं शक्त्या कल्पयेत् । द्रोणं परिभाषायामुक्तम् । मेरोरुपरि मध्ये कल्पवृक्षम् । प्रागादिदिक्षु हरिचन्दनमन्दारसन्तानपारिजातान् । अशक्तौ मन्दारकल्पवृक्षपारिजाततरवः स्थाप्याः । शर्कराचले तु सन्तानहरिचन्दनावावश्यकौ । पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमाः पक्षिसंघान्मुनिसंघांश्च । तथा प्रागादिदिक्चतुष्टये क्रमेण मुक्ताफलहीरकैर्गोमेदपुष्परागैर्मारकतनीलरत्नैर्वैडूर्यपद्मरागैः समसंख्याकैर्भूषितं शृङ्गचतुष्कम् । तद्बहिर्दिगष्टके रौप्यमिन्द्रादिलोकपालप्रतिमाष्टकम् । समन्तात्श्रीखण्डैर्लतानां स्थाने प्रवालानि । शिलानां शुक्तीः प्रागादिषु मेघानां श्वेतपीतकर्बुररक्तवस्त्राणि, वंशानामिक्षून् । जलस्य घृतम् । गन्धपुष्पनानाफलानि च परितः संस्थाप्य पञ्चवर्णवितानकं तथैव याम्ये चोपरि बध्नीयात् । ततो यवैर्मेरोश्च षोडशांशेन प्राच्यां मन्दरम् । तदुपरि नररूपं गणत्रयं कदम्बं च सौवर्णं कदम्बमूले हैमः कामदेवः । अरुणोदसरःस्थाने दुग्धपूर्णरौप्यपात्रम् । रौप्यं चैत्ररथाख्यं वनं गन्धपुष्पफलवस्त्राणि च स्थापयेत् । याम्ये मेरुषोडशांशगोधूममयं गन्धमादनं तदुपरि सौवर्णजम्बूवृक्षं तन्मूले सौवर्णमुदङ्मुखं धनदं मानससरःस्थाने सघृतं रौप्यपात्रं रूप्यं गन्धर्वाख्यं वनं नानाफलवस्त्रमाल्यानि च स्थाप-

येत् । पश्चिमे मेरुं षोडशांशतिलमयं विपुलपर्वतं तदुपरि सौवर्णं पिप्पलं तन्मूले प्राङ्मुखसौवर्णहंसप्रतिमां सितोदसरःस्थाने पयोदधिपूर्णरौप्यपात्रं रौप्यं वैभ्राजवनं वस्त्रफलमाल्यानि च स्थापयेत् । उत्तरे मेरुं षोडशांश-मितमाषैः सुपार्श्वपर्वतं तदुपरि सौवर्णवटं तन्मूले दक्षिणाभिमुखीं सवत्सां सुवर्णधेनुं भद्रसरःस्थाने मधुपूर्णरौप्यपात्रं रूप्यं सावित्रवनं वस्त्रफलादि च स्थापयेत् । एवं वक्ष्यमाणपर्वतेष्वपि मेरुद्रव्यचतुर्थांशेन लवणादिद्रव्येण प्रागादिषु विष्कम्भादिपर्वता ज्ञेयाः ॥

अथ यजमानोऽद्येत्याद्युक्त्वा, अप्सरोगन्धर्वयुतविमानकरणकस्वर्लो-कगमनसाग्रमन्वन्तरशतावधिकालदेवलोकवासोत्तरभूलोकराजत्वकामः, ईश्वरप्रीतिकामो वा श्वो धान्यपर्वतदानमहं करिष्ये इतिसङ्कल्प्य गणे-शपूजास्वस्तिवाचनमातृपूजानान्दीश्राद्धाचार्यर्त्विग्वरणतन्मधुपर्कपूजनम-ण्डपपूजनाचार्यविनियोगान्तं सामान्यप्रयोगोक्तं कुर्यात् । आचार्योऽपि ग्रहादिस्थापनादिकुण्डसमीपस्थितकलशस्थापनान्तं कुर्यात् । अत्रर्त्विजः प्राक्कुण्डे ग्रहादिद्वात्रिंशद्देवताभ्यस्तन्मन्त्रैस्तिलैः पृथग्यवघृताभ्यां मिलि-ताभ्यां कुशैश्चेति त्रिभिः साधनैः प्रत्येकमष्टवारं हुत्वा दशलोकपाले-भ्योऽष्टवसुभ्य एकादशरुद्रेभ्यो द्वादशादित्येभ्यश्च प्रत्येकमष्टसंख्यया समिद्भिस्तिलैर्वा जुहुयुः । मन्त्रास्तु सामान्यप्रयोगे उक्ताः । ततः पुरुष-सूक्तेन ब्रह्मविष्णुशिवेभ्यः समिद्भिस्तिलैर्वा सूर्यकामदेवधनदहंसकामधेनु-भ्यस्तिलैर्घृतेन चाष्टोत्तरशतं जुहुयुः ' तत्र चतुःपञ्चाशत्तिलैश्चतुःपञ्चाश-द्घृतेनेति । ततो यजमानो मेरुमावाह्य पूजयेत् । तत्र मन्त्राः—

त्वं सर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेऽप्यमरपर्वत नाशयाशु ।
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः संपूजितः परमभक्तिमता मयाद्य ॥

त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्तामूर्तं परं बीजमतः पाहि सनातन ॥
यस्मात्त्वं लोकपालानां पाहि त्वं विश्वमन्दिरम् ।
रुद्रादित्यवसूनां च ततः शान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नारीभिश्च शिरस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥

अथ मन्दरस्य—

यस्माच्चैत्ररथेन त्वं भद्राश्वप्रमुखेन च ।
शोभसे मन्दर क्षिप्रमलं तुष्टिकरो भव ॥

अथ गन्धमादनस्य—

यस्माच्चूडामणिर्जम्बूद्वीपे त्वं गन्धमादन।
गन्धर्ववनशोभावाँस्ततः कीर्तिर्दृढाऽस्तु मे॥

अथ विपुलस्य—

यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च।
हिरण्मयाश्वत्थशिरास्तस्मात्पुष्टिर्दृढाऽस्तु मे॥

अथ सुपार्श्वस्य—

उत्तरैः कुरुभिर्यस्मात्सावित्रेण वनेन च।
सुपार्श्व शोभसे नित्यमतः श्रीरक्षयाऽस्तु मे॥

ततः सर्वजागरणे कृते स्नानादि कृत्वा कुण्डसमीपस्थकलशजलैर्यजमानमभिषिञ्चेयुः। ततः कर्ता गृहीतकुसुमो मेरुं प्रदक्षिणीकृत्य उपतिष्ठेत्। मन्त्रास्तु—

अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्तते॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः।
धान्यपर्वतरूपेण पाहि तस्मान्नमो नमः॥

इत्युपस्थाय पुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्य प्राङ्मुख उपविश्योदङ्मुखेभ्यो गुर्वादिभ्यः क्रमेण गिरीन्दद्यात्। प्रयोगस्तु, 'अद्येत्यादि देशकालकीर्तनान्तेऽमुगोत्रायामुकवेदायामुकशाखाध्यायिनेऽमुकशर्मणे गुरवेऽप्सरोगन्धर्वगणयुतविमानकरणकस्वर्लोकगमनानन्तरसाग्रमन्वन्तरशतावधिसमयदेवलोकनिवासोत्तरभूलोकराजत्वप्राप्तिकामः इमं धान्यमेरुं सौवर्णमन्दराद्रिं वृक्षपञ्चकसौवर्णब्रह्मविष्णुरुद्रार्कप्रतिमायुक्तमुक्ताहीरकादिभूषितरौप्यमयशृङ्गचतुष्कशोभितं रूप्यमयेन्द्रादिलोकपालप्रतिमं रौप्यमयनितम्बान्वितमिक्षुवंशावृतकन्दरं दिक्चतुष्टयस्थापितरौप्यपात्रस्थितघृतोदकप्रस्रवणं दिक्चतुष्टयस्थापितशुक्लपीतकर्बुररक्तवस्त्राम्बुदधरं नानाफलमाल्यवितानाद्युपकरणसहितं तुभ्यं संप्रददे न मम' इति तद्धस्ते दद्यात्। स च 'ॐ स्वस्ति' इति प्रतिगृह्य स्वशाखीयां कामस्तुतिं पठेत्। ततः 'कृतैतद्दानप्रतिष्ठार्थं इमा गास्तुभ्यं दक्षिणात्वेन संप्रददे न मम' इति दद्यात्। तत्र 'चतुर्विंशतिपक्षे अष्टौ गा गुरवे, चतस्रश्चतस्रश्च ऋत्विग्भ्यः' दशपक्षे षड् गुरवे, एकैका

ऋत्विग्भ्यः, अष्टसप्तपक्षयोश्चतस्रस्तिस्रो वा गुरवे, एकैकां ऋत्विग्भ्यः, पञ्चपक्षे सर्वेभ्य एकैकाम्, एकपक्षे गुरव एव तां कपिलाम्, ऋत्विग्भ्यः सुवर्णं, इति मदनादयः। एवं पूर्वस्थितं मन्दराख्यविष्कम्भगिरिं यवमयं सौवर्णनानाफलभद्रकदम्बतन्मूलस्थसौवर्णकामदेवप्रतिममरुणोदसरःस्थानीयक्षीरपूरितरौप्यपात्रं रौप्यघटितचैत्ररथवनवस्त्रनानाफलादियुतं तुभ्यमृत्विजे संप्रददे न मम इति दद्यात्। इमं दक्षिणस्थितगोधूममयं गन्धमादनं विष्कम्भपर्वतं सौवर्णजम्बूवृक्षमूलस्थितसौवर्णकुबेरप्रतिमान्वितं मानससरःस्थानीयघृतपूरितरौप्यपात्रं रूप्यघटितगन्धर्ववनवस्त्रनानाफलमाल्यवितानादियुतं तुभ्यम्, इति दद्यात्। इमं पश्चिमस्थितं तिलमयं विपुलाख्यं विष्कम्भपर्वतं सौवर्णपिप्पलतन्मूलस्थितसौवर्णहंसप्रतिमान्वितं सितोदसरःस्थानीयदधिपूरितरजतपात्रं रजतघटितवैभ्राजवनवस्त्रफलादियुतं तुभ्यम्, इति दद्यात्। इममुत्तरस्थितं माषमयं सुपार्श्वाख्यं विष्कम्भपर्वतं हैमवटतन्मूलस्थितहैमधेनुप्रतिमायुतं भद्रसरःस्थानीयमधुपूरितरौप्यपात्रं रौप्यघटितसावित्रवनवस्त्रफलादियुतं तुभ्यम्, इति दद्यात्। लवणादिदानपक्षे प्रयोगे धान्यपदस्थाने लवणादिपदं प्रक्षेप्यम्। तत्तत्फलानि तत्र तत्र वक्ष्यामः। आचार्याद्यनुज्ञयाऽन्येभ्योऽपि दानपक्षे युष्मभ्यमन्येभ्यश्च ब्राह्मणेभ्यः संप्रददे, इति दद्यात्। ततो ग्रहवेद्यां यजमानो देवताः संपूज्य नमस्कुर्यात्। गुरुस्तान्विसर्जयेत्। यजमानस्तु मण्डपादिग्रहप्रतिमादि गुरवे प्रतिपाद्य ब्राह्मणान्संभोज्य भूयसीं दक्षिणां दत्त्वा 'यस्य स्मृत्या इति प्रमादात्कुर्वताम्' इति चोक्त्वा विष्णुं स्मृत्वा कर्मेश्वरे समर्प्य विप्राशिषो गृहीत्वा सुहृन्मित्रादियुतो भुञ्जीत।

इति धान्यादिमेरुसाधारणप्रयोगः।

अथ लवणाचलः।

पाद्मे—

उत्तमः षोडशद्रोणः कर्तव्यो लवणाचलः।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः॥
वित्तहीनो यथाशक्त्या द्रोणादूर्ध्वं तु कारयेत्।
चतुर्थांशेन विष्कम्भपर्वतान्कारयेत्पृथक्॥

अत्र पृथगित्युक्ते प्रत्येकं मेरुद्रव्यचतुर्थांशपरिमितेन लवणेन विष्कम्भपर्वतचतुष्कम् । अयं च न्यायः सर्वविष्कम्भगिरिषु इति मदनः । युक्तं तु चतुर्थांशेनेति ; विधेयचतुर्थांशगतैकत्वविवक्षयैकस्यैव चतुर्थांशेन चत्वारोऽपि विष्कम्भाचलाः कार्याः । पृथक्ता तु गिरिगताऽनूद्यते न चतुर्थांशगता विधीयते इति ।

विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा ।
तद्वद्धेमतरून्सर्वाँल्लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चात्र निवेशयेत् ।

पूर्ववद्धान्याचलवत् ।

सौभाग्यरससंभूतो यतोऽयं लवणो रसः ।
तदात्मकत्वेन च मां पाहि पापान्नमो नमः ॥
यस्मादन्त्र रसाः सर्वे नोत्कटा लवणं विना ।
प्रियं च शिवयोर्नित्यं तस्माच्छान्तिं प्रयच्छ मे ॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ।
तस्मात्पर्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ।
उमालोके वसेत्कल्पं ततो याति परां गतिम् ॥

कल्पपर्यन्तमुमालोकप्राप्तिसमनन्तरपरमगतिप्राप्तिकामः ईश्वरप्रीतिकामो वा लवणाचलदानं करिष्ये इति संकल्पवाक्यम् । सकलपापक्षयसुरपूजितलोकप्राप्तिपूर्वककल्पावध्युमालोकनिवाससमनन्तरपरमगतिकामः इति मदनः । तन्मूलं तु चिन्त्यम् ।

अथ गुडपर्वतः ।

पाद्मे—

अथातः संप्रवक्ष्यामि गुडपर्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गं प्राप्नोति सुरपूजितम् ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान् ॥

भारः पलसहस्रद्वयम् । तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः इत्यमरः ।

तद्वदामन्त्रणं पूजां हेमवृक्षसुरार्चनम् ।
विष्कम्भपर्वतांस्तद्वत्सरांसि वनदेवताः ॥
होमं जागरणं तद्वल्लोकपालाधिवासनम् ।
धान्यपर्वतवत्कुर्यादिमं मन्त्रमुदीरयेत् ॥
यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात्परां लक्ष्मीं ददस्व गुडपर्वत ।
यस्मात्सौभाग्यदायिन्या भ्राता त्वं गुडपर्वत ॥
निवासश्चापि पार्वत्यास्तस्मान्मां पाहि सर्वदा ।
अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम् ॥
पूज्यमानः स गन्धर्वैर्गौरीलोके महीयते ।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसंपन्नः शत्रुभिश्चापराजितः ।

अत्र सकलपापक्षयोत्तरं गन्धर्वपूज्यमानत्वपूर्वककल्पशतावधिगौरीलोकप्राप्त्यनन्तरं संपन्नापराजितायुरारोग्यपूर्वकसप्तद्वीपाधिपतित्वकामः ईश्वरप्रीतिकामो वा इति सङ्कल्पे विशेषोऽन्यत्सर्वं पूर्ववत् ।

अथ सुवर्णाचलः ।

पाद्मे—

अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रसादाद्भवनं वैरिञ्चं याति मानवः ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः ॥
दद्यादेकपलादूर्ध्वं यथाशक्त्या विमत्सरः ।
धान्यपर्वतवत्सर्वं विदध्याद्राजसत्तम ॥
विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ।
नमस्ते ब्रह्मगर्भाय ब्रह्मबीजाय वै नमः ॥
यस्मादनन्तफलदस्तस्मात्पाहि शिलोच्चय ।
यस्मादग्नेरपत्यं त्वं यस्मात्तेजो जगत्पतेः ॥

हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ।
अनेन विधिना यस्तु दद्यात्कनकपर्वतम् ॥
स याति परमं ब्रह्मलोकमानन्दकारकम् ।
तत्र कल्पशतं तिष्ठेत्ततो याति परां गतिम् ॥

अत्र 'गुर्वादिभ्यो मेर्वादिदानमल्पद्रव्यविषयम्, बहुद्रव्ये तु तुलापुरुषवदर्द्धं चतुर्थं वांशं गुरवेऽन्यत्तु तदाज्ञयाऽन्येभ्योऽपि विशिष्टेभ्यो देयम्' इति हेमाद्रिः । अत्र 'सकलपापक्षयोत्तरशतकल्पावध्यानन्दकारकब्रह्मलोकभोगानन्तरपरमगतिकामः' इति दानवाक्यम् ।

अथ तिलाचलः ।

पाद्मे—

उत्तमो दशभिर्द्रोणैः पञ्चभिर्मध्यमो मतः ।
त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्तितः ॥
पूर्ववच्चापरं सर्वं वृक्षविष्कम्भकादिकम् ।
दानमन्त्रान्प्रवक्ष्यामि यथा च मुनिपुङ्गव ॥
यस्मान्मधुवने विष्णोर्देहस्वेदसमुद्भवाः ।
तिलाः कुशाश्च माषाश्च तस्माच्छं नो भवत्विह ॥
हव्यकव्येषु यस्माच्च तिलैरेवाभिरक्षणम् ।
भवादुद्धर शैलेन्द्र तिलाचल नमोऽस्तु ते ॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम् ।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् ॥
दीर्घायुष्यमवाप्नोति पुत्रं पौत्रं च मानवः ।
पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत् ॥

'सकलपापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वितानन्तरपितृदेवगन्धर्वपूर्वकपूज्यमानत्वपूर्वकद्युलोकगमनसमनन्तराक्षयवैष्णवपदप्राप्तिकामः' इति दानवाक्यम् ।

अथार्द्धोदयव्रतं तिलपर्वतदानम् ।

स्कान्दे—

पूर्वाह्णे सङ्गमे स्नात्वा शुचिर्भूत्वा समाहितः ।
सर्वपापविशुद्ध्यर्थं नियमस्थो भवेन्नरः ॥

नियममन्त्रस्तु—

त्रिदैवत्यव्रतं देवाः करिष्ये भुक्तिमुक्तिदाः ।
भवन्तु सन्निधौ मेऽद्य त्रयो देवास्त्रयोऽग्नयः । इति ॥
ब्रह्मविष्णुमहेशानां सौवर्णपलसंख्यया ।
प्रतिमास्तु प्रकर्तव्यास्तदर्द्धेन द्विजोत्तमाः ॥
सामं शतत्रयं शम्भोर्द्रोणानां तिलपर्वतः ।
ब्रह्मविष्णुशिवप्रीत्यै दातव्यं तु गवां त्रयम् ॥
हिरण्यभूमिधान्यादिदानं विभवसारतः ।
मध्याह्ने तु नरः स्नात्वा शुचिर्भूत्वा समाहितः ॥
तिलपर्वतमध्यस्थं पूजयेद्देवतात्रयम् ।

आदौ ब्रह्मपूजा ।

नमो विश्वसृजे तुभ्यं सत्याय परमात्मने ।
देवाय देवपतये यज्ञानां पतये नमः ॥ अनेन मन्त्रेण सर्वा पूजा ।

अथाङ्गपूजा—ॐ ब्रह्मणे नमः पादौ पूजयामि । हिरण्यगर्भाय० ऊरुभ्याम्० । परमात्मने० जङ्घाभ्याम् । वेधसे० गुह्ये । पद्मोद्भवाय० बस्तौ । हंसवाहनाय० कटिदेशे । शतानन्दाय० वक्षसि । सावित्रीपतये० बाहुषु । ऋग्वेदाय० पूर्वे वक्त्रे । यजुर्वेदाय० दक्षिणे । सामवेदाय० पश्चिमे । अथर्ववेदाय० उत्तरे । चतुर्वक्त्राय० शिरसि । हंसाय नमः । कपालाय नमः । ततो लोकपालादिपूजनं स्वमन्त्रैः ।

हिरण्यगर्भ पुरुष प्रधानव्यक्तरूप यः ।
प्रसादसुमुखो भूत्वा पूजां गृह्ण नमोऽस्तु ते ॥ इति प्रार्थना ।

अथ विष्णोः । अनन्ताय नमः पादौ । विश्वरूपाय० ऊरुभ्याम् । मुकुन्दाय० जानुभ्याम् । गोविन्दाय० जङ्घाभ्याम् । प्रद्युम्नदेवाय० गुह्ये । पद्मनाभाय० नाभौ । लम्बोदराय० उदरे । कौस्तुभवक्षसे० वक्षसि । चतुर्भुजाय० बाहुषु । विश्वतोमुखाय० वदने । शतसहस्रशिरसे० मौलौ ।

आदित्यचन्द्रनयन दिग्बाहो दैत्यसूदन ।
पूजां दत्तां मया भक्त्या गृहाण करुणापर ॥

इति विष्णुप्रार्थनम् ।

अथ शिवस्य ।

महेश्वर महेशान नमस्ते त्रिपुरान्तक ।

जीमूतकेशाय नमो नमस्ते वृषभध्वज ॥
ईशानाय नमः पादौ जङ्घाभ्यां चन्द्रशेखरम् ।
जानुभ्यां पशुपतिर्देवश्चोरुभ्यां शङ्करः स्मृतः ॥
उमाकान्ताय गुह्ये तु नाभौ वै नीललोहितः ।
उदरे कृत्तिवासाश्च वक्षे नागोपवीतिने ॥
अन्धकारे प्रसन्नात्मा नमो लोकान्तकाय च ।
पूजां दत्तां मया भक्त्या गृहाण वृषभध्वज ॥

इतिमहेशप्रार्थना ।

इति पूजाक्रमः प्रोक्तो मन्त्रैरेतैः प्रयत्नतः ।
आचार्य पूजयेद्भक्त्या पूजालङ्कारभूषणैः ॥
हस्तमात्रं कर्णमात्रं पीठं छत्रं कमण्डलुम् ।
श्वेतवस्त्रयुगं देयं ब्रह्मणे सर्वमूर्तये ॥
पीतवस्त्रयुगं विष्णोर्लोहितं शङ्करस्य तु ।
पञ्चामृतेन स्नपनं पूजनं कुसुमैः स्वकैः ॥
कमलैस्तुलसीपत्रैर्बिल्वपत्रैरखण्डितैः ।
तत्कालसंभवैर्दिव्यैः पूज्या देवा यथाक्रमम् ॥
यथाशक्त्या प्रकर्तव्यं व्रतमेतत्सुदुर्लभम् ।
जीवितं प्राणिनामेतदनित्यं निश्चितं यतः ॥
अथ व्रतस्य करणविधानं शृणु तत्त्वतः ।
देवतात्रयमुद्दिश्य शास्त्रदृष्टेन कर्मणा ॥
प्रजापतये विश्वकर्मणे रुद्राय नमो नमः ।
इत्यनेनैव मन्त्रेण वह्निं संस्थाप्य भक्तितः ॥

ततो ब्रह्मविष्णुशिवानां नाममन्त्रेणाष्टोत्तरसहस्रमष्टोत्तरशतं वा तिलहोमः ।

अथ होमावसाने तु गां च दद्यात्पयस्विनीम् ।
हेमशृङ्गीं रूप्यखुरां घण्टाभरणभूषिताम् ॥
ताम्रपृष्ठां कांस्यदोहां सर्वोपस्करसंयुताम् ।
सदक्षिणां शुभां पुण्यां ब्राह्मणाय निवेदयेत् ॥
तेन दत्तं हुतं जप्तमिष्टं यज्ञे सहस्रधा ।
कृतकृत्यो भवेद्विप्रो व्रतस्यास्य प्रभावतः ॥

इत्यर्द्धोदये तिलाचलदानम् ।

अथ कार्पासाचलः ।

पाद्मे—

कार्पासपर्वतस्तद्वद्विंशद्भारैरिहोदितः ।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिः स्मृतः ॥
भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः ।
धान्यपर्वतवत्सर्वमासाद्य मुनिसत्तम ॥
प्रभातायां तु शर्वर्यां दद्यादिदमुदीरयन् ।
त्वमेवावरणं यस्माल्लोकानामिह सर्वदा ॥
कार्पासाचल तस्मात्त्वमघौघध्वंसनो भव ।
एवंकार्पासशैलेन्द्रं यो दद्यात्पर्वसन्निधौ ॥
रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह ।

सकलपापक्षयपूर्वककल्पावधिरुद्रलोकनिवासानन्तरभूलोकराजत्वकामः । इति दानवाक्यम् ।

अथ घृताचलः ।

पाद्मे—

अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ।
तेजोमयमिदं दिव्यं महापातकनाशनम् ॥
विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः ।
मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः ॥
अल्पवित्तः प्रकुर्वीत द्वाभ्यामिह विधानतः ।

कुम्भः पलसहस्रात्मकः परिमाणविशेषः ।

विष्कम्भपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत् ।
शालितन्दुलपात्राणि कुम्भोपरि निवेशयेत् ॥

अत्र तु कुम्भः पात्ररूप एव, स च प्रायो घृतस्य द्रवत्वेन तद्धारणयोग्यपरिमाणः, तदुपरि च तन्दुलपात्रम् । एवं विष्कम्भाचलेष्वपि एतदभिप्रायेणैव पात्राणीति बहुवचनम् ।

कारयेत्संहतान्सर्वान्यथाशोभं विधानतः ।
वेष्टयेच्छुक्लवासोभिरिक्षुदण्डफलादिकैः ॥
धान्यपर्वतवच्छेषं विधानमिह पठ्यते ।

अधिवासं च कुर्वीत तद्वद्धोमं सुरार्चनम् ॥
प्रभातायां तु शर्वर्यां गुरवे विनिवेदयेत्।

घृताचलमिति शेषः।

विष्कम्भपर्वतांस्तद्वद्दत्विग्भ्यः शान्तमानसः।
प्रयोगाद्घृतमुत्पन्नं यस्मादमृततेजसः ॥
तस्माद्घृतार्चिर्विश्वात्मा प्रीयतामत्र शङ्करः।
यच्च तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम् ॥
घृतपर्वतरूपेण तस्मान्नः पाहि भूधर।
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम्।
हंससारसयुक्तेन किङ्किणीजालमालिना ॥
विमानेनार्कवर्णेन सिद्धविद्याधरार्चितः।
विचरेत्पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥

अत्र सकलपातकनाशनपूर्वकहंससारसयुक्तकिङ्किणीजालमाल्यर्कवर्ण-विमानकरणकशङ्करलोकागमनपूर्वकसिद्धविद्याधरार्चितत्वविशिष्टपितृस-हितभूतसंहाराऽवधिकविचरणकामः, इति दानवाक्यम्।

अथ रत्नाचलः।

पाद्मे—

अथातः संप्रवक्ष्यामि रत्नाचलमनुत्तमम्।
मुक्ताफलसहस्रेण पर्वतः स्याद्विहोत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशता चाधमः स्मृतः।
चतुर्थांशेन विष्कम्भपर्वताः स्युः समन्ततः ॥
पूर्वेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः।

वज्रगोमेदैरित्यनन्तरं मन्दर इति शेषः।

पद्मरागयुतैः कार्यो विद्वद्भिर्गन्धमादनः।
वैडूर्यविद्रुमैः पश्चात्संमिश्रो विपुलाचलः ॥
पद्मरागैः ससौपर्णैरुत्तरेण तु विन्यसेत्।

सुपार्श्वमिति शेषः। वज्रगोमेदैः समसंख्यः। समं स्यादश्रुतित्वात् इति न्यायात्, एवमुत्तरत्रापि ज्ञेयम्।

धान्यपर्वतवच्छेषमत्रापि परिकल्पते ।
तद्वदावाहनं कुर्याद्गुरुदेवांश्च काञ्चनान् ॥
पूजयेत्पुष्पपानीयैः प्रभाते च विसर्जनम् ।

दानानन्तरमिति शेषः ।

पूर्ववद्गुरुऋत्विग्भ्य इमान्मन्त्रानुदीरयेत् ।

गुरुऋत्विग्भ्यो दानायेति शेषः ।

यथा देवगणाः सर्वे रत्नेष्वेव व्यवस्थिताः ।
त्वं च रत्नमयो नित्यमतः पाहि महाचल ॥
यस्माद्रत्नप्रसादेन वृष्टिं प्रकुरुते हरिः ।
महारत्नप्रसादेन तस्मान्नः पाहि सर्वतः ॥

अत्राप्युपक्रमादारभ्य विसर्जनादीनां व्युत्क्रमोक्तावपि धान्यपर्वतवदातिदेशिकः क्रमो ज्ञेयः ।

अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत्कल्पशतं साग्रं वसेदिह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं यत्स्यादिह वाऽमुत्र वा कृतम् ।
तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा ॥

अत्रानेकजन्मकृतब्रह्महत्यादिपापक्षयोत्तरममरेश्वरपूजितत्वपूर्वकसाग्रकल्पशतावच्छिन्नविष्णुलोकनिवासानन्तररूपारोग्यगुणोपेतसप्तद्वीपाधिपत्यकामः, इति दानवाक्यम् ।

अथ रौप्याचलः ।

पाद्मे—

दशभिः पलसाहस्रैरुत्तमो राजताचलः ।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनाधमः स्मृतः ॥
अशक्तौ विंशतेरूर्ध्वं कारयेच्छक्तितः सदा ।
विष्कम्भपर्वतांस्तद्वत्तुरीयांशेन कल्पयेत् ॥
पूर्ववद्राजतान्कुर्यान्मन्दरादीन्विधानतः ।
कलधौतमयांस्तद्वल्लोकेशानर्चयेद्बुधः ॥

कलधौतं काञ्चनम् ।

ब्रह्मविष्णुशिवान्कुर्यान्नितम्बोऽत्र हिरण्मयः ।
राजतं स्यान्नितम्बोऽन्येषां काञ्चनं स्यात्तदत्र वै ॥
शेषं च पूर्ववत्कुर्याद्धोमजागरणादिकम् ।
दद्यात्तद्वत्प्रभाते तु गुरवे रौप्यपर्वतम् ॥
विष्कम्भशैलानृत्विग्भ्यः पूज्य वस्त्रविभूषणैः ।
इमं मन्त्रं पठन्दद्याद्दर्भपाणिर्विमत्सरः ॥
पितॄणां वल्लभं यस्माद्धर्मेन्द्वोः शङ्करस्य च ।
रजतं पाहि तस्मान्नः शोकसंसारसागरात् ॥
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम् ।
गवां दशसहस्रस्य फलं प्राप्नोति मानवः ॥
सोमलोके स गन्धर्वैः किन्नराप्सरसां गणैः ।
पूज्यमानो वसेद्धीमान्यावदाभूतसंप्लवम् ॥

अत्र सकलपापक्षयदशसहस्रगोदानफलावाप्तिपूर्वकगन्धर्वकिन्नराप्सरोगणपूज्यमानत्वविशिष्टयावदाभूतसंप्लवसोमलोकनिवासकामः, इति दानवाक्यम् ।

अथ शर्कराचलः ।

पाद्मे—

अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम् ।
यस्य प्रसादाद्विष्ण्वर्करुद्रास्तुष्यन्ति सर्वदा ॥
अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिर्मध्यमस्तद्वद्भाराभ्यामधमः स्मृतः ॥
भारेण वाऽर्द्धभारेण कुर्याद्यः स्वल्पवित्तवान् ।
विष्कम्भपर्वतान्कुर्यात्तुरीयांशेन मानव. ॥
धान्यपर्वतवत्सर्वमासाद्यामरसंयुतम् ।
मेरोरुपरि तद्वच्च स्थाप्यं हेमतरुत्रयम् ॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः ।
एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत् ॥
हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः ।
निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले ॥

मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गे च धनदः स्यादुदङ्मुखः ॥
प्राङ्मुखो वेदमूर्तिश्च हंसः स्याद्विपुलाचले ।
हैमी सुपार्श्वे सुरभिर्दक्षिणाभिमुखी भवेत् ॥
धान्यपर्वतवत्सर्वमावाहनमखादिकम् ।
कृत्वाऽथ गुरवे दद्यान्मध्यस्थं पर्वतोत्तमम् ॥
ऋत्विग्भ्यश्चतुरः शैलानिमान्मन्त्रानुदीरयेत् ।
सौभाग्यामृतसारोऽयं परमः शर्कराचलः ॥
तन्ममानन्दकारी त्वं भव शैलेन्द्र सर्वदा ।
अमृतं पिबतां ये तु निपेतुर्भुवि शीकराः ॥
देवानां तत्समुदयं पाहि नः शर्कराचल ।
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ॥
तन्मयोऽसि महाशैल पाहि संसारसागरात् ।
यो दद्याच्छर्कराशैलमनेन विधिना नरः ॥
सर्वपापविनिर्मुक्तः प्रयाति शिवमन्दिरम् ।
चन्द्रादित्यप्रतीकाशमधिरुह्याऽनुजीविभिः ॥
स हेमयानमातिष्ठेत्ततो विष्णुपुरं व्रजेत् ।
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसंपन्नो यावज्जन्मायुतत्रयम् ।
भोजनं शक्तितः कुर्यात्सर्वशैलेष्वमत्सरः ॥
सर्वत्राक्षीरलवणमश्नीयात्तदनुज्ञया ।

भोजनं ब्राह्मणानाम् । सर्वत्र सर्वशैलेषु । दानात्पूर्वेद्युः कृतोपवासो दानानन्तरं गुर्वाद्यनुज्ञयाऽक्षीरलवणमश्नीयादित्यर्थः ।

सर्वत्रोपस्करान्सर्वान्प्रापयेद्ब्राह्मणालयम् ।
पश्येदिमानल्पधनोऽपि भक्त्या
स्मरेन्मनुष्यैरपि दीयमानम् ।
शृणोति भक्त्याऽथ मतिं करोति
निष्कल्मषः सोऽपि दिवं प्रयाति ॥
दुःस्वप्नं शमनमुपैति पठ्यमाने
शैलेन्द्रे भवभयभेदने मनुष्यः ।

य: कुर्यात्किमु मुनिपुङ्गवेह सम्यक्-
सन्नात्मा सकलगिरीन्द्रसंप्रदानम् ॥

सन्नात्मा प्रसन्नचित्तः। अत्र सकलदुरितक्षयानन्तरं कल्पशतावधिकविष्णुलोकनिवासानन्तरसप्तद्वीपाधिपत्योत्तरजन्मायुतत्रयावच्छिन्नायुरारोग्यकामः, इति दानवाक्यम्।

अथ शिखरदानम्।

विष्णुधर्मोत्तरे—

शृणु राजन्प्रवक्ष्यामि शिखराणां यथाक्रमम्।
दानं देयं यथा येन तच्छृणुष्व सनातनम् ॥
माघशुक्लतृतीयायां मार्गशीर्षस्य वा पुनः।
तृतीया वाऽथ वैशाखे शुक्ला या रोहिणीयुता ॥
प्रौष्ठपद्यां तृतीयायां विशेषेण तु भार्गव।
गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्कराः ॥
खर्जूरतन्दुलद्राक्षाक्षौद्रैर्मलयजेन च।
फलैर्मनोहरै रम्यैः शिखराणि प्रदापयेत् ॥
तेषामन्यतमं दद्याद्यथाश्रद्धं विधानतः।
आत्मप्रमाणं कुर्वीत प्रादेशाभ्यधिकं शुभम् ॥
भुवि गोमयलिप्तायामिक्षुपत्राणि संस्तरेत्।
ततः कुर्वीत शिखरे गौरीस्थानमनुत्तमम् ॥
द्विहस्तमूलं कर्तव्यं हस्तमात्रं शिरस्तथा।
भित्तिरिक्षुदलैः कार्या वेष्टयेद्रक्तवाससा ॥
दानद्रव्येण तन्मध्यं पूरयेद्भृगुनन्दन।
इक्षुयन्त्रकटे गौरीं तस्योपरि निवेशयेत् ॥
चतुर्भुजां हेममयीं पूजयेत्कुङ्कुमेन तु।

गौरीलक्षणमुक्तं देवीपुराणे—

गौरीं शङ्खेन्दुवर्णाभां शर्वरीशनिषेविताम्।
वृत्तपद्मासनां रम्यां साक्षसूत्रकमण्डलुम् ॥
वरदोद्यतरूपाढ्यां सर्वमाल्यफलप्रियाम्।

वरदोद्यतेति वरदाभयकरामित्यर्थः।

वेष्टयेत्सूक्ष्मवस्त्रेण देवीं शिखरमेव च ।
अष्टाङ्गं पूजयेद्गौरीं मन्त्रैरेतैस्तु भक्तितः ॥
नमो भवान्यै पादौ तु कामिन्यै जानुनी नमः ।
वामदेव्यै तथा चोरू नाभिं चैव जगत्प्रिये ॥
आनन्दायै तु हृदयं नन्दायै पूजयेत्स्तनौ ।
सुभद्रायै मुखं पूज्यं ललितायै नमः शिरः ॥
एवंपूज्य महादेवीं शिखरानभिमन्त्रयेत् ।
यस्मान्निवासः पार्वत्याः शिखर त्वं सुरैर्वृतः ॥
तथा निवासः सर्वेषां तस्मान्मां त्राहि भक्तितः ।
तस्मान्मां पाहि भगवँस्त्वं गौरीशिखरः सदा ॥
एवमामन्त्र्य शिखरं तृतीयायां तदग्रतः ।
ततः स्नात्वा प्रभाते तु दद्यान्मन्त्रेण भक्तितः ॥
यस्मात्त्वं सर्वभूतानामुपरिष्टादवस्थितः ।
तस्मान्मां पाहि भगवँस्त्वं गौरीशिखरः सदा ॥
एवमामन्त्र्य शिखरं तृतीयायां तदग्रतः ।
यस्मात्त्वं सर्वभूतानामुपरिष्टादवस्थितः ॥
तस्माच्छिवः प्रीयतां मे तव दानेन सर्वदा ।
अर्द्धभागं चतुर्थं वा पञ्चमं चापि वै गुरोः ॥
दद्याच्छेषं तु बन्धूनां शिष्टानां स्वजनस्य च ।
अनुजीविनां च भूतानां दुर्गतानां च धर्मतः ॥
एवं दत्त्वा तु शिखरं गौर्या भुञ्जीत वाग्यतः ।
संमुक्तकेशः संप्राश्य क्षीरं घृतमथापि वा ॥
विधिनाऽनेन यो दद्याद्गौर्याः शिखरमुत्तमम् ।
स वसेद्भवने देव्याः कल्पकोटिशतत्रयम् ॥
पुण्यक्षयादिहायातो जायते पृथिवीपतिः ।
अनेन विधिना देयं विधिहीनं न कारयेत् ॥
विधिहीनं कृतं सर्वं तन्न दातुः फलं भवेत् ।

इति शिखरदानविधिः ।

अथ प्रयोगः । यजमानो माघशुक्लतृतीयाशुक्लकाले पूर्वाह्णे गणेशपूजा-स्वस्तिवाचनमातृकावसोर्द्धारापूजानान्दीश्राद्धानि करिष्यमाणशिखर-

दानाङ्गतया करिष्ये, इतिसङ्कल्प्य तानि कृत्वा मासपक्षाद्युक्त्वा दौर्भाग्यदौर्गत्याभावपूर्वककल्पकोटिशतत्रयाविच्छिन्नगौरीभवननिवासानन्तर-पृथिवीपतित्वकामः श्वो गुडशिखरदानमहं करिष्ये, इतिसङ्कल्प्य तत्र पूर्वोक्तप्रकारेण सऋत्विजमाचार्यं वृत्वा संपूज्य लिप्तायां भूमाविक्षुपत्राणि संस्तीर्य मूले द्विहस्तविस्तारमुपरिहस्तमात्रविस्तारं चतुरस्रं स्वशरीरार्द्धप्रमाणतः प्रादेशाधिकमुच्चमिक्षुदलमयं कुसूलं कृत्वा तदभ्यन्तरे रक्तवस्त्रेण संवेष्ट्य गुडादिदेयद्रव्येणापूर्योपरीक्षुपत्रकटमास्तीर्य तत्र क्षौमादिवस्त्रोपरि खण्डेन्दुवर्णाभां चन्द्रमौलिं पद्मासनामक्षसूत्रकमण्डलुधरवराभयकरां गौरीं हैमीं सशिखरां सूक्ष्मवस्त्रेणावेष्ट्य कुङ्कुमादिना संपूज्य, भवान्यै नमः पादौ पूजयामि । कामिन्यै० जानुनी । कामदेव्यै० ऊरू । जगच्छ्रियै० नाभिम् । आनन्दायै० हृदयम् । नन्दायै० स्तनौ । सुभद्रायै० मुखम् । ललितायै० शिरः संपूज्य पुष्पाञ्जलिमादाय शिखरं त्रिःप्रदक्षिणं कृत्वा—

यस्मान्निवासः पार्वत्याः शिखर त्वं सुरैर्वृतः ।
तस्मान्मां पाहि भगवंस्त्वं गौरीशिखरः सदा ॥

इत्यनुमन्त्र्य पुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्य जागरणं कुर्यात् । ततः प्रभाते कृतनित्यक्रियः शिखरपश्चिमभागमुपविश्य मासपक्षाद्युक्त्वामुकगोत्रायामुकवेदायामुकशाखाध्यायिनेऽमुकशर्मणे ब्राह्मणाय दौर्भाग्यदौर्गत्याभावपूर्वककल्पकोटिशतत्रयाविच्छिन्नगौरीभवननिवासानन्तर-पृथिवीपतित्वकामोऽहं तुभ्यमन्येभ्यश्च विप्रेभ्य इदं शिखरं गौरीप्रतिमायुतं संप्रददे न ममेति दत्त्वा सुवर्णं च दत्त्वा विप्रान्संभोज्य तद्दिने स्वयं क्षीरं घृतं वा वाग्यतः संमुक्तकेशः प्राश्नीयात् । इक्षुवस्त्रादिशिखरदाने तु तत्तद्द्रव्येण कुसूलपूरणसङ्कल्पवाक्यादौ च तत्तत्प्रयोग इति विशेषः, अन्यत्तुल्यम् । इति गुडादिशिखरदानप्रयोगः ।

अथ भद्रनिधिदानम् ।

वह्निपुराणे—

पुण्यां तिथिं प्राप्य तु पौर्णमासीं तथोपरागे शशिसूर्ययोर्वा ।
चतुर्युगादिष्वयनद्वये वा प्रबोधने प्रस्वपनेऽथ विष्णोः ॥
कुर्यादथौदुम्बरमेककुम्भं हिरण्यमानेन यथास्वशक्त्या ।

औदुम्बरं ताम्रमयम् । हिरण्यमानेनान्तःप्रक्षेप्तव्यभारादिमितसुवर्ण-रत्नादिना यथा कुम्भः पूर्णः स्यादित्यर्थः ।

तथाऽपिधानं च सुराजतं स्याद्धिरण्यभारेण तु पूरयेत्तत् ।
तदर्द्धतोऽर्द्धेन तदर्धतो वा स्वशक्तितः स्वर्णपलैः शतेन ॥
तदर्द्धमर्द्धेन तु वित्तशक्त्या पलत्रयादूर्ध्वमपि प्रकुर्यात् ।
तत्ताम्रभाण्डे कनकं निधाय सवज्रनीलोत्पलपद्मरागम् ॥
समुक्तवैडूर्यसविद्रुमं च तद्राजतं पात्रमधोमुखं स्यात् ।

तद्राजतं पूर्वोक्तं पिधानपात्रम् । एवं तु तं भद्रनिधिं स विद्वान्कृत्वा-सने प्रावरणोपयुक्ते । प्रावरणमुत्तरच्छदस्तेनोपयुक्ते सहिते ।

कुशोत्तरे दर्पणचामराढ्यं सपादुकोपानहच्छत्रयुक्तम् ।
तत्क्षौमवस्त्रोत्तमयुग्मयुक्तं संपूजयेन्मन्त्रवरैरथैतैः ॥
आदौ तु पञ्चामृतमाप्य विष्णुं संस्नाप्य संसारहरं समर्च्य ।
तथेश्वरं पावकमेव हुत्वा आमन्त्रयेद्भद्रनिधिं ततस्तम् ॥
श्रीखण्डकर्पूरसकुङ्कुमेन पञ्चाक्षरं नाम श्रियः प्रलिख्य ।
नमस्तथोङ्कारयुतं च पात्रे तद्राजतेऽप्येवमथार्चयेत्तम् ॥

मन्त्रः प्रयोगे वक्ष्यते ।

एवंपूज्य विधानेन ततो विप्रमथाऽर्चयेत् ।
किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः ॥
अलङ्कृत्य हरिं यद्वा पीताम्बरधरं ततः ।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान् ॥

मन्त्रः प्रयोगे वक्ष्यते ।

एवंपूज्य हरिं ध्यात्वा तं द्विजं विष्णुरूपिणम् ।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन मानवः ॥
स्वगोत्रोच्चारणेनादौ विष्णोर्नाम महात्मनः ।
यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत् ॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये ।
सर्वाघौघविनाशाय विष्णोर्दानं मया कृतम् ॥
तदनेन सरत्नेन धातुत्रययुतेन च ।
सक्षौमाम्बरयुक्तेन सादर्शपादुकेन च ॥
सासनेन सच्छत्रेण चामरोपानहेन च ।

सदानन्दविधानेन प्रीयतां विष्णुरीश्वरः ॥
एवमुच्चार्य तं दद्याद्द्विजाय हरिरूपिणे।
गोदानविधिना दद्याद्धेमसंख्यां न कीर्तयेत् ॥
प्रकीर्तितं कोटियुगायुतं फलं प्रगोपितं कल्पगणैर्न संशयः।
इतीदमाख्याय न कीर्तयेत्सुधीर्निधानमध्ये निहितं च यद्भवेत् ॥
एवंकृते स्यान्मनुजः कृतात्मा भवेन्न च स्यान्मरणं कदाचित्।
प्रयाति विष्णोः पदमव्ययं तच्छिवात्मकानन्दमयं स साक्षात् ॥

इति भद्रनिधिदानम्।

अथ प्रयोगः। पूर्वोक्ते काले यजमानस्तिथ्याद्युल्लिख्य सकलपापक्षयसर्वपितृतारणानन्दविवृद्धिशिवात्मकानन्दमयाव्ययविष्णुपदप्राप्तिकामो भद्रनिधिदानमहं करिष्ये, इतिसङ्कल्प्य भद्रनिधिं क्षौमवस्त्रद्वयान्वितं स्थापयित्वा परितो दर्पणचामरपादुकोपानच्छत्राणि चासाद्य पुरतो हरिहरौ स्थापयित्वा संपूज्य प्रागुत्तरे देशे स्वगृह्यानुसारेणाग्निस्थापनादि कर्म कृत्वा घृताक्ततिलैरष्टोत्तरशतादिसंख्यया हुत्वा श्रीखण्डकुङ्कुमकर्पूरैः प्रणवादि 'ॐ श्रियै नमः' इति पञ्चाक्षरमन्त्रं निधिकुम्भे पिधाने च लिखित्वा तेनैव भद्रनिधिमुपचारैः संपूज्य गृहीतकुसुमाञ्जलिर्भद्रनिधिं प्रदक्षिणीकृत्य—

त्वया समस्तामरसिद्धयक्षविद्याधरेन्द्रोरगकिन्नरैश्च।
गन्धर्वविद्याधरदानवेन्द्रैर्युतं वृतं विश्वमिदं नमस्ते ॥
समग्रसंसारकरी त्वमेव विभोः सदानन्दमयी च माया।
समस्तकल्याणवयःसमाधिहरिप्रिये भद्रनिधे नमस्ते ॥

इत्युपस्थाय पुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्वोदङ्मुखमाचार्यं किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणपीतवासश्चन्दनादिभिः संपूज्य तं विष्णुरूपिणं ध्यात्वा कुसुमपाणिः—

भूदेवोऽसि विभो नित्यं नित्यानन्दमयो हरे।
हर मे दुष्कृतं कर्म कृपाकर नमोऽस्तु ते ॥
भूदेव भगवद्रम्य भवभङ्गकरेश्वर।
भवभूतिकरो जिष्णोः प्रभविष्णो नमोऽस्तु ते ॥

इति पुष्पाञ्जलिनाऽभ्यर्च्य कुशयवतिलजलान्यादाय अमुकशर्माहं सकलपापक्षयसकलपितृसन्तारणनित्यानन्दविवृद्धिशिवात्मकान-

न्दमयाव्ययविष्णुपदप्राप्तिकामोऽमुकगोत्रायामुकशर्मणेऽमुकशाखाध्यायिने इमं भद्रनिधिं सरत्नपात्रत्रयात्मकं सक्षौमाम्बरयुग्ममादर्शपादुकोपानच्छत्रासनोपकरणसहितं विष्णुरूपिणे तुभ्यमहं संप्रददे न मम, इति दद्यात्। ततः सुवर्णं दक्षिणां दत्त्वा विप्रान्संभोज्य भूयसीं दक्षिणां दत्त्वा यस्य स्मृत्या, प्रमादात्कुर्वतां कर्म इत्युक्त्वा कर्मेश्वरार्पणं कुर्यात्, इति भद्रनिधिदानप्रयोगः।

अथानन्दनिधिदानम्।

वह्निपुराणे भगवद्वचो गरुडं प्रति—

> तस्मान्निधानं शृणु सर्वदानतः प्रभावदं नित्यफलप्रदं च।
> ऐश्वर्यदं मोक्षदमक्षयं यद्धातुत्रयोद्भूतमनेकरत्नम्॥
> कारयेत्कार्तिकान्ते वा माघ्यां वा माधवेऽपि वा।
> अयने विषुवे वाऽपि मन्वादिषु युगादिषु॥
> चन्द्रसूर्योपरागे च स्वशक्त्यौदुम्बरं घटम्।

औदुम्बरं ताम्रमयम्।

> पिधानं राजतं तद्वन्मध्ये सौवर्णमुत्सृजेत्।

सुवर्णमेव सौवर्णम्।

> नानारत्नवरैः पूर्णं नानावस्त्रैर्निरावृतम्।
> हैमराजतताम्रोत्थैः सरिक्तैरपि पूरितम्॥

रिक्तं रीतिः।

> नानानानाशतादूर्ध्वमयुतादपि शक्तितः।

एकं नानापदं बहुप्रकारवाचि, परं महाराष्ट्रप्रसिद्धनाणकवाचि।

> शक्त्या पलसहस्रेण शतेनाऽर्द्धशतेन वा।
> तदर्द्धार्द्धेन वा राजन्पलार्द्धीनं न कारयेत्॥
> कार्यं तद्धि युतं हेम्ना वित्तशाठ्यमकुर्वता।

उक्तनाणकातिरिक्तं पलादूर्ध्वं पलसहस्राऽवधि शक्त्या हेमापि क्षिपेत्, इति मदनः।

> राजतेनाऽथ ताम्रेण रत्नैर्वा वस्त्रसंवृतम्।
> राजतेन पिधानेन ताम्रेणापि घटेन च॥
> नानाधान्योपरि स्थाप्य कल्पोक्तैरर्चयेत्पदैः।

नानाधान्यान्यष्टादश धान्यानि । पदानि मन्त्राः ।

पौराणिकं पुरस्कृत्य स्वयं वा तदनुज्ञया ।

पौराणिको गुरुः ।

कृतक्रियोऽग्निसान्निध्ये विष्णोरीशस्य चाण्डज ।
इमं समुच्चरेन्मन्त्रं कुशपाणिः प्रसन्नधीः ॥

मन्त्रः प्रयोगे ज्ञेयः ।

एवंपूज्य विधानेन नित्यानन्दनिधिं सुधीः ।
ससिद्धार्थकदूर्वाभिः सकुशाक्षतचन्दनैः ॥

सिद्धार्थकादिभिरानन्दमेवं संपूज्येतियोजना ।

तिललाजासुसंपूर्णं भूमावुदकमुत्सृजेत् ॥
मन्त्रेणानेन विधिवत्कल्पोक्तेन खगोत्तम ।

मन्त्रः प्रयोगे ज्ञेयः ।

यशःश्रेयोऽभिवृद्ध्यर्थं मातापित्रोस्तथात्मनः ।
पुराणन्यायमीमांसावेदवादिभ्य एव च ॥
एवमुत्सृज्य उदकं विप्रेभ्यः प्रतिपादयेत् ।
संविभज्य यथाशास्त्रं न कञ्चिदपमानयेत् ॥
महादानमिदं यस्मात्तस्मादेकोऽपि नार्हति ।
अथान्ये केचिदिच्छन्ति समस्तविधिपारगाः ॥
यज्ञदानव्रतानां च सोऽप्येकोऽर्हति तद्गृहे ।
एवं यः कुरुते दानं नित्यानन्दनिधेः परम् ॥
परं पदमवाप्नोति संसारेऽस्मिन्निरन्तरम् ।
दानानामप्यशेषाणामनन्तं फलमश्नुते ॥
नित्यानन्दविधानस्य प्रदानादपवर्गभाक् ।

इत्यानन्दनिधिदानम् ।

अथ प्रयोगः । तत्र यजमानः पूर्वोक्ते काले कुशतिलयवजललाजानादाय सकृद्दानपक्षे देशकालकीर्तनान्ते निरन्तरपरमपदावाप्तिसकलदानजन्यानन्तफलयोग्यानन्तरापवर्गप्राप्तिकामः वेधःपदाधिकरणासकृद्राज्यकरणोत्तरस्वकर्मशेषसञ्चितत्रेतायुगकालीननिजानुजीविसहिताखिलमहीराज्यावाप्तिपूर्वकनित्येशानपदप्राप्त्यनन्तरकल्पावधिकानल्पश्रीकवैद्यावरपदराज्यलाभोत्तराव्ययवैष्णवपदप्राप्तिदीर्घायुष्ट्वाविच्छिन्नसन्तान-

काम आनन्दनिधिमहादानमहं करिष्ये, इतिकृतसङ्कल्पः स्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यवरणानि कुर्यात् । अत्रानन्दनिध्यासादनपूजादि गुरुः कुर्याद्यजमानो वा । तद्यथा राजतपिधानं ताम्रघटरूपमानन्दनिधिं नानारत्नहैमरूप्यताम्रमुद्रापलाधिकहेमयुतं सूक्ष्मवस्त्रवेष्टितमष्टादशधान्योपरि विष्ण्वादिदेवतासंनिधौ स्थापयित्वा प्रतिष्ठापूर्वकम् 'ॐनित्यानन्दनिधये नमः' इतिमन्त्रेणाभ्यर्च्य सिद्धार्थदूर्वाब्जकुशचन्दनाक्षतानादायानन्दनिधिं प्रदक्षिणीकृत्य—

ॐनमः सर्वदानन्द सर्वसंपद्विवर्द्धन ।
वर्द्धयास्मान्समृद्ध्येह आयुषा यशसा श्रिया ॥
नमस्तेऽनन्तसन्तान सदानन्द सदोदय ।
त्वं सुखं वै कुरुष्वेह सन्तत्या मां धनायुषा ॥
नमो नमः पद्मनिधे धनेश शतक्रतो शङ्कर नैर्ऋतेश ।
शमं नयाऽस्मद्दुरितं हर प्रभो नमो नमस्ते हर शङ्करेश ॥
नमो नमः पाशधराप्रमेय नमोऽस्तु रामाय सुनामधेय ।
नमः समीराय हुताशनाय नमोऽस्त्वनन्ताय कनाशनाय ॥
नमः सुरश्रेष्ठहरीश्वराय नमोऽस्तु सावित्रि शिवे श्रियेति ।
सरस्वतीप्रीतिरतिः क्रियेति पुष्टिश्च तुष्टिस्मृतिशान्तिकीर्ते ॥
सर्वामराणां निधिरप्रमेयस्त्वमेव मन्त्रर्षिमुनीश्वराणाम् ।
आधारभूतोऽसि चराचरस्य विश्वस्य यस्मात्प्रणतोऽस्म्यतस्त्वाम् ॥
नमोऽस्तु सौन्दर्यनिधे सुरेश नमोऽस्तु गाम्भीर्यनिधे समुद्र ।
नमो नमः कान्तिनिधान इन्दो तेजोनिधे त्वां प्रणतोऽस्मि भानो ॥
नमः पद्माय भद्राय नमस्ते स्वस्तिकाय च ।
नमः शङ्खाय मणये मणिभद्राय ते नमः ॥
नमो नन्दविवर्ताय नन्दावर्ताय ते नमः ।
नमः कण्टककर्णाय कण्ठावर्ताय ते नमः ॥
नमो नन्दप्रतिष्ठाय नमो हेमप्रियाय च ।
नमो हिरण्यगर्भाय नित्यानन्दाय ते नमः ॥

इत्युपस्थाय पूजयित्वा कुशतिललाजयवाक्षतजलान्यादाय अद्येत्याद्युक्त्वा—

अद्येह पुण्यकालेऽस्मिन्द्विजदेवाग्निसन्निधौ ।
यशःश्रेयोऽभिवृद्ध्यर्थं मातापित्रोस्तथात्मनः ॥

पुराणन्यायमीमांसावेदवादिभ्य एव च ।
नमो विद्याविधायिभ्यो नानागोत्रेभ्य एव च ॥
विप्रेभ्योऽनेकशर्मभ्यो नित्यानन्दनिधिं परम् ।
अहं संप्रददे तेभ्यो नानानानावृतेन च ॥
सस्वर्णरौप्यताम्रेण सरत्नेन सवाससा ।
सोपस्करेण पुरुषो ब्रह्मविष्णुशिवात्मकः ॥
प्रीयतां निधिदानेन श्रीयज्ञपुरुषोऽच्युतः ।

इतिमन्त्रैरुदकं भूमौ क्षिप्त्वा विप्रेभ्योऽमुकामुकगोत्रेभ्योऽमुकामुकनामभ्योऽमुमौदुम्बरं रौप्यपिधानसुवर्णवस्त्राष्टादशधान्यादियुतमानन्दनिधिं निरन्तरेत्यादिप्राप्तिकामः इतिसकृद्दानपक्षे फलमुल्लिख्यासकृद्दानपक्षे तु वेधःपदेत्यादिसन्तानकामः इत्युक्त्वा युष्मभ्यमहं संप्रददे इति दद्यात् । एकस्मै वा दद्यात् । ततः सुवर्णं दक्षिणां दत्त्वा विप्रान्संभोज्य भूयसीं दक्षिणां दत्त्वा, यस्य स्मृत्या इति प्रमादादिति चोक्त्वा विष्णुं स्मरेत् । इत्यानन्दनिधिदानप्रयोगः ।

अथ देवतादानानि ।

तत्र तावद्दशावतारदानम् ।

विश्वामित्रः—

दानानामुत्तमं दानं हैमं विष्णोः स्वरूपकम् ।
तस्मात्पुण्यार्थिना देया हैमा विष्णोः स्वरूपकाः ॥

ते च—

मत्स्यः कूर्मोऽथ वाराहो नारसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बौद्धः कल्की च ते दश । इति ॥

मत्स्यादिस्वरूपाणि विश्वचक्रदाने दर्शितानि ।

यथाशक्त्या प्रकुर्वीत सुवर्णेन विजानता ॥
समेन षोडशेनैव समान्येतानि कारयेत् ।

षोडशेनैव समानीतिमहाभूतघटाख्ये षोडशदाने, प्रादेशादङ्गुलशतं यावत्कुर्यात्प्रमाणतः इति यत्प्रमाणमुक्तं तत्प्रमाणकानि मत्स्यादिरूपकाणि भवन्तीत्यर्थः ।

वित्तानुरूपतो राजन्तुल्यमाढ्यदरिद्रयोः ।

संपूज्य नामभिस्तैस्तु पुष्पधूपनिवेदनैः ॥
भक्तिनम्रः प्रणामान्ते निवेद्य श्रद्धया ततः ।
आहूय ब्राह्मणान्राजन्पादौ प्रक्षाल्य यत्नतः ॥
उपवेश्यासने सर्वांश्चन्दनेनानुलेपयेत् ।
सुगन्धैः कुसुमैश्चैव धूपैर्दीपैस्तथैव च ॥
आच्छाद्य वस्त्रयुग्मेन ग्रहणे चन्द्रसूर्ययोः ।
अयने विषुवे चापि द्वादश्यां तु विशेषतः ॥
उपोष्यैकादशीं कार्यं धर्मकार्यं च सर्वशः ।
अन्यथा नरकं यातीत्येवमाह पितामहः ॥
ग्राहकान्विष्णुरूपांश्च अर्हयेत विमत्सरः ।
एकैकं देवरूपं तमेकैकस्य समर्पयेत् ॥
अथवा विदुषः सर्वान्दद्यात्संपूज्य मानवः ।
नानृतेन कदाचिन्न दद्यात्पाषण्डिने तथा ॥
एतदुच्चार्य विप्रस्य हस्ते तोयं क्षिपेत्स्वयम् ।
दशावतारतो राजन्विष्णोरैक्यं स गच्छति ॥
महापातकसंसर्गान्मुच्यते तत्क्षणादपि । इति ॥

अद्येत्यादि महापापसंसर्गजदोषनिवृत्त्यर्थं विष्णोर्दशावतारान्दास्ये इति सङ्कल्प्यावतारान्विप्रान्संपूज्य,

देवरूपं मया विप्र कारितं काञ्चनं शुभम् ।
तद्गृहाण प्रदानेन प्रीयतां विश्वरूपधृक् ॥

इतिमन्त्रमुक्त्वा देशकालाद्युक्त्वा अमुकगोत्रायामुकशर्मणेऽमुकरूपं महापापसंसर्गजदोषनिवृत्तिकामस्तुभ्यमहं संप्रददे न मम इति एकैकमेकैकस्मै दद्यात् । एकस्मै वा सर्वाणि । दानप्रतिष्ठार्थं सुवर्णं दक्षिणां च ॥

इति दशावतारदानप्रयोगः ।

अथ ब्रह्मविष्णुरुद्रदानम् ।

ब्रह्माण्डपुराणे शौनकादिभिः पृष्टेन रोमहर्षणेन शृण्वन्तु मुनयः सर्वे इत्याद्युपक्रम्योक्तम्—

त्रिमूर्तिदानं दानानामुत्तमोत्तममुच्यते ।
विषुवे त्वयने वाऽपि चन्द्रसूर्यग्रहेषु च ॥

नित्यं च पञ्चदश्यां च जन्मर्क्षेषु समारभेत् ।
देवालये नदीतीरे पुण्येष्वायतनेषु च ॥
गृहे वा कारयेद्दानं यत्र भूमिः शुचिर्भवेत् ।
चतुरस्रां समां भूमिं गोमयेनोपलेपयेत् ॥
तत्राक्षताभिर्विकिरेत्पुष्पाञ्जलिं समन्ततः ।
एकहस्ता द्विहस्ता वा त्रिगुणा दैर्घ्यतः स्मृता ॥
त्रिवेदिका भवेत्तिर्यक्श्वेततन्दुलमिश्रिता ।
ब्रह्मा च विष्णुर्भगवान्पुरारिर्हिरण्मयास्तत्र निवेशनीयाः ।
चतुर्भुजाः सायुधभूषणाढ्याः किरीटिनश्चापि यथाक्रमेण ॥

एतत्प्रतिमालक्षणमुक्तं ब्रह्माण्डदाने ।

स्नानार्घपाद्याचमनीयवस्त्रैर्गन्धादिभिस्तानभिपूज्य भक्त्या ॥
प्रदक्षिणीकृत्य सपुष्पहस्तः प्रणम्य चोद्वास्य ततः प्रदद्यात् ।
प्रत्येकमेवं बहुमानपूर्वं संपूज्य दातव्यमनुक्रमेण ॥
तथा जगत्सृष्टिकरस्त्वमेव त्वमेव सर्वस्य पितामहोऽसि ।
त्वमेव कर्ता जगतां विहर्ता त्वमेव धाता जगतां विधाता ॥
त्वत्संप्रदानादनघो यथाऽहं त्वया च सायुज्यमुपैमि देव ।
तथा कुरु त्वं शरणं प्रपन्ने मयि प्रभो देववर प्रसीद ॥
त्वया जगद्व्याप्तमिदं समस्तं त्वां विष्णुमेव प्रवदन्ति सन्तः ।
त्वत्स्थानि सर्वाणि वदन्ति देव त्वया धृतं विश्वमनन्तमूर्ते ॥
त्वत्संप्रदानादनघो भवामि यथा जगत्कारणकारणेश ।
तथा कुरु त्वं शरणं प्रपन्ने मयि प्रभो देववर प्रसीद ॥
त्वया सुराणाममृतं विहाय हालाहलं संहृतमेव यस्मात् ।
तथाऽसुराणां त्रिपुरश्च दग्धमेकेषुणा लोकहितार्थमीश ॥
त्वद्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तो हि यथा भवेयम् ।
तथा कुरु त्वं शरणं प्रपन्ने मयि प्रभो देववर प्रसीद ॥
इत्येवमुक्त्वा विधिवद्ददाति स याति सायुज्यमथ त्रिमूर्तेः ।
यः कारयेद्द्विप्रवराय तस्मै सुवर्णसंख्यागणितं हिरण्यम् ॥
दद्याच्च वासोयुगमादरेण तथा कृते तल्लभते फलं तत् ।

इति त्रिमूर्तिदानम् ।

अथ द्वादशादित्यदानम् ।

ब्रह्माण्डपुराणे—

शृणु नारद भद्रं ते दानमादित्यसंज्ञितम् ।
यथोक्तं लोकगुरुणा विष्णुना प्रभविष्णुना ॥
कर्तुः पापहरं पुण्यमायुष्यं श्रीकरं शुभम् ।
आरोग्यं सर्वमङ्गल्यं दुःस्वप्नाद्भुतनाशनम् ॥
सर्वशान्तिकरं ह्येतत्सर्वसिद्धिफलप्रदम् ।
चक्षुष्यं सर्वरोगघ्नं भुक्तिमुक्तिफलप्रदम् ॥
विषुवत्ययने राहुग्रहणे चन्द्रसूर्ययोः ।
जन्मर्क्षे सौरवारे वा पञ्चदश्यार्कसंक्रमे ॥

सौरवारे सूर्यसम्बधिनि वारे ।

सप्तम्यां वाऽथ नक्षत्रे साविंत्रेऽद्भुतदर्शने ॥
दुःस्वप्नदर्शने कुर्याद्दानमादित्यसंज्ञितम् ।
देवालये नदीतीरे तडागे वरुणालये ॥
अन्येषु पुण्यदेशेषु देवदानं समाचरेत् ।
आलिप्य वै द्वादशहस्तदैर्घ्यां क्षितिं यथा गोमयसंयुताभिः ।
तस्मिन्सितैस्तन्दुलपुञ्जकैश्च विस्तारयेद्द्वादश पङ्कजानि ॥
प्रादेशमात्राणि शुभानि तानि सकर्णिकान्यष्टदलेषु तेषु ।
हिरण्यरूपाणि रवेर्विधाय यथाक्रमादुत्तरयोऽपकार्ः ॥
प्रत्यङ्मुखान्प्राङ्मुख एव देवांस्तद्वर्णगन्धादिभिरादरेण ।
संप्रीयतामित्यथ च क्रमेण प्रत्येकमुच्चार्य तदीयनाम ॥
धाता च मित्रश्च ततः क्रमेण मार्तण्डनामा च तथार्यमा च ।
शक्रश्च देवो वरुणस्तथाऽसौ भगो विवस्वाञ्नवमस्तथैषाम् ॥
आदित्यनामा सविता तथाऽन्यस्त्वष्टा तथैकादशमश्च तेषाम् ।
विष्णुस्तथा द्वादशमः स्वमन्त्रैराराधयेद्देववरान्द्विजांश्च ॥
पुरा देवऋषेर्दानं प्रोक्तं कमलयोनिना ।
तथा मयाऽपि युष्माकं प्रोक्तं मुनिवरोत्तमाः ॥

द्वादशादित्यप्रतिमालक्षणं प्रागुक्तं वेदितव्यम् ।

इति द्वादशादित्यदानम् ।

अथ चन्द्रादित्यदानम् ।

विष्णुधर्मोत्तरे भगवानुवाच—

अतः परं प्रवक्ष्यामि दानराजं नराधिप ।
यद्दत्त्वा तु बली राजा शक्रराज्यमवाप ह ॥
शक्रश्च बलिराज्यं तु दत्त्वा पुनरवाप ह ।
चन्द्रसूर्योपरागेषु अयने विषुवे तथा ॥
चन्द्रक्षये च द्वादश्यां वैशाख्यां पुत्रजन्मनि ।
कार्तिक्यां च महामाघ्यां सप्तम्यां च यथा तथा ॥
चन्द्रादित्यौ तु दातव्यौ सूर्यः सौवर्ण उच्यते ।
शुद्धस्य रजतस्यैव मण्डलं हिमरोचिषः ॥
द्वादशाङ्गुलवृत्तं तु उभयोरपि मण्डलम् ।
वृत्तौ पद्मसमाकारौ मध्ये चैव तु कर्णिका ॥
भानुं ताम्रमये पात्रे घृतपूर्णे तु निक्षिपेत् ।
सोमं शङ्खे क्षीरपूर्णे उपरि स्थापयेद्बुधः ॥

सूर्यं तु रक्तकुसुमैः सोमं शुक्लैस्तथैव च ।
आदित्याय सुगन्धं च धूपं चैव प्रदापयेत् ॥
सोमस्य गुग्गुलुर्देयो गन्धः शुक्लस्तथैव च ।
कुङ्कुमं तु पतङ्गाय दीपं चैव घृतेन तु ॥
एवं संपूज्य यत्नेन चन्द्रादित्यौ पृथक्पृथक् ।
अमृतमूर्तये सोमं नमोऽन्तेनैव पूजयेत् ॥
खखोल्कायेति वै सूर्यं नमोऽन्तेन पुनः पुनः ।
आहूय ब्राह्मणं भक्त्या वेदवेदाङ्गपारगम् ॥
कुटुम्बिनं दरिद्रं च आहिताग्निं तथैव च ।
रक्तेन वाससाच्छाद्य कुङ्कुमेनानुलेपयेत् ॥
संपूज्य पुष्पधूपैश्च द्विजं सूर्यमिवापरम् ।
रविं च चन्द्रबिम्बं च घृतस्थं तु निरीक्ष्य वै ॥
समर्पयेद्ब्राह्मणाय मन्त्रेणानेन भूमिपः ।
रुक्मं च पुष्करं चैव वर्णं पुष्करमेव च ॥

त्रयी विद्या च साङ्गा तु यस्याङ्गं विश्वरूपिणः ।
स वै दिवाकरो देवः प्रीयतां विप्र मा चिरम् ॥

एवमुच्चार्य भानुं तु ब्राह्मणाय निवेदयेत् ।
क्षीरजं देवदेवं तु द्विजराजं तथैव च ॥
अमृतमूर्तिं शीतांशुं ददामि ते द्विजोत्तम ।
गायत्र्या चैव सूर्यस्य अर्हणं जायते विभोः ॥
सोमं तरत्समन्दीयं शुचिः शुद्धेन तेजसा ।
एवंचन्द्रं रविं दत्त्वा बली राज्यमवाप ह ॥
सर्वं तेन तु दत्तं स्याद्यो दद्याच्चन्द्रभास्करौ ।
सर्वं तेन कृतं राजन्सर्वं तेन च संस्तुतम् ॥
सर्वं दक्षिणया चेष्टं संसारे तु नरोत्तमैः ।
पूज्यते सिद्धगन्धर्वैर्ऋषिभिर्देवदानवैः ॥

इति चन्द्रादित्यदानम् ।

अथ लोकपालाष्टकदानम् ।

ब्रह्माण्डपुराणे—

शृणु नारद भद्रं ते दानं सर्वाघनाशनम् ।
सर्वमङ्गलमायुष्यमारोग्यं शङ्करं शुभम् ॥
दानानामुत्तमं दानं सर्वसिद्धिकरं परम् ।
करोति दानं नारी वा सायुज्यं ब्रह्मणो व्रजेत ॥
विषुवत्ययने राहुग्रहणे चन्द्रसूर्ययोः ।
अन्येषु पुण्यकालेषु जन्मर्क्षेषु विशेषतः ॥
देवालये नदीतीरे गृहे वा दानमाचरेत् ।
पुण्यदेशेषु सर्वेषु पुराणोक्तेषु नारद ॥
चतुरस्रां समां भूमिं लिप्तां गोमयवारिणा ।
षट्करं चाष्टहस्तं वा दश द्वादश वा करान् ॥
प्राच्योदीच्यश्च कर्तव्या रेखाश्चतस्रकाः स्मृताः ।
नव कोष्ठानि तत्र स्युः श्वेततन्दुलपुञ्जकैः ॥
सितैरष्टदलैर्युक्तान्कमलान्विन्यसेच्छुभान् ।
राजतरूपमयं देवं जगत्कर्तारमव्ययम् ॥
तेषां मध्यमकोष्ठेषु कमलस्थं विवेशयेत् ।
इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ॥
वायुं सोमं तथेशानं प्रागादिषु यथाक्रमम् ।

जातरूपमयान्देवानष्टौ स्वायुधसंयुतान् ॥
त्रिपलावोक्सुवर्णात्तु यथाशक्ति विनिर्मितान् ।
ब्रह्मणोऽभिमुखान्सर्वान्सर्वेषु विनिवेशयेत् ॥

स्वर्णमयं कमलस्थं ब्रह्माणं ब्रह्मलोकपालप्रतिमालक्षणं ब्रह्माण्डदाने द्रष्टव्यम् ।

प्रत्येकं वा समावेष्टय संप्रोक्ष्य कुशवारिणा ।
योऽसौ कारयिता विप्रस्त्वेवमेतत्समाचरेत् ॥
दानकाले तु संप्राप्ते दाता स्नात्वा कुशोदकैः ।
प्रसन्नचित्तवदतः परमेष्ठिपुरोगमान् ॥
स्वनाममन्त्रैरभितो नमोऽन्तैराराध्य गन्धादिभिरादरेण ।
विप्रांस्तथाऽभ्यर्च्य यथाक्रमेण संप्रीयतामत्र ममेति चोक्त्वा ॥
योऽसौ कारयिता विप्रस्तस्मै दद्याच्च दक्षिणाम् ।
सुवर्णसंख्यागणितं हिरण्यं चैव वाससी ॥
प्रोक्तं देवऋषे दानं लोकपालाह्वयं मया ।
किमन्यच्छ्रोतुमिच्छा ते तदिदं वद सांप्रतम् ॥

इति लोकपालाष्टकदानम् ।

अथ नवग्रहदानम् ।

ब्रह्माण्डपुराणे ब्रह्मोवाच—

ग्रहदानक्रमं वक्ष्ये सर्वसिद्धिकरं परम् ।
सर्वशान्तिकरं नृणां सर्वपापप्रणाशनम् ॥
विषुवत्ययने राहुग्रहणे शशिसूर्ययोः ।
जन्मर्क्षे सौरवारे वा पञ्चदश्यां तथैव च ॥
पुण्यकालेषु सर्वेषु पुण्यदेशे विशेषतः ।
ग्रहदानं तु कर्तव्यं नित्यं श्रेयोऽभिकाङ्क्षिणा ॥
हस्तमात्रं द्विहस्तं वा त्रिहस्तं वाऽथ नारद ।
चतुरस्रां समां भूमिं गोमयेनोपलेपयेत् ॥
रेखाः प्राच्य उदीच्यश्च चतस्रस्तास्तथा समाः ।
नवकोष्ठेषु पद्मानि विन्यसेच्छ्वेततण्डुलैः ॥
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।

राहुः केतुरिति प्रोक्ता ग्रहा लोकसुखावहाः ॥
एषां हिरण्यरूपाणि कारयित्वा यथाविधि ।
त्रिनिष्केणाथवा कुर्याद्यथाशक्त्या पृथक्पृथक् ॥
हिरण्यरूपाणि हिरण्यप्रतिमाः । तल्लक्षणान्यत्रैव वक्ष्यन्ते ।
आदित्यं मध्यमे कोष्ठे दक्षिणेऽङ्गारकं न्यसेत् ।
उत्तरे तु गुरुं विद्याद्बुधमुत्तरपूर्वके ॥
भार्गवं पूर्वतो न्यस्य सोमं दक्षिणपूर्वके ।
पश्चिमेऽर्कसुतं न्यस्य राहुं दक्षिणपश्चिमे ॥
पश्चिमोत्तरतः केतुः सन्निवेश्यो यथाविधि ।
तद्वर्णपुष्पगन्धाद्यैरर्चयेत्तत्रस्वमन्त्रकैः ॥
दानं शूद्रोऽथवा कुर्यात्स्त्री वा तत्र तु नारद ।
भूलेपनादि यत्कार्यं सर्वं विप्रेण कारयेत् ॥
स्नानकाले तु संप्राप्ते स्नात्वा कुशतिलोदकैः ।
प्रयतो यजमानस्तु धौतवस्त्रः प्रसन्नधीः ॥
अर्चयित्वा स्वयं दद्यादहस्करमुखान्ग्रहान् ।
प्रत्येकमेकं विप्रोऽसौ स्वस्वमन्त्रमुदीरयेत् ॥
पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥
श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डकरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः ॥
रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिधृक्सोमसुतः सदा नः सिंहाधिरूढो वरदो बुधश्च ॥
प्रियङ्गुकलिकाश्यामो रूपेणाऽप्रतिमो भुवि ।
सौम्यः सौम्यगुणोपेतः सदाऽस्तु वरदो मम ॥
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डं च कमण्डलुं च तथाऽक्षसूत्रं वरदोऽस्तु मह्यम् ॥
सुराणां च मुनीनां च गुरुः कनकसन्निभः ।
बुद्धिदाता त्रिलोकस्य स मां रक्षतु वाक्पतिः ॥

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
तथाक्षसूत्रं च कमण्डलुं च जपं च बिभ्रद्वरदोऽस्तु मह्यम् ॥
हेमकुन्दमृणालाभो दैत्यानां परमो गुरुः ।
सर्वशास्त्रास्त्रवक्ता च भार्गवो वरदोऽस्तु सः ॥
नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तः स चाऽस्तु मह्यं वरमन्दगामी ॥
नीलाऽम्बरो नीलवपुः किरीटी करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोऽस्तु मह्यम् ॥
धूम्रो द्विबाहुर्वरदो गदाभृद्गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गः सदाऽस्तु मे केतुगणः प्रशान्तः ॥
इत्युक्त्वा दापयेत्सर्वानादित्यादीन्नव ग्रहान् ।
पुरुषो वाऽथ नारी वा यथोक्तं फलमाप्नुयात् ॥
मध्यमं गुरवे दद्यादन्यस्मै वा प्रदापयेत् ।

गुरुरत्र पूजादिकर्ता ।

अथवा दक्षिणा देया सुवर्णं वाससी शुभे ।
इत्याह भगवान्ब्रह्मा नारदाय महात्मने ॥
तथाहमब्रुवं दानं युष्माकं मुनिसत्तमाः ।

इति ग्रहदानम् ।

अथ वारदानानि ।

स्कान्दे—

आदित्यादिषु वारेषु सहिरण्यः सदैव तु ।
यः प्रयच्छति तन्मूर्तीस्तस्य तुष्यन्ति वै ग्रहाः ॥
दद्यादादित्यमादित्ये सोमं सोमे कुजं कुजे ।
एवं बुधादीन्मन्दे तु राहुकेतुशनैश्चरान् ॥

इति वारदानानि ।

अथ शूलदानम् ।

वायुपुराणे—

या निष्कृतिस्तु पापानां कृतानां प्रज्ञया विना ।
यत्पाशुपतमाख्यातमस्त्रं देवस्य शूलिनः ॥
तस्य प्रदानात्सकलं तत्पापं संप्रणश्यति ।

कृष्णपक्षे चतुर्दश्यामष्टम्यां वा सितेतरे ॥
कुर्याद्द्वादशनिष्केण त्रिशूलं लक्षणान्वितम् ।

निष्कं चतुष्कः सौवर्णिकः, सौवर्णमात्रं षट्पञ्चाशदधिकशतद्वय-पणमूल्यो वेति पक्षत्रयं शक्त्या ज्ञेयम् ।

युगान्तकरणं घोरमघविध्वंसनं परम् ।
नानारजोविरचिते चक्रे षडरभूषिते ॥

चक्रं षोडशारं परिभाषायामुक्तम् ।

नाभौ निधाय संपूर्णं तिलानां ताम्रनिर्मितम् ॥
पात्रमाढकसंमानं तत्र शूलं न्यसेत्पुनः ।
कुर्यात्तेनैव मन्त्रेण तस्मात्पूजामनुक्रमात् ॥

तेनैव शूलाय नमः इति मन्त्रेण ।

विरूपाक्षं च तत्पार्श्वे कमलोपरि पूजितम् ।
अघोरेभ्योऽपि मन्त्रेण पूजान्ते प्रणिपत्य च ॥

अघोरमन्त्रस्तु लैङ्गे—

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥
विप्रं च ज्ञानिनं तद्वत्संपूज्य मुनिपुङ्गवाः ।
प्रदक्षिणं ततो गत्वा इमं मन्त्रमुदीरयेत् ॥
भगवन्भगनेत्रघ्न दक्षयज्ञप्रमर्दन ।
तवायुधप्रदानेन पापं नश्यतु शङ्कर ॥
युगान्ते येन लोकानां त्वमन्तकविनाशनः (?)
विदग्धं तत्स्वपापेन तेन पापं व्यपोहय ॥
येन दग्धं क्षणार्द्धेन त्रिपुरं सुरदुर्जयम् ।
तेन पाशुपतास्त्रेण मम पापं विनाशय ॥
यदबुद्धिकृतं पापं मम वाक्स्थं च मानसम् ।
तत्सर्वं क्षयमभ्येतु तव शूलप्रदानतः ॥
इत्यामन्त्र्य ततो दद्याच्छूलं तस्मै द्विजन्मने ।
अवश्यं कुरुते पापमज्ञानान्मानवो यतः ॥
वर्षे वर्षे ततो दद्यात्तस्य तस्यापनुत्तये ।

इति शूलदानम् ।

अथात्मप्रतिकृतिदानम्।

भविष्योत्तरे—

दानकालः सदा तस्य इत्युक्त्वा—

हैमीं प्रतिकृतिं भव्यां कारयित्वात्मनो नृप।
अभीष्टवाहनगतामिष्टालङ्कारभूषिताम्॥
अभीष्टलोकसहितां सर्वोपस्करसंयुताम्।

अभीष्टलोकः प्रियजनः।

नेत्रपट्टपटीवस्त्रैश्छादितां स्रग्विभूषिताम्।
कुङ्कुमेनानुलिप्ताङ्गीं कर्पूरागुरुवासिताम्॥
स्त्री वा दद्यात्तु शयने शयितां कारयेत्स्वयम्।
यद्यदिष्टतमं किञ्चित्तत्सर्वं पार्श्वतो न्यसेत्॥
उपकारकरं स्त्रीणां पुरुषाणां च यद्भवेत्।
तत्सर्वं स्थापयेत्पार्श्वे स्वयं संचिन्त्य चेतसि॥
एतत्सर्वं मेलयित्वा स्वे स्वे स्थाने नियोजयेत्।

अद्येत्यादि साभ्रशतवर्षपर्यन्तं सुरसाहित्येन स्वर्गादीष्टभोगोत्तरजन्मनीष्टबन्धुजनावियोगकाम आत्मप्रतिकृतिदानं करिष्ये, इति सङ्कल्प्य—

पूजयित्वा लोकपालान्ग्रहान्देवीं विनायकम्।

देवी दुर्गा।

ततः शुक्लाम्बरः स्नात्वा गृहीतकुसुमाञ्जलिः।
इममुच्चारयेन्मन्त्रं विप्रस्य पुरतः स्थितः॥
आत्मनः प्रतिमा चेयं सर्वोपकरणैर्युता।
सर्वरत्नसमायुक्ता तव विप्र निवेदिता॥
आत्मा शम्भुः शिवः शौरिः शक्रः सुरगणैर्युतः।
तस्मादात्मप्रदानेन मम चात्मा प्रसीदतु॥

इत्युक्त्वा मासपक्षादि चोल्लिख्य पूर्वोक्तं साभ्र इत्यादिकाम इत्यन्तं सङ्कल्पवाक्यमुक्त्वा इमामात्मप्रतिमां सोपस्कराममुकशर्मणेऽमुकगोत्राय तुभ्यमहं संप्रददे।

इत्युच्चार्य ततो दद्याद्ब्राह्मणाय युधिष्ठिर।
ब्राह्मणश्चाथ गृह्णाति कोऽदादिति च कीर्तयेत्॥
ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत्।

विधिनाऽनेन राजेन्द्र दानमेतत्प्रयच्छति ॥
यः पुमानथ वा नारी शृणु तत्फलप्राप्नुयात् ।
साग्रं वर्षशतं भव्यं सर्वलोकैः सुरैर्वृतः ॥
अभीष्टफलदानेन चाभीष्टफलभाग्भवेत् ।
यत्रैवोत्पद्यते जन्तुः प्राप्तः कर्मक्षयं क्षणम् ॥
तत्रैव सर्वकामानां फलभाग्जायते नृप ।
इष्टबन्धुजनैः सार्द्धं न वियोगं कदाचन ॥
प्राप्नोति पुरुषो राजन्स्वर्गमानन्त्यमश्नुते । इति ॥

इत्यात्मप्रतिमादानम् ।

अथ धनदमूर्तिदानम् ।

वायवीये—

दरिद्रो जायते मर्त्यो दानविघ्नं करोति यः ।
ऐश्वर्यं जायते येन कर्मणा तच्छृणुष्व मे ॥
पलार्द्धेन तदर्द्धेन तदर्द्धेनाऽथवा पुनः ।

पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा, इति क्वचित्पाठः । तदर्द्धेनाऽथवा पुनरिति च क्वचित् ।

धनदस्य प्रतिकृतिं कुर्यात्स्वर्णमयीं शुभाम् ।
द्विभुजां वाहनोपेतां नयनानन्दकारिणीम् ॥

धनदरूपं तु—

ह्रस्वमापिङ्गनेत्रं च गदिनं पीतविग्रहम् ।
पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा ॥

इत्यादिनोक्तम् ।

शङ्खपद्मनिधिभ्यां च युक्तं तत्पार्श्वयोर्द्वयोः ।
श्वेतवस्त्रेण संवेष्ट्य तन्दुलोपरि विन्यसेत् ॥
तन्दुलानां परीमाणं भवेद्द्रोणचतुष्टयम् ।
तदर्द्धं वा तदर्द्धं वा वित्तशाठ्यं न कारयेत् ॥
श्वेतमाल्यैस्तथागन्धैरनुलिप्य प्रपूजयेत् ।
आग्नेय्यां दिशि होमश्च समिदाज्यतिलैर्भवेत् ॥
मन्त्रो राजाधिराजायेत्येष योज्यः स्वलिङ्गकैः ।
व्याहृत्या तिलहोमश्च कर्तव्यो धनकाङ्क्षिभिः ॥

आचार्यः सर्वशास्त्रज्ञो विनीतः सर्वसंमतः ।
महाकुलप्रसूतश्च धर्मज्ञः सत्यवाक्छुचिः ॥
कारयेदर्चनं तेन धनदस्यातिभक्तितः ।
तद्दैवत्येन मन्त्रेण स च कामश्वरो भवेत् ॥
तस्मै होमं कृतवते प्रदद्यात्प्रतिमां तु ताम् ।
मन्त्रेणानेन विधिवत्प्राङ्मुखस्तु उदङ्मुखः ॥

मन्त्रः प्रयोगे ज्ञेयः ।

एवं कुबेरदानं यः करोति विधिपूर्वकम् ।
धनदेन समो मर्त्यस्तत्क्षणादेव जायते ॥

अथ प्रयोगः । सार्द्धमाषद्वयाधिकां पञ्चाशन्माषावधिकुबेरमूर्तिं पुष्पकविमानस्थां पार्श्वयोः पद्मशङ्खाकारयुतां कृत्वाऽद्येत्यादि यथेष्टधनकामोऽहं धनदमूर्तिदानं करिष्ये इति सङ्कल्प्य श्वेतवस्त्रां मूर्तिं यथाशक्ति एकद्विचतुर्द्रोणतन्दुलराशौ निधाय संपूज्य तदाग्नेय्यामग्निं संस्थाप्य समिदाज्यचरुभिः प्रत्येकमष्टाष्टाविंशत्यादिसंख्यया राजाधिराजाय इतिमन्त्रेण व्याहृतिभिश्च तिलैर्हुत्वा आचार्येण धनदपूजां कारयित्वा—

उत्तराशापते देव कुबेर नरवाहन ।
पद्मशङ्खनिधीनां त्वं पतिः श्रीकण्ठवल्लभः ॥
दानाद्येन यथा प्राप्तं दारिद्र्यं मम दुःखदम् ।
तत्सर्वमात्मदानेन पापमाशु विनाशय ॥

इतिमन्त्रमुक्त्वाऽद्येत्यादि इमां धनदमूर्तिं दारिद्र्यनाशकामोऽमुकगोत्रायामुकशर्मणे तुभ्यमहं संप्रददे न मम इति दत्त्वा, देयद्रव्यतृतीयं चतुर्थं वांशं सुवर्णं दक्षिणां दद्यात् । इति धनदमूर्तिदानम् ।

अथ शालग्रामदानम् ।

शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात्सशैलवनकाननम् ॥

इतिपाद्मे शालग्रामदानम् । सशैलवनभूचक्रदानफलकाम इति दानवाक्यम् । मन्त्रस्तु—

महाकाशनिवासेन चक्राद्यैरुपशोभितम् ।
अस्य देवस्य दानेन मम सन्तु मनोरथाः । इति ॥

अथ कालपुरुषदानम् ।

भविष्योत्तरे—

काम्यो दानविधिः पार्थ क्रियमाणो यथातथम् ।
फलाय मुनिभिः प्रोक्तो विपरीतो भयाय च ॥
देयं निष्कशतं पार्थ दानेषु विधिरुत्तमः ।
मध्यमस्तु तदर्द्धेन तदर्द्धेनावरः स्मृतः ॥
एवं वृक्षे रथेऽण्डे च धेनोः कृष्णाजिनस्य च ।
अशक्तस्याऽपि क्लृप्तोऽयं पञ्चसौवर्णिको विधिः ॥
अतोऽप्यल्पेन यो दद्यान्महादानं नराधिप ।
प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत् ॥

वृक्षो महादानेषु कल्पवृक्षः । रथो हिरण्याश्वरथः । अण्डं ब्रह्माण्डम् । धेनुः कामधेनुः ।

पुण्यं दिनमथासाद्य भूमिभागे समे शुभे ।
चतुर्दश्यां चतुर्थ्यां वा विष्टयां वा पाण्डुनन्दन ॥
पुमान्कृष्णाजिने कार्यो रौप्यदन्तः सुवर्णदृक् ।
खड्गोद्यतकरो दीर्घो जपाकुसुमकुण्डलः ॥
रक्ताम्बरधरः स्रग्वी शङ्खमालाविभूषितः ।
तीक्ष्णासिपुत्रीबन्धेन विस्फारितकटीतटः ॥

असिपुत्री छुरिका ।

उपानद्युगयुक्ताङ्घ्रिः कृष्णकम्बलपार्श्वगः ।
गृहीतमांसपिण्डश्च वामे करतले तथा ॥
एवंविधं पुमान्कृत्वा गृहीतकुसुमाञ्जलिः ।
यजमानः प्रसन्नात्मा इमं मन्त्रमुदीरयेत् ॥
संपूज्य गन्धकुसुमैर्नैवेद्यं विनिवेद्य च ।
सर्वं कालयसे यस्मात्काल त्वं तेन चोच्यसे ॥
ब्रह्मविष्णुशिवादीनां त्वमसाध्यो हि सुव्रत ।
पूजितस्त्वं मया भक्त्या पार्थिवश्च तथा सुखम् ॥
यद्दुद्धयते तव विभो तत्कुरुष्व नमो नमः ।
एवं संपूजयित्वा तं ब्राह्मणाय निवेदयेत् ॥
ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणैस्तथा ।

दक्षिणां शक्तितो दद्यात्प्रणिपत्य विसर्जयेत् ॥

दक्षिणां प्रागुक्तां निष्कशतादिरूपाम्।

अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥
नापमृत्युभयं तस्य न च व्याधिकृतं भवेत्।
भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ॥
देहान्ते सूर्यभवनं भित्त्वा याति परं पदम्। इति ॥
पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः।
सत्रयाजी श्रिया युक्तः पुत्रपौत्रसमन्वितः ॥

संपूज्य कालपुरुषं विधिवद्द्विजाय दत्त्वा शुभाशुभफलोदयहेतुभूतम्। रोगातुरे सकलदोषमये च देहे देही न मोहमुपगच्छति तत्प्रभावात् ॥

अथ प्रयोगः। चतुर्थ्यां च चतुर्दश्यां भद्राकरणे वा रौप्यदशनं सुवर्णनेत्रं खड्गोद्यतदक्षिणकरं मांसपिण्डयुतवामकरं जपाकुसुमकुण्डलं रक्तस्रग्विणं शङ्खमालाधरं छुरिकया युतकटिदेशमतिदीर्घं कृष्णाजिने कालपुरुषं निर्मायाद्येत्यादि 'अपमृत्युव्याधिसर्वबाधानिवारणाव्याहतैश्वर्यप्राप्तिमरणोत्तरपरपदतदुत्तरधर्मश्रीपुत्रपौत्रादिकर्तृत्वराज्यकामः कालपुरुषदानं करिष्ये' इति सङ्कल्प्य कालपुरुषं विप्रं च संपूज्य पुष्पाञ्जलिं गृहीत्वा—

सर्वं कालयसे यस्मात्कालस्त्वं तेन चोच्यसे।
ब्रह्मविष्णुशिवादीनां त्वमसाध्योऽसि सुव्रत ॥
पूजितस्त्वं मया भक्त्या पार्थिवश्च यथासुखम्।
यद्बुध्यते तव विभो तत्कुरुष्व नमो नमः ॥

इति मन्त्रमुक्त्वाऽद्येत्यादि 'अपमृत्युव्याधिसर्वबाधानिवारणेत्यादिकाम, इत्यन्तं पूर्वोक्तं सङ्कल्पवाक्यं चोक्त्वा इमं कालपुरुषं सोपस्करममुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे न मम इति दत्त्वा पञ्चसुवर्णोर्ध्वमानिष्कशतं दक्षिणां दत्त्वा भूयसीदानविप्रभोजनानि कुर्यात्।

इति कालपुरुषदानविधिः।

अथ कालचक्रदानम्।

मृत्युञ्जये—

चक्रं रूप्यमयं कृत्वा मुक्तारश्मिमयात्मकम्।
कृत्वा मूर्ति शरच्चन्द्रं रश्मिमध्यान्तरस्थितम् ॥

तमःशतैकरूपाणि गात्रेषु च समन्ततः ।
एवं ध्यानवतस्तस्य स चन्द्रः कृष्णतां व्रजेत् ॥
ततोऽप्यनन्तरं पश्चात्स्थित्वा विप्रप्रदक्षिणाम् ।
तं गृहीत्वा व्रजेद्दूरमदृष्टत्वमपि व्रजेत् ॥
स्वयं वाऽमृतसङ्घातपूर्णकायस्थितस्थितिः ।
कालचक्रमिदं नाम्ना दानं मृत्युविनाशनम् ॥
इमं ते राजतं चन्द्रं रश्मिजालसमाकुलम् ।
अपमृत्युविनाशाय ददामीति समुच्चरन् ॥
सुवर्णदक्षिणायुक्तं ब्राह्मणाय निवेदयेत् ।
एवं कृते विनश्येत अपमृत्युं विनाशय ॥
तस्मादेतत्समादेयमपमृत्युभयान्वितैः ।
ज्वरादिरोगग्रस्तैर्वा महापत्पतितैरपि ॥
ततो गृह्योक्तविधिना स्थापयेज्जातवेदसम् ।
जुहुयात्कालनाम्ना तु शतमष्टोत्तरं तिलैः ॥
ततस्तु भोजयेद्भक्त्या विप्रान्द्वादशसङ्ख्यया ।
स्वयमक्षारलवणं भुञ्जीत सकृदेव तु ॥
एवंकृते नरो नूनं चिरं जीवेन्न संशयः ।

अथ प्रयोगः । अद्येत्यादि 'अपमृत्युनिवारणकामः कालचक्रदानं करिष्ये' इति सङ्कल्प्य शक्तितो रूप्यकृतं चन्द्राकारमनेकमुक्तामालात्मकरश्मियुतं कालचक्रं विप्रं च संपूज्य—

इमं ते राजतं चन्द्रं रश्मिजालसमाकुलम् ।
अपमृत्युविनाशाय ददामीति समुच्चरन् ॥

इदं कालचक्रं मुक्तादामयुतमपमृत्युनिवारणकामोऽमुकगोत्रायाऽमुकशर्मणे विप्राय तुभ्यमहं संप्रददे न मम, इति दत्त्वा सुवर्णं दक्षिणां दत्त्वाऽग्निं संस्थाप्य कालचक्राय स्वाहेत्यष्टोत्तरशतं तिलैर्हुत्वा द्वादश विप्रान्भोजयित्वा स्वयमक्षारमलवणं सकृद्भुञ्जीत ।

इति कालचक्रदानविधिः ।

अथ यमदानम् ।

मृत्युञ्जये—

लोहपात्रे स्थितं कांस्यं तत्र पद्मं तु राजतम् ।
तस्मिन्कालेश्वरः स्वर्णैः पुरुषाकारतां गतः ॥

यमरूपं तु—

ईषत्पीतो यमः कार्यो दण्डहस्तो विजानता ।
रक्तदृक्पाशभृत्क्रुद्धः इति ।
वस्त्रालङ्कारसंयुक्तो भयदास्त्राणि सर्वतः ।
त्रिलोहाकारपुरुषैः कालदूतैश्च पार्श्वतः ॥

भयदास्त्राणि खड्गादीनि । त्रिलोहं कांस्यताम्रपित्तलाख्यम् । कालदूतैर्दण्डहस्तैस्त्रिभिः पुरुषाकारैः ।

कृत्वा च माहिषे पृष्ठे तं दद्याद्यममालपन् ।

आलपन्यमं ददामीत्युच्चरन् ।

अष्टम्यां च चतुर्दश्यां करोति विधिवत्तु यः ।
स मुच्यते ध्रुवं नाशाद्दत्त्वा घृतघटोत्तरम् ॥

नाशो मृत्युः । घृतघट उत्तरो दक्षिणास्थाने यस्य, इति दानविवेके । अपरे तु 'दक्षिणा सुवर्णम्' इति ।

अथ प्रयोगः । लोहपात्रे कांस्यपात्रं तस्मिन्रौप्यपद्मं तस्मिन्सौवर्णमहिषस्थं दण्डपाशकरं यममलङ्कृतं तत्समीपे हैमानि खड्गाद्यस्त्राणि त्रिलोहघटितान्दण्डकरान्कालदूतांश्च संस्थाप्य तिथ्यादि स्मृत्वा 'अपमृत्युनिवारणकामो यमदानं करिष्ये' इति संकल्प्य सवाहनदूतास्त्रं यमं विप्रं च संपूज्याद्येत्याद्यपमृत्युनिवारणकाम इमां पूर्वोपस्करयुताममुकशर्मणेऽमुकगोत्राय विप्रायाहं संप्रददे न मम, इति दत्त्वा दक्षिणां सुवर्णं दद्यात् ।

इति यमदानम् ।

अथायुष्करदानम् ।

ब्रह्माण्डे—

भूमौ गोमयलिप्तायां दक्षिणोत्तरतः शुभाम् ।
निधाय तत्र पाणिभ्यां पूर्णानि सिततन्दुलैः ॥
चत्वारि तेषु हैमानि मण्डलानि निवेशयेत् ।

मण्डलानि स्थलाकाराणि, कुम्भान् इत्यन्ये ।

सौवर्णांश्च ततो देवानर्चयेच्च यथाक्रमम् ।
पूर्वमात्मभुवं तत्र विष्टरश्रवसं ततः ॥

कृत्तिवाससमीशानं वज्रपाणिं शतक्रतुम् ।
गन्धादिभिरथाभ्यर्च्य दक्षिणोत्तरतः क्रमात् ॥
प्रत्येकमेकं विप्रेभ्यो दद्यादारभ्य भक्तितः ।
तं तं देवमिह ध्यात्वा मन्त्रानेतानुदीरयेत् ॥
संप्रीयतां मे भगवानात्मभूरित्युदीरयन् ।
संप्रीयतां जगद्व्यापी भगवान्विष्टरश्रवाः ॥
संप्रीयतां मे भगवान्कृत्तिवासा इति ध्रुवम् ।
संप्रीयतां मे भगवान्वज्रपाणिः शतक्रतुः ॥
एवमाह पुरा ब्रह्मा नारदाय सुरर्षये ।
प्रोक्तं मयाऽपि तत्सर्वं युष्माकं मुनिपुङ्गवाः ॥

अत्र ब्रह्मविष्णुशिवेन्द्रा यथाशक्ति सुवर्णमयाः कार्याः । आयुष्कामो ब्रह्मविष्णुशिवेन्द्रप्रतिमादानमहं करिष्ये इति संकल्प्य ।

इति आयुष्करदानम् ।

अथ संपत्करम् ।

ब्रह्माण्डे—

संपत्करं दानमतीव पुण्यं यस्मिन्कृते संपदोऽस्येति जन्तुः ।

तथा—

आयुष्करं रोगहरं तु पापविनाशनं नाशकरं त्वघानाम् ।
स्वर्गापवर्गौ कुलपुत्रवृद्धिं श्रियं तथाच प्रददातीष्टसिद्धिम् ॥

तथा—

कालेषु सूर्यग्रहणादिकेषु तारेषु जन्मत्रितयेषु कार्यम् ।
देशेषु देवायतनादिकेषु गृहेषु वा यत्र मनः प्रसन्नम् ॥
स्नात्वा प्रातस्तिलमिश्रैः कुशोदैः शुचिर्भूत्वा धौतवासाः प्रयत्नात् ।
सङ्कल्प्य विप्रं विदुषं गुरुं च कार्यं च तस्याऽनुमतेन सर्वम् ॥

गुरुं वृत्वेति शेषः ।

गव्येन भूमिं शकृता जलेन विलेपयेद्विंशकमात्रहस्ताम् ॥
तत्रैव लेख्याश्चतुरः समाः स्युः प्राच्यश्च तिर्यक् च यथोपदिष्टम् ॥
नव कोष्ठानि तत्र स्युस्तेषु पूर्णानि तण्डुलैः ।
निधातव्यानि पात्राणि वासोभिरभिवेष्ट्य च ॥

पात्राणि कुम्भान् ।

पलस्याऽर्वाक्त्रिनिष्कार्द्धं यथाशक्ति विनिर्मितान् ।

निष्कोऽत्र सुवर्णम् ।

दक्षिणोत्तरतो देवाञ्जातरूपमयान्न्यसेत् ।
पार्श्वान्त्यकोष्ठत्रितये तु मित्रं तथा च देवं वरुणं च सोमम् ॥
चतुर्भुजं मध्यमकोष्ठकेषु जगत्पतिं विष्णुमुमापतिं च ।
दिवाकरं वृत्रहणं च वह्निं संपूज्य सर्वान्विधिवत्क्रमेण ॥

मित्रलक्षणं तु—

पद्मगर्भसमः कार्यो मित्रः कमलसंस्थितः ।
आजानुलम्बिनालान्तर्विकचाम्भोजहृक्प्रभुः ॥

वरुणादिरूपमुक्तं ब्रह्माण्डदाने ।

अभ्यर्च्य विप्रानपि गन्धवस्त्रैः पृथक्च दातव्यमनुक्रमेण ।
संप्रीयतां मेऽयमित्येवमुक्त्वा ततो हि दद्यात्सोदकं पूर्वमत्र ॥
एकस्य चैकं च हिरण्यरूपं प्रमाणपूर्वं परिणीय सर्वान् ।
पात्राणि वासः परिधाय चैव सतन्दुलं सहिरण्यं च दत्त्वा ॥
अभीष्टसिद्धिं लभते च सर्वामायुष्यमारोग्यमुपैति चाग्र्यम् ।
अथोपदेष्ट्रे गुरवे सुवर्णं वासोयुगं दानसमं च दद्यात् ॥
विप्रैस्तथा वाचयेत्स्वस्तिवाच्यं ततो दद्याद्दक्षिणां वाचकेभ्यः ।

अथ प्रयोगः । प्रातस्तिलकुशमिश्रोदकेन स्नात्वाऽद्येत्यादि 'संपदायुरारोग्यपापनाशपुत्रादिकुलवृद्धिश्रीस्वर्गमोक्षेष्टसिद्धिकामो मित्रादिप्रतिमादानं करिष्ये' इति संकल्प्य गुरुं वृत्वा तेनाज्ञप्तो विशुद्धस्तां चतुरस्रां भुवं गोमयेनालिप्य तत्र प्रागायताश्चतस्र उदगायताश्चतस्रो लेखा लिखित्वा तत्र जातेषु नवकोष्ठेषु तण्डुलान्निक्षिप्य तेषु नवकुम्भान्सवस्त्रान्विधिना संस्थाप्य तेषु सुवर्णत्रयादूर्ध्वं पलावधिहेम्ना कृताः प्रतिमाः स्थापयेत्पूजयेच्च । तत्र पश्चिमपङ्क्तौ उदक्संस्थान्मित्रं वरुणं सोमं च । मध्यमपङ्क्तौ चतुर्भुजं विष्णुमुमापतिं च । अन्त्यपङ्क्तौ दिवाकरं वृत्रहणं वह्निं च । ततो नव विप्रान्संपूज्यैकैकस्मै विप्राय मित्रः प्रीयतां अद्येत्यादि संपदादिकामान्तं पूर्वोक्तं फलमुक्त्वा, अमुकशर्मणे अमुकगोत्राय विप्रायेमां प्रतिमां संप्रददे इति दद्यात् । एवञ्च वरुणः

प्रीयतामिति वरुणादिप्रतिमां गुरवे च देयद्रव्यसमं सुवर्णं वस्त्रयुगं च दद्यात् ।

इति संपत्करदानम् ।

अथ कृष्णाजिनम् ।

सौरे—

कृष्णाजिनं च महिषीं मेषीं च दश धेनवः ।
ब्रह्मलोकप्रदायीनि तुलापुरुष एव च ॥

यमः—

गोभूहिरण्यसंयुक्तं मार्गमेकं ददाति यः ।
सर्वदुष्कृतकर्मापि सायुज्यं ब्रह्मणो व्रजेत् ॥

मरीचिः—

कृष्णाजिनोभयमुखीं यो दद्यादाहिताग्नये ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
कृष्णाजिनसमं दानं न चास्ति भुवनत्रये ।
प्रतिग्रहोऽपि पापीयानिति वेदविदो विदुः ॥

मात्स्ये—

वैशाखी पौर्णमासी च ग्रहणं शशिसूर्ययोः ।
पौर्णमासी तु या माघे आषाढी कार्तिकी तथा ॥
उत्तरायणं द्वादशी वा तस्यां दत्तं महाफलम् ।
आहिताग्निर्द्विजो यश्च तद्देयं तस्य पार्थिव ॥
यथा येन विधानेन तन्मे निगदतः शृणु ।
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप ॥
आदावेव समास्तीर्य शोभनं वस्त्रमाविकम् ।
ततः सशृङ्गं सखुरमास्तरेत्कृष्णमार्गणम् ॥
कर्तव्यं रुक्मशृङ्गं च रूप्यदन्तं तथैव च ।
लाङ्गूलं मौक्तिकैर्युक्तं तिलच्छन्नं तथैव च ॥
तिलैरात्मसमं कृत्वा वाससाऽऽच्छादयेद्बुधः ।
सुवर्णनाभं तत्कुर्यादलङ्कुर्याद्विचक्षणः ॥
रत्नैर्गन्धैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ।
कांस्यपात्राणि चत्वारि दिक्षु दद्याद्यथाक्रमम् ॥

मृण्मयेषु च पात्रेषु पूर्वादिषु क्रमेण तु।
घृतं क्षीरं दधि क्षौद्रमेवं दद्याद्यथाविधि॥

सरत्नानि कांस्यपात्राणि चतुर्दिक्षु स्थापयेत्। मृण्मयानि पात्राणि च घृतक्षीरदधिमधुपूर्णानि पूर्वादिदिक्षु स्थाप्यानि।

चम्पकस्य तथा शाखाः सव्रणं कुम्भमेव च।
बाह्योपस्थानकं कृत्वा शुभचित्तो निवेशयेत्॥

दानदेशाद्बाह्ये उप समीपे स्थानं यस्येति कुम्भविशेषणम्।

जीर्णवस्त्रेण पीतेन सर्वाङ्गानि च मार्जयेत्॥
धातुमयानि पात्राणि पादेष्वस्य तु दापयेत्।

धातुविशेषाः पात्रमध्यस्थानि द्रव्याणि च मन्त्रतः प्रयोगे बोध्यानि।

तिलपूर्णं ततः कृत्वा वामपादे निवेशयेत्।
मधुपूर्णं तु तत्कृत्वा पादे वै दक्षिणे न्यसेत्॥

एतत्पात्रद्वयं पश्चिमपादयोः स्थाप्यम्।

ऊर्ध्वपादे त्विमे कार्ये ताम्रस्य रजतस्य च॥

ऊर्ध्वपादे अग्रपादयोः। एकवचनमविवक्षितम्। ताम्रपात्रं तिलपूर्णं दक्षिणपादे। रजतपात्रं मधुपूर्णं सव्यपाद इति व्यवस्था। प्रयोगे वक्ष्यमाणमन्त्रात्। 'सुवर्णपात्रमक्षतपूर्णं मध्ये स्थापयेत्' इति हेमाद्रिः।

हेममुक्ताविद्रुमं च दाडिमं बीजपूरकम्।
प्रशस्तपत्रे श्रवणे खुरे शृङ्गाटकानि च॥
एवंकृत्वा यथोक्तेन सर्वशाकफलानि च।
तत्प्रतिग्रहविद्विद्वानाहिताग्निर्द्विजोत्तमः॥
स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या चाप्यलङ्कृतः।
प्रतिग्रहश्च तस्योक्तः पुच्छदेशे महीपते॥
सुवर्णनाभिकं दद्यात्प्रीयतां वृषभध्वजः।

अथ प्रयोगः। पूर्वोक्तकाले गोमयेनोपलिप्ते देशे अविलोमनिर्मितं कम्बलं तदुपरि सशृङ्गं खुरं बहिर्लोम प्राग्ग्रीवं कृष्णाजिनमास्तीर्य सुवर्णशृङ्गं रूप्यदन्तं मौक्तिकपुच्छं सुवर्णनाभं च तत्कृत्वा तदुपर्याप्तप्रमाणांस्तिलान्संस्थाप्य वाससा सञ्छाद्य सगन्धरत्नानि चत्वारि कांस्यस्य घृतदुग्धदधिमधुयुतानि मृदश्च प्रागादिदिक्षु दानदेशाद्बहिश्चम्पकशाखां सव्रणकुम्भं च संस्थाप्य देशकालादि स्मृत्वा 'ब्रह्मलोक-

प्राप्तिकामः सप्तजन्मोपात्तपापनाशकामः पितृपुत्रमृत्युपरिहारभार्याधन-देशाद्यवियोगकामः प्रलयावधिस्वर्गप्राप्तिसर्वभूदानफलसर्वलोकगतिकामो मोक्षकाम ईश्वरप्रीतिकामो वा कृष्णाजिनदानं करिष्ये, इति सङ्कल्प्य जीर्णपीतवाससा स्वाङ्गानि संमृज्य—

यानि पापानि काम्यानि मया लोभात्कृतानि वै ।
लोहपात्रप्रदानेन प्रणश्यन्तु ममाशु वै ॥

इतिमन्त्रेण सतिल लोहपात्रं कृष्णाजिनस्य वामे पादे ।

यानि काम्यानि पापानि कर्मोत्थानि कृतानि वै ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

इति समधुकांस्यं दक्षिणे ।

परापवादपैशून्याद्वृथा मांसस्य भक्षणात् ।
तत्रोत्थितं च मे पापं ताम्रपात्रात्प्रणश्यतु ॥

इति सतिलं ताम्रपात्रं वामहस्ते ।

कन्यानृतं गवां चैव परदारप्रधर्षणम् ।
रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मे ॥

इति समधुरौप्यपात्रं दक्षिणहस्ते ।

जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना ।
सुवर्णपात्रदानात्तन्नाशयाशु जनार्दन ॥

इति साक्षतहेमपात्रं मध्ये हेममुक्ताविद्रुमदाडिममातुलिङ्गानि सन्निधावाम्रादिप्रशस्तपत्रे कर्णयोः शृङ्गाटकानि च खुरेषु संस्थाप्य वस्त्रयुग्मादिनाऽऽहिताग्निविप्रदेयद्रव्यं च संपूज्य 'प्रीयतां वृषभध्वजः' इत्युक्त्वा देशकालौ सङ्कीर्त्य 'अमुकसगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमिदं कृष्णाजिनं कुशोपरि गतं कम्बलोपरि स्थितं वस्त्राच्छादिततिलराशिं सुवर्णशृङ्गं रौप्यखुरं रूप्यदन्तं मुक्तालाङ्गूलं सुवर्णनाभं पञ्चरत्नालङ्कृतं चतुर्दिगवस्थितघृतक्षीरदधिमधुपूर्णपात्रचतुष्टयं सकांस्यपात्रं तिलमध्वक्षतपूर्णलोहकांस्यताम्ररौप्यहैमपात्रं हेममुक्ताविद्रुमदाडिमबीजपूरपत्रशृङ्गाटकयुतं शिवदैवतममुकसगोत्रोऽमुकशर्माऽमुककामोऽहं संप्रददे न मम इति ।

एतद्दक्षिणा तु गारुडे—

शतनिष्कसमोपेतं तदर्द्धार्द्धमथाऽपि वा ।
अतो न्यूनं न दातव्यमधिके फलमूर्जितम् ॥

तत्रैव—

अस्पृश्यः स द्विजो राजन्चितियूपसमो हि यः ।
दाने च श्राद्धकाले च दूरतः परिवर्जयेत् ॥
स्वगृहात्प्रेष्य तं विप्रं मण्डले स्नानमाचरेत् ।
तद्वस्त्रं कुम्भसहितं नीत्वा क्षेप्यं चतुष्पथे ॥
स्वपितृपुत्रमरणं वियोगं भार्यया सह ।
धनदेशपरित्यागं न चैवेहाप्नुयात्कचित् ॥
समग्रभूमिदानस्य फलं प्राप्नोति मानवः ।
सर्वाँल्लोकाँश्च चरति कामचारी विहङ्गमः ॥
आभूतसंप्लवं यावत्स्वर्गमाप्नोत्यसंशयम् ।

इति कृष्णाजिनदानं तत्प्रयोगश्च ।

अथ शय्यादानम् ।

महाभारते—

शय्यामास्तरणोपेतां सुप्रच्छादनसंस्कृताम् ।
प्रदद्याद्यस्तु विप्राय शृणु तस्यापि यत्फलम् ॥
सुरूपः सुभगः श्रीमान्स्त्रीसहस्रैस्तु संवृतः ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥

विष्णुसंहितायाम्—

दर्पणैः पादत्राणैश्च नानाद्रव्यैर्विभूषणैः ।
चतुष्कोणेषु संस्थाप्य यथाशक्त्या युधिष्ठिर ॥
घृतकुङ्कुमगोधूमपूर्णपात्रं जलस्य च ।
शय्यां संपूजयित्वा तु मद्भक्तो मत्परायणः ॥
कृताञ्जलिपुटो भूत्वा कुर्याच्छय्यां प्रदक्षिणाम् ।
नमः प्रमाण्यै देव्यैति प्रणम्य च चतुर्दिशम् ॥
ब्राह्मणाय दरिद्राय श्रुताध्ययनशीलिने ।
तथाऽङ्गमन्त्रज्ञानविदुषे शय्यां दद्याद्विचक्षणः ॥

फले च—

तस्मादिन्द्रपुरं गच्छेत्सेव्यमानोऽप्सरोगणैः ।
षष्टिवर्षसहस्राणि क्रीडित्वा च यथासुखम् ॥

इन्द्रलोकात्परिभ्रष्ट इह लोके नृपो भवेत् ।
षष्टियोजनविस्तीर्णे स्वामी भवति मण्डले ॥

भविष्योत्तरे—

तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ।
दन्तपत्रचितां रम्यां हेमपट्टैरलङ्कृताम् ॥
हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानकाम् ।
प्रच्छादनपटीयुक्तां धूपगन्धादिवासिताम् ॥
तस्यां संस्थापयेद्धैमं हरिं लक्ष्मीसमन्वितम् ।
उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥
विज्ञेयः पाण्डवश्रेष्ठ स निद्राकलशो बुधैः ।
ताम्बूलकुङ्कुमक्षौद्रकर्पूरागुरुचन्दनम् ॥
दीपिकोपानहच्छत्रं चामरासनभोजनम् ।
पार्श्वेषु स्थापयेद्भक्त्या सप्त धान्यानि चैव हि ॥
शयनस्थं च भवति यदन्यदुपकारकम् ।
भृङ्गारकरकाद्यं च पञ्चवर्णं वितानकम् ॥
शय्यामेवंविधां कृत्वा ब्राह्मणायोपपादयेत् ।
सपत्नीकाय संपूज्य पुण्येऽह्नि विधिपूर्वकम् ॥
यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ इति ॥

अथ प्रयोगः । अष्टदले तिलप्रस्थं तस्मिन्स्वास्तीर्णां शय्यां तस्याः समन्तात्सङ्कल्पवाक्ये वक्ष्यमाणानि कुम्भादीनि संस्थाप्य, अद्येत्यादि सर्वपापक्षयपूर्वकाप्सरोगणसेव्ययुतविमानकरणकेन्द्रपुरगमनोत्तरषष्टिसहस्रवर्षतदधिकरणकक्रीडनस्त्रीसहस्रसंवरणसहितस्वर्लोकमहितत्वतदुत्तरषष्टियोजनमण्डलराज्यानन्तरशिवैक्यकामः शय्यां दास्ये, इति सङ्कल्प्य सपत्नीकं विप्रं शय्यां तदुपरि प्रतिमायां लक्ष्मीयुतं नारायणं च संपूज्य प्रदक्षिणीकृत्य ‘ नमः प्रमाण्यै देव्यै ’ इति चतुर्दिक्षु प्रणम्य तिथ्याद्युल्लेखनान्ते सर्वपापक्षयेत्यादिकामान्तं पूर्वोक्तं सङ्कल्पवाक्यममुकसगोत्रायामुकशर्मणे ब्राह्मणायेमां शय्यामीशानादिकोणचतुष्टयस्थापितघृतकुम्भगोधूमजलपूर्णपात्रामुच्छीर्षकप्रदेशस्थापितघृतपूर्णकलशां हंसतूलीप्रच्छन्नां शुभगण्डोपधानकां प्रच्छादनपटीसमधान्यताम्बू-

लादर्शकुङ्कुमक्षोदकर्पूरागुरुचन्दनदीपिकोपानच्छत्रचामरासनभोजन-जलपात्रपञ्चवर्णवितानलक्ष्मीनारायणप्रतिमायुतामङ्गिरोदैवत्याममुकस-गोत्रोऽमुकशर्माऽहं संप्रददे न मम इति । शय्योपवेशितविप्रहस्ते कुशो-दकं क्षिपेत् । मन्त्रः—

यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाऽप्यशून्याऽस्तु तथा जन्मनि जन्मनि । इति ॥

हिरण्यं दक्षिणा ।

इति शय्यादानप्रयोगः ।

अथ शिवाय शय्यादानम् ।

हंसतूलीसमायुक्तामृद्धां खट्वामलङ्कृताम् ।
सर्वोपकरणोपेतां शिवे शय्यां निवेदयेत् ।
शिवं देवीसमायुक्तं पैष्टं कृत्वा निवेदयेत् ।

इति शिवधर्मे शिवशय्यादानम् ॥

अथ वस्त्रदानम् ।

नन्दिपुराणे—

वस्त्रं यश्चार्थिने दद्याच्छुभं चापि यदृच्छया ।
स भवेद्धनवाञ्श्रीमान्बृहस्पतिपुरे वसेत् ॥

विष्णुधर्मोत्तरे—

वासो हि सर्वदैवत्यं सर्वप्रायोज्यमुच्यते ।
वस्त्रदानात्सुवेषः स्याद्रूपद्रविणसंयुतः ॥
युक्तो लावण्यसौभाग्यैर्विरोगश्च तथा द्विजः ।

तथा—

दत्त्वा कार्पासिकं वस्त्रं स्वर्गलोके महीयते ।
दत्त्वा सरोमं तत्रापि फलं दशगुणं भवेत् ॥
आविकं वसनं दत्त्वा भूदानां लोकमाप्नुयात् ।
छागं दत्त्वा चाऽऽङ्गिरसं क्षौमं दत्त्वा बृहस्पतेः ॥
वसूनां लोकमाप्नोति कुशकौशेयवाससा ।
कृमिजं च तथा दत्त्वा सोमलोके महीयते ॥
अग्निष्टोममवाप्नोति दत्त्वैव मृगलोमिकाम् ।

तथा—

सर्वदो वस्त्रदः प्रोक्तो यतः सर्वत्र वस्त्रवान् ।
अवाप्नोति च धर्मज्ञस्तद्धि तस्माद्विशिष्यते ॥

भविष्यपुराणे—

यो वस्त्रं भानवे दद्यादहतं च महाधनम् ।
स हेलिलोकमासाद्य वन्द्यते त्रिदशैरपि ॥

आदित्यपुराणे—

वह्नेर्वस्त्रप्रदानेन ब्रह्मलोके महीयते ॥

नन्दिपुराणे—

वासांसि तु विचित्राणि सारवन्ति बृहन्ति च ।
स्नापितानि शिवे दद्यात्सकोशानि नवानि च ॥
यावत्तद्वस्त्रतन्तूनां परिमाणं विधीयते ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

स्नापितानि प्रक्षालितानि ।

वाराहपुराणे—

क्षौमाम्बराणि यो दद्यात्पत्रोर्णानि च चक्रिणे ।
कार्पासजानि वा दद्याद्भक्तो वित्तानुसारतः ॥
तत्र वासांसि यावन्तस्तन्तूनां परमाणवः ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥

देवीपुराणे—

अण्डजैर्वाण्डजैर्वाऽपि वस्त्रैरभ्यर्च्य शैलजाम् ।
संभूष्याभरणैः शक्र चक्रवर्तित्वमाप्नुयात् ॥

नन्दिपुराणे—

उष्णीषदायिनो मर्त्या जायन्ते कुक्कुटोज्ज्वलाः ।
विस्तीर्णराजवंशेषु सितच्छत्राग्र्यलक्षणाः ॥

नारदीये—

निष्किञ्चनेभ्यो दीनेभ्यः शीतवातमहातपैः ।
अर्दितेभ्यः करुणया वस्त्रमूर्णं ददाति यः ॥
न तस्य सुकृतं वक्तुं त्रिदशैरपि शक्यते ।
आधिव्याधिविनिर्मुक्तः सोऽक्षयं सुखमश्नुते ॥

इति वस्त्रदानम् ।

अथासनदानम्।

आसनं यः प्रयच्छेत्तु सुपात्राय च भक्तितः।
स दिव्यान्भोगसंभोगानरोगः सर्वदाऽश्नुते॥

महाभारते—

यस्तु दद्याद्द्विजाग्र्येभ्यो भक्त्या चामरमुज्ज्वलम्।
स भूपत्वमवाप्नोति निःशेषेऽवनिमण्डले॥

पद्मपुराणे—

चन्द्रोदयं तु यो दद्याद्भक्त्या यच्छति पुण्यधीः।
न तस्य श्रेयसामन्तः कदाचिदपि जायते॥

चन्द्रोदयो वितानम्।

अथ भाजनदानम्।

स्कन्दपुराणे—

भाजनं यः प्रयच्छेत्तु हैमं रत्नविभूषितम्।
सोऽप्सरःशतसङ्कीर्णो विमाने दिवि मोदते॥
राजतं यः प्रयच्छेत्तु विप्रेभ्यो भाजनं शुभम्।
स गन्धर्वपदं प्राप्य उर्वश्या सह मोदते॥
ताम्रं यो भाजनं दद्याद्ब्राह्मणाय विशेषतः।
स भवेद्यक्षराजस्य प्रभुर्बलसमन्वितः॥

ब्रह्मपुराणे—

औदुम्बराणि भाण्डानि यो दद्यादायसानि च।
महतीं वृद्धिमाप्नोति दुर्लभां त्रिदशैरपि।

औदुम्बराणि ताम्रमयानि।

मदनरत्ने—

उत्तमं पलषष्टिश्च चत्वारिंशत्तु मध्यमम्।
द्वादशाधमपात्रं तु ताम्रमत्रायसं स्मृतम्॥

अत्रायसशब्दो धातुमात्रपरः।

वासांसि वरणे दद्यादुपवीतं समाल्पकम्॥
चन्दनं चैव ताम्बूलं विप्रं संपूजयेत्ततः।
घृतादिद्रव्यसंपूर्णं हेमगर्भं सवस्त्रकम्॥

प्रतिष्ठाप्य तु तत्पात्रं ब्राह्मणाय निवेदयेत् ।
ततस्तूर्णं सुवर्णं तु प्रतिष्ठार्थं द्विजाय तु ॥

दद्यादिति शेषः ।

चन्द्रलोके वसेत्तावद्यावदिन्द्राश्चतुर्दश । इति ॥

घृतादीनि चात्र चतुर्दश । तत्रैव—

घृतं च नवनीतं च दधि दुग्धं तथैव च ।
शर्करागुडतैलानि तिला मधु जलं तथा ॥
लवणं च फलं सर्वं यावद्रत्नसमन्वितम् ।
एवं चतुर्दशयुतं दातव्यं विधिना नृप । इति ॥

पाद्मे—

सर्वेषामेव दानानामुत्तमं पात्रमिष्यते ।
यथाविधि प्रदातव्यं वित्तशाठ्यविवर्जितम् ॥
अत्यन्तनिर्द्धनो योऽपि सोऽपि दद्याद्यथाविधि ।
चतुर्दशार्द्धमर्द्धं वा दद्यादन्नफलेप्सया । इति ॥

वाराहे—

अथातः संप्रवक्ष्यामि पात्रदानमनुत्तमम् ।
कृत्वा ताम्रमयं पात्रं यथाविभवविस्तरम् ॥
उमया सहितं शम्भुं हरिं सश्रीकमेव च ।
कृत्वा तु काञ्चनीं दिव्यां संपूज्यावाहनादिभिः ॥
प्रतिमां ब्राह्मणे दद्यात्पात्रभूते विचक्षणे ।

अत्रैव पूर्वोक्तघृतादिचतुर्दशद्रव्याधिकान्नकार्पासोपादानेन तद्द्रव्यपूर्णषोडशपात्रदानं युक्तम् ।

अथ स्थालीदानम् ।

भविष्योत्तरे—

दत्त्वा ताम्रमयीं स्थालीं पलानां पञ्चभिः शतैः ।
अशक्तस्तु तदर्द्धेन चतुर्थांशेन वा पुनः ॥
सर्वशक्तिविहीनस्तु मृन्मयीमपि कारयेत् ।
सुगभीरोदरदर्वीं दृढदण्डकडच्छकम् ॥

कडच्छकशब्देन दर्व्यभिधीयते ।

मृदुतन्दुलनिष्पन्नस्विन्नक्षीरेण पूरिताम् ॥

उपदंशोदकयुतां घृतपात्रसमन्विताम् ।
कृतपार्श्वां धौतवर्णां चर्चितां चन्दनेन च ॥
स्थाप्य मण्डलके वस्त्रैः पुष्पधूपैरथार्चयेत् ।
आदित्येऽहनि संक्रान्तौ चतुर्दश्यष्टमीषु च ॥
एकादश्यां तृतीयायां विप्राय प्रतिपादयेत् ।
ज्वलज्ज्वलनपार्श्वस्थैस्तण्डुलैः सजलैरपि ॥
न भवेद्भोज्यसंसिद्धिर्भूतानां पिठरं विना ।
त्वं सिद्धिः सिद्धिकामानां त्वं पुष्टिः पुष्टिमिच्छताम् ॥
अतस्त्वां प्रणतो याचे सत्यं कुरु वचो मम ।
ज्ञातिबन्धुसुहृद्वर्गविप्रेषु स्वजने तथा ॥
अभुक्तवत्सु नाश्नीयात्तथा भव वरप्रद ।
इत्युच्चार्य प्रदातव्या हण्डिका द्विजपुङ्गवे ॥
पुष्टितुष्टिप्रदा पुंसां सर्वान्कामानभीप्सितान् ।

इति स्थालीदानम् ।

अथापाकदानम् ।

तत्र शुभावतीं प्रति पिप्पलादः—

यद्येन पूर्वविहितं तदसौ प्राप्नुते फलम् ।
कर्मभूमिरियं राज्ञि माऽतः शोचितुमर्हसि ॥
तस्माद्भवद्भिर्यद्दत्तं प्राप्तं तद्राज्यमुत्तमम् ।
भृत्यमित्रादिसंबन्धो न दत्तः प्राप्यते कुतः ॥

इत्यादिना हेमरूप्यताम्रनिर्मितनानाविधभाण्डानां सर्वसंपत्करमापाकदानमुक्तवान्

इत्यापाकदानम् ।

अथ विद्यादानाख्यमतिदानम् ।

तत्र पुराणदानं तत्संख्या च वाराहे—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ॥
आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं तथा ॥

वाराहं द्वादशं प्रोक्तं स्कान्दं चैव त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं तथा ॥
मात्स्यं च गारुडं चैव ब्रह्माण्डमन्तिमं तथा ।
अन्यान्युपपुराणानि सहिरण्यानि पर्वणि ॥
लिखित्वा यः प्रयच्छेत्तु स विद्यापारगो भवेत् । इति ॥

क्रमेण कालविशेषः ।

(ब्राह्मं जलधेनुयुतं वैशाख्यां, फलं ब्रह्मलोकः । पाद्मं हेमपद्मयुतं ज्येष्ठायां, फलमश्वमेधस्य । वैष्णवमाषाढ्यां स्वर्णधेनुसहितं, फलं वरुणलोकः । शैवं गुडधेनुसहितं श्रावण्यां, फलं शिवलोकः । भागवतं हेमसिंहयुतं प्रौष्ठपद्यां, परमपदं फलम् । नारदीयमाश्विन्यां हेमयुतं, परा सिद्धिः फलम् । मार्कण्डेयं हेमहस्तियुतं कार्तिक्यां, फलं पौण्डरीकस्य । आग्नेयं हेमपद्मतिलधेनुयुतं मार्गशीर्ष्यां, सर्वक्रतुफलम् । भविष्यं गुडप्रस्थयुतं पौष्यां, फलं विष्णुलोकः । ब्रह्मवैवर्तं चामरयुतं माघ्यां, फलं ब्रह्मलोकः । लैङ्गं तिलधेनुयुतं फाल्गुन्यां, फलं शिवसाम्यम् । वाराहं गुडयुतं चैत्र्यां, फलं विष्णुपदम् । स्कान्दं हेमशूलयुतं मकरसंक्रान्तौ, फलं शिवपदम् । वामनं हेमवामनयुतं मेषे, विष्णुपदं फलम् । कौर्मं हेमकूर्मयुतं कर्के, गोसहस्रफलम् । मात्स्यं हेममत्स्ययुतं तुलायां, पृथ्वीदानफलम् । गारुडं हेमहंसयुतं विषुवे, सिद्धिः फलम् । ब्रह्माण्डं कौशेयसुवर्णधेनुयुतं व्यतीपाते, राजसूयफलम् । एतन्मूलं मात्स्ये । क्वचिच्छैवस्थाने वायवीयग्रहणम् । एतदन्यान्युपपुराणानि तद्दाने फलं विद्या विष्णुलोकः, सर्वत्र विष्णुप्रीतिर्वा । अत्र दानवाक्यमपि, देशकालौ सङ्कीर्त्य तत्फलमुल्लिख्य । देयदक्षिणा न पृथगिति केचित् । युक्तं तत्तद्दाने युक्तधेन्वादिकैव दक्षिणा)

रामायणं भारतं च दत्त्वा स्वर्गे महीयते ।
पुराणं तर्कशास्त्रं च छन्दोलक्षणमेव च ॥
वेदं मीमांसकं दत्त्वा शिवधर्मं च वै नृप ।
सप्तद्वीपपृथिव्यां च राजराजो भवेद्धि सः ॥

तथा—

धर्मशास्त्रं नरो दत्त्वा स्वर्गलोके महीयते ।

अथ वेददानम् ।

गारुडे—

आम्नायरूपाणि विधाय सम्यग्घैमानि पूर्वोदितलक्षणानि ।
विशुद्धनानामणिभूषितानि ऋगादिवेदक्रमतो निवेश्य ॥

वेदरूपं महाभूतघटे उक्तम् ।

वासांसि देयानि यथाक्रमेण पीतानि शुक्लान्यथ लोहितानि ।
नीलानि चैवं कुसुमानि दत्त्वा संपूज्य गन्धाक्षतधूपदीपैः ॥
आमोदिमोदकयुतं घृतपायसं च सक्षौद्रमन्नमथ पूपघृतं क्रमेण ।
तेभ्यो निवेद्य विधिवत्प्रयतः प्रणम्य
सम्यक्प्रदक्षिणविधिं विदधीत विद्वान् ॥

तेषां पूजाविधिः कार्यो गायत्र्या धीमतां वर ।
व्याहृत्य व्याहृतीः कुर्यादावाहनविसर्जने ॥
मन्त्रैरेतैस्ततः कुर्यादमीषामनुमन्त्रणम् ।
ऋग्वेद पद्मपत्राक्ष मां त्वं रक्ष क्षिपाऽशुभम् ॥
शरणं त्वां प्रपन्नोऽस्मि देहि मे हितमद्भुतम् ।
यजुर्वेद नमस्तेऽस्तु लोकत्राणपरायण ॥
त्वत्प्रसादेन मे कामा निखिलाः सन्तु सन्ततम् ।
सामवेद महाबाहो त्वं हि साक्षादधोक्षजः ॥
प्रसादसुमुखो भूत्वा कृपयाऽनुगृहाण माम् ।
अथर्वन्सर्वभूतानां त्वदायत्ते हिताहिते ॥
शांतिं कुरुष्व देवेश पुष्टिमिष्टां प्रयच्छ नः ।
इति संप्राप्य देवेशान्विप्रेभ्यः प्रतिपादयेत् ॥
प्रदद्यादेकमेकस्मै सुवर्णं त्रिपलान्वितम् ।
दद्यादेकपलोपेतमेकैकमिह दुर्बलः ॥
अथ स्वशक्तितो वाऽपि दानमेषां विधीयते ।
एतदेव प्रमाणं स्यादेतेषां मूर्तिनिर्मितम् ॥
अनधीतवतो वेदान्वेददानविधिस्त्वयम् ।
सदाऽध्ययनयुक्तस्य वेदाध्ययनमेव हि ॥

याज्ञवल्क्यः—

सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।
तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम् । इति ॥

इति वेददानविधिः ।

अथ पुस्तकदानम् ।

भविष्ये—

शास्त्रसद्भावविदुषे वाचके च प्रियंवदे ।
वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत् । इति ॥

तथा—

कपिलादानसहस्रेण सम्यग्दत्तेन यत्फलम् ।
तत्फलं समवाप्नोति पुस्तकैकप्रदानतः ॥
पुराणं भारतं वाऽपि रामायणमथाऽपि वा ।
दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्यते । इति ॥

तच्च हेमरूप्यगजदन्तकाष्ठादिकृतेऽन्योन्यसंश्लिष्टे यन्त्रे न्यस्य संपूज्य देयम्, इति पुराणान्तरे ।

एवं त्रिविधं विद्यादानं—पुस्तकदानं, प्रतिमादानमध्यापनं चेति ।

इति पुस्तकदानम् ।

अथ छत्रोपानद्दानम् ।

पाद्मे—

असिपत्रवने मार्गे क्षुरधारासमन्विते ।
तीक्ष्णातपं च तरति छत्रोपानत्प्रदो नरः ॥

इति छत्रोपानद्दानम् ।

अथाऽन्नदानम् ।

स्कान्दे—

अन्नदः प्राणदः प्रोक्तः प्राणदश्चाऽपि सर्वदः ।
तस्मादन्नप्रदानेन सर्वदानफलं लभेत् । इत्यन्नदानम् ॥

महार्णवे ब्रह्मगीतायाम्—

वर्षाशनं श्रोत्रियाय ह्यर्थिने च विशेषतः ।
असाध्यव्याधिना भक्तो धनं दद्याद्विशालये ॥

इति वर्षाशनदानम् ।

अथ ताम्बूलदानम् ।

भविष्यपुराणे—

ताम्बूलं यो नरो दद्यात्प्रत्यहं नियमान्वितः ।
देवेभ्योऽथ द्विजातिभ्यः स महाभाग्यमश्नुते ॥

इति ताम्बूलदानम् ।

अथ गन्धद्रव्यदानम् ।

स्कान्दे—

नरः सुवर्णदेहत्वं गन्धदानादवाप्नुयात् ।
भोगवाञ्जायते नित्यं शरीरं नास्य तप्यति ॥

विष्णुधर्मोत्तरे—

सौभाग्यकारकं दानं प्रोक्तं वै कुङ्कुमस्य तु ।
तथा कर्पूरदानेन सर्वकामानवाप्नुयात् ॥
मृगदर्पप्रदानेन स प्राज्यं राज्यमश्नुते । इति ॥

गन्धद्रव्यदानं लैङ्गे—

तुष्टिर्भवेत्सदाकालं प्रदानाद्गन्धमाल्ययोः । इति ॥

नन्दिपुराणे—

धूपदः सुरभिर्नित्यं पुष्पदः सुभगस्तथा । इति ॥

अथ रत्नदानानि ।

जाबालिः—

रत्नानि यो द्विजे दद्याद्बहुमूल्यानि मानवः ।
अलङ्कारनिमित्तं वा देवताभ्योऽतियत्नतः ॥
सन्तापपापनिर्मुक्तो मुक्तिमेव समश्नुते ।

स्कान्दे—

विद्रुमाणां प्रदानेन रुद्रलोकं व्रजेन्नरः ।
सर्वपापविनिर्मुक्तो मुक्तादानेन जायते ॥
लोकमाप्नोति दानेन नरो वज्रस्य वज्रिणः ।
तथा प्रमदैर्गोमेदैर्मोदते नन्दने वने ॥
सर्वे ग्रहाः प्रतुष्यन्ति पुष्परागप्रदानतः ।
गारुत्मतैर्लभन्ते नियतं जयति श्रियः ॥

वैडूर्यैः सूर्यलोकं च पद्मरागैररोगताम् ।
प्रदानादिन्द्रलोकानां नीलानां भाजनं भवेत् ॥
सुखी शङ्खप्रदानेन शक्तिः शुक्तिप्रदानतः ।
इति रत्नदानम् ।

अथ गलन्तिकादानम् ।

भविष्योत्तरे—

वसन्तसमयं ज्ञात्वा गत्वा देवालयं परम् ।
शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः ॥
स्रवन्तं कारयेत्कुम्भमच्छिद्रं देवमस्तके ।
अनेन विधिना दद्या नरो मासचतुष्टयम् ॥
ततः कर्कटके प्राप्ते देवं पञ्चामृतेन तु ।
संस्नाप्य पूजयेद्गन्धैर्नैवेद्यैश्च मनोरमैः ॥
प्रणिपत्य महेशानं मन्त्रमेतमुदीरयेत् ।
ॐ नमः शङ्करः शम्भुर्भवो धाता शिवो हरः ॥
प्रीयतां मे महादेवो जलकुम्भप्रदानतः ।
एवं सङ्कल्प्य दाता तु पश्चादागत्य वेश्मनि ॥
स्वशक्त्या शिवभक्तांश्च विप्रमुख्यांश्च भोजयेत् ।
एवं यः कुरुते भीष्मे जलदानक्रियां हरेः ॥
यावद्बिन्दूनि लिङ्गस्य पतितानि न संशयः ।
स वसेच्छाङ्करे लोके तावत्कोट्यो नरेश्वर ॥
इति गलन्तिकादानम् ।

अथ प्रपादानम् ।

भविष्योत्तरे—

अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि विप्रकथिते मण्डपं कारयेत्ततः ॥
पुरस्य मध्ये पथि वा चैत्यवृक्षतलेऽथवा ।
सुशीतलतरं रम्यं किञ्चिज्जासनसंयुतम् ॥
तन्मध्ये स्थापयेद्रम्याम्मणिकुम्भांश्च शोभनान् ।

ब्राह्मणः शीलसंपन्नो भृतिं दत्त्वा यथोचिताम् ॥
प्रपापालः प्रकल्प्योऽसौ बहुपुत्रपरिच्छदः ।
एवंविधां प्रपां कृत्वा शुभेऽह्नि विधिपूर्वकम् ॥
यथाशक्त्या नरश्रेष्ठ प्रारम्भे योजयेद्द्विजान् ।
ततश्चोत्सर्जयेद्विप्रं मन्त्रेणानेन मानवः ॥
प्रपेयं सर्वसामान्यभूतेभ्यः प्रतिपादिता ।
अस्याः प्रदानात्पितरस्तृप्यन्तु प्रपितामहाः ॥
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ।
त्रिपक्षं च महाराज जीवानां जीवनं परम् ॥
प्रत्यहं कारयेत्तस्यां भोजनं शक्तितो द्विजान् ।
अनेन विधिना यस्तु ग्रीष्मे तापप्रणाशनम् ॥
पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु ।
कपिलाशतदानस्य सम्यग्दत्तस्य यत्फलम् ॥
तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः ।
पूर्णचन्द्रप्रतीकाशं विमानमधिरुह्य सः ॥
याति देवेन्द्रनगरं पूज्यमानोऽप्सरोगणैः ।
त्रिंशत्कोट्यो हि वर्षाणां यक्षगन्धर्वसेवितम् ॥
पुण्यक्षयादिहागत्य चतुर्वेदो द्विजो भवेत् ।
ततः परं पदं याति पुनरावृत्तिदुर्लभम् ॥

इति प्रपादानम् ।

अथोदकदानम् ।

स्कन्दपुराणे—

त्रयाणामपि लोकानामुदकं जीवनं स्मृतम् ।
पवित्रममृतं यस्मात्तद्देयं पुण्यमिच्छता ॥

भविष्यपुराणे—

ग्रीष्मे चैव वसन्ते च पानीयं यः प्रयच्छति ।
वक्तुं जिह्वासहस्रेण तस्य पुण्यं न शक्यते ॥

नन्दिपुराणे—

योऽपि कश्चित्तृषार्ताय जलपानं प्रयच्छति ।
स नित्यतृप्तो भवति स्वर्गे युगशतं नरः ॥

गारुडपुराणे—

मूल्येन क्रीत्वा घर्मान्ते जलदानं प्रयच्छति ।
स याति चन्द्रसालोक्यं शुभमालांशुकावृतः ॥
क्षीरकुल्याः समायान्ति तथाऽऽयान्ति मधुस्रवाः ।
घृतदध्युदकास्तस्य समुद्रा वशवर्तिनः ॥

देवलः—

सतोयां पथिके विप्रे प्रदद्यात्करयन्त्रिकाम् ।
फलं स कूपखातस्य नूनमाप्नोति मानवः ॥

महाभारते—

पिपासया न म्रियते सोपच्छन्दश्च जायते ।
नैवाप्नुयाच्च व्यसनं करकान्यः प्रयच्छति ॥

आदित्यपुराणे—

यो ददाति घटीमात्रं कुण्डिकाः करकांस्तथा ।
तृषार्तस्य तथा घर्मे लभते शीतलं जलम् ।

इत्युदकदानम् ॥

अथ धर्मघटदानम् ।

विष्णुः—

शीतलेन सुगन्धेन वारिणा पूरितं घटम् ।
शुक्लचन्दनदिग्धाङ्गं पुष्पदामोपशोभितम् ॥
दध्योदनमृतं कुर्याच्छरावं तस्य चोपरि ।
उपानच्छत्रसंयुक्तं धर्माख्यं कल्पयेद्घटम् ॥
पुष्पाक्षतं गृहीत्वा तु इमं मन्त्रमुदीरयेत् ।
ॐ नमो विष्णुरूपाय नमः सागरसंभव ॥
अपाम्पूर्णोद्धरास्मांस्त्वं दुःखसंसारसागरात् ।
उदकुम्भो मया दत्तो ग्रीष्मकाले दिने दिने ॥
उदकुम्भप्रदानेन प्रीयतां मधुसूदनः ।

भविष्योत्तरे—

प्रत्यहं धर्मघटको वस्त्रसंवेष्टितो नवः ।
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥
वसन्तग्रीष्मयोर्मध्ये यः पानीयं प्रयच्छति ।

पले पले सुवर्णस्य फलमाप्नोति मानवः ॥
मार्गशीर्षात्समारभ्य उदकुम्भं तु यः क्षिपेत् ।
दिने दिने सहस्रस्य गवां पुण्यफलं लभेत् ॥
तस्यैवोद्यापनं कार्यं मासि मासि नरोत्तम ।
मण्डकावेष्टकाभिश्च पक्वान्नैः सार्वकामिकैः ॥
उद्दिश्य शङ्करं विष्णुं ब्रह्माणमथवा पितॄन् ।
सतिलं प्रोक्षयित्वा तु मन्त्रेणानेन मानवः ॥
एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सततं मम सन्तु मनोरथाः ॥
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
वसन्तग्रीष्मसमये गोप्रदानफलं लभेत् ॥
इति धर्मघटदानम् ॥

अथ यज्ञोपवीतदानम् ।

बौधायनः—
यज्ञोपवीतदानेन जायते ब्रह्मवर्चसी ।
तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता ॥
अत्रिः—
क्षौमजं वापि कार्पासं पट्टसूत्रमथापि वा ।
यज्ञोपवीतं यो दद्याच्छ्वेतवर्णं सुशोभनम् ॥
यथाशक्त्या विधानेन अग्निष्टोमफलं लभेत् ।
नन्दिपुराणे—
यज्ञोपवीतदानेन सुरेभ्यो ब्राह्मणाय वा ।
भवेद्विप्रश्चतुर्वेदः शुद्धधीर्नात्र संशयः ॥
विष्णुप्रोक्ते—
उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् ।
आयुष्माञ्जायते तेन कर्मणा मानवो भुवि ॥
इति यज्ञोपवीतदानम् ।

अथ यष्टिदानम् ।

यष्टिं ये च प्रयच्छन्ति नेत्रहीनेऽथ दुर्बले ।
तेषां सुविपुलः पन्थाः फलमूलोपशोभितः ॥

ब्रह्मवैवर्ते—

ये पङ्गुभ्यश्च पान्थेभ्यो दीनेभ्योऽपि दयालवः ।
यष्टिदानं प्रकुर्वन्ति निरोगास्ते न संशयः ॥
पङ्गोश्चरणकार्याणि यष्टिः प्रकुरुते सदा ।
गोसर्पादिनिवृत्तिश्च जायते यष्टिधारणात् ॥
भीतानां शरणं यष्टिर्गच्छतां निशि वा वने ।
शङ्कां पङ्काहिवातोत्थां नियमेन निरस्यति ॥

स्कन्दपुराणे—

यतिभ्यो वैणवं दण्डं द्विजेभ्योऽपि खनित्रकम् ।
प्रदाय परलोके स यमदण्डं न गच्छति ॥
प्रददाति यथावर्णं यो दण्डं ब्रह्मचारिणे ।
स महापुरुषो लोके ब्रह्मवर्चसमश्नुते ॥

इति यष्टिदानम् ।

अथेन्धनदानम् ।

वह्निपुराणे—

य इन्धनानि काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
सर्वार्थास्तस्य सिद्ध्यन्ति तेजस्वी चापि जायते ॥
हेमन्ते शिशिरे चैव पुण्योऽग्निं यः प्रयच्छति ।
सर्वलोकप्रतापार्थं पुण्यां गतिमवाप्नुयात् ॥

यमः—

इन्धनानां प्रदानेन दीप्ताग्निर्भुवि जायते ।

महाभारते—

यश्चेन्धनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
प्रतापनार्थं राजेन्द्र प्रवृत्ते शिशिरे नरः ॥
सिद्ध्यन्त्यर्थाः सदा तस्य कार्याणि त्रिविधानि च ।
उपर्युपरि शत्रूणां वपुषा दीप्यते नरः ॥
भगवांश्चास्य सुप्रीतो वह्निर्भवति नित्यशः ।
न तं त्यजन्ति पशवः संग्रामेषु जयत्यपि ॥

इतीन्धनदानम् ।

अथाग्नीष्टिकादानम् ।

भविष्योत्तरे कृष्ण उवाच—

आदौ मार्गशिरे मासि शोभने दिवसे शुभे ।
अग्नीष्टिकां कारयित्वा सुखासनवतीं दृढाम् ॥
देवाङ्गणे मठे हट्टे विस्तीर्णे चत्वरे तथा ।
उभयोः सन्ध्ययोः कृत्वा सुशुद्धं काष्ठसञ्चयम् ॥
ततः प्रज्वालयेदग्निं हुत्वा व्याहृतिभिः क्रमात् ।
ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥
अनेन विधिना कृत्वा प्रत्यहं ज्वालयेत्ततः ।
यदि कश्चित्क्षुधार्तः स्याद्भोजनं तस्य कल्पयेत् ॥

अथ प्रयोगः । अद्येत्यादि हेमन्तशिशिराख्यऋतुद्वयं यावत्प्रत्यहं शीतार्तप्राणितापनार्थमिमामग्नीष्टिकां विष्णुदैवतां षष्टिसहस्रषष्टिशताविच्छिन्नब्रह्मलोकमहितत्वानन्तरसर्वार्थसंपन्नचतुर्वेदित्वप्राप्तिकामोऽहमुत्सृजे । अस्य दानस्य फलमपि तत्रैव—

विमाने चार्कसङ्काशे समारूढो महामते ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥
अर्चितोऽत्यन्तसन्तुष्टो ब्रह्मलोके महीयते ।
इह लोकेऽवतीर्णश्च चतुर्वेदो द्विजो भवेत् ॥
नीरुजः सत्यवादी च अग्नितेजाः प्रभावतः ।

चैत्ये सुरालयसभावसथेषु भव्यां येऽग्नीष्टिकां प्रचुरकाष्ठवतीं प्रदद्युः ।
हेमन्तशैशिरऋतौ सुखदां जनानां कार्याग्निदीप्तममलं वपुरावहन्ति ॥

इत्यग्नीष्टिकादानम् ।

अथ दीपदानम् ।

संवर्तः—

देवागारे द्विजानां वा दीपं दत्वा चतुष्पथे ।
मेधावी ज्ञानसंपन्नश्चक्षुष्मांश्च सदा भवेत् ॥

गरुडपुराणे—

नीलकण्ठस्य मोक्षेण गयायां च तिलोदकैः ।
वर्षासु दीपदानेन पितॄणामनृणो भवेत् ॥

नीलकण्ठस्य मोक्षो नीलकण्ठवृषोत्सर्गः ।

यस्तु ब्राह्मणगेहेषु दीपमालां प्रयच्छति ॥
स निर्जित्य तमो घोरं ज्योतिषां लोकमाप्नुयात् ।

महाभारते—

दीपप्रदानं वक्ष्यामि फलयोगमनुत्तमम् ।
यथा येन यदा चैव प्रदेया यादृशाश्च ते ॥
ज्योतिस्तेजः प्रकाशं वाऽप्यूर्ध्वगत्याऽपि चार्णवे ।
प्रदानं तेजसां तस्मात्तेजो वर्द्धयते नृणाम् ॥
अन्धं तमस्तमिस्रं च दक्षिणायनमेव च ।
उत्तरायणमेतस्माद्दीपदानं प्रशस्यते ॥
यस्मादूर्ध्वगतेस्तत्तु तमसश्चैव भेषजम् ।
तस्मादूर्ध्वगतिर्दाता भवेत्तत्रेति निश्चयः ॥

विष्णुधर्मोत्तरे—

महावर्तिः सदा देया भूमिपाल महाफला ।
कृष्णपक्षे विशेषेण तत्रापि च विशेषतः ॥
अमावास्या विनिर्दिष्टा द्वादशी च महाफला ।
आश्वयुज्यामतीतायां कृष्णपक्षस्य या भवेत् ॥
अमावास्या सदा पुण्या द्वादशी च विशेषतः ।
देवस्य दक्षिणे पार्श्वे देया तैलतुला नृप ॥
फलाष्टकयुता राजन्वर्तिं तत्रैव दापयेत् ।
वाससा तु समग्रेण सोपवासो जितेन्द्रियः ॥
महावर्तिद्वयमिदं सकृद्दत्त्वा महीयते ।
गिरिशृङ्गेषु दातव्यं नदीनां पुलिनेषु च ॥
चतुष्पथेषु रथ्यासु ब्राह्मणानां च वेश्मसु ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥
दीपदानेन सर्वत्र महत्फलमुपाश्नुते ।
यावन्त्यक्षिनिमेषाणि दीपः प्रज्वलते नृप ॥
तावन्त्येव स राजेन्द्र वर्षाणि दिवि मोदते ।
दीपदानेन राजेन्द्र चक्षुष्मानिह जायते ॥
रूपसौभाग्ययुक्तस्तु धनधान्यसमन्वितः ।

इति दीपदानम् ।

अथाऽभयदानम्।

संवर्तः—

भूताऽभयप्रदानेन सर्वान्कामानवाप्नुयात्।
दीर्घमायुश्च लभते सदा च सुखितो भवेत्॥

रामायणे—

बद्धाञ्जलिपुटं दीनं याचन्तमपराधिनम्।
न हन्याच्छरणं प्राप्तं सतां धर्ममनुस्मरन्॥

महाभारते—

लोभाद्द्वेषाद्भयाद्वाऽपि यस्त्यजेच्छरणागतम्।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः॥

अथ मासेष्वनुक्रमेण दानानि।

विष्णुधर्मोत्तरे—

तिलप्रदानान्माघे तु याम्यं लोकं न गच्छति।
प्रियङ्गु फाल्गुने दत्त्वा प्रियो भवति भूतले॥
चैत्रे चित्राणि वस्त्राणि दत्त्वा सौभाग्यमश्नुते।
अपूपानां प्रदानेन वैशाखे स्वर्गमश्नुते॥
छत्रदानं तथा ज्येष्ठे सर्वान्कामान्समश्नुते।
आषाढे चन्दनं देयं सकर्पूरं महाफलम्॥
श्रावणे वस्त्रदानस्य कीर्तितं सुमहत्फलम्।
प्रौष्ठपदे तथा मासे प्रदानात्फाणितस्य च॥
आश्विने घृतदानेन रूपवानभिजायते।
कार्तिके दीपदानेन सर्वथोज्ज्वलमाप्नुयात्॥
लवणं मार्गशीर्षे तु दत्त्वा सौभाग्यमश्नुते।
पौषे काञ्चनदानेन परां तुष्टिं तथैव च॥
पुष्पाणां च सिते पक्षे दानं लक्ष्मीकरं मतम्।
फलानां च तथा दानं कृष्णपक्षे महाफलम्॥

अथाश्वत्थसेचनम्।

भविष्योत्तरे—

उदकुम्भप्रदानेऽपि ह्याशक्तो यः पुमान्भवेत्।

तेनाऽश्वत्थतरोर्मूलं सेव्यं नित्यं जितात्मना ॥
सर्वपापप्रशमनं सर्वदुःस्वप्ननाशनम् ।
सर्वरोगप्रशमनं नित्यं सन्ततिवर्द्धनम् ॥
अश्वत्थरूपी भगवान्प्रीयतां मे जनार्दनः ।
इत्युच्चार्य नमस्कृत्य प्रत्यहं पापनाशनम् ॥
यः करोति तरोर्मूले सेकं मासचतुष्टयम् ।
सोऽपि तत्फलमाप्नोति श्रुतिरेषा सनातनी ॥

इत्यश्वत्थसेचनम् ।

अथ पान्थोपचारः ।

गरुडपुराणे—

पान्थं परिचरेद्यस्तु शयनासनभोजनैः ।
स स्वल्पेन प्रयासेन जयति क्रतुयाजिनम् ॥
दत्त्वा वासो विवस्त्राय रोगिणे रुक्प्रतिक्रियाम् ।
तृषार्ताय जलं दत्त्वा मृष्टमन्नं बुभुक्षवे ॥
पथिकाय यथावित्तं सर्वं तरति दुष्कृतम् ।
अध्वन्यमनुमान्यापि शाकमूलफलैर्जलैः ॥
सकृत्सत्कृत्य वाचाऽपि श्रेयसो भाजनं भवेत् ।

तथा—

अभावे तृणभूम्यम्बुपत्रेन्धनफलानि च ।
दत्त्वाऽऽगतायाऽनिर्विण्णः स्वर्गं याति प्रियेण वा ॥

विष्णुधर्मोत्तरे—

उपानद्भ्यां च छत्रेण श्रान्तं संयोज्य मानवः ।
संस्थाप्य शुभदेशे तु क्षणाद्बहुफलं लभेत् ॥

तथा—

मूल्येन वासयित्वापि परभारं विचक्षणः ।
अश्वमेधस्य यज्ञस्य फलं दशगुणं भवेत् ॥

तथा—

चौरेभ्यो रक्षणं कृत्वा शक्रलोके महीयते ।

स्कान्दे—

यस्तु मार्गपरिश्रान्तं द्विजातिं यामकर्षितम् ।
तैलेनाभ्यञ्जयेन्मर्त्यः स सुखी मोदते चिरम् ॥

सर्पिषा कपिलाधेनोरथवाऽन्येन सर्पिषा।
उत्तरायणमासाद्य योऽभ्यञ्जयति धूर्जटिम्॥
महापूजां घृतेनैव तस्मिन्नेव दिने शिवे।
कृत्वा मनुष्यो लभते राज्यं निहतकण्टकम्॥
सर्पिःपलसहस्रेण गोविन्दस्य शिवस्य च।
महास्नानं नरः कृत्वा ब्रह्महत्यां तरिष्यति॥

नन्दिपुराणे—

पादाभ्यङ्गं तु यो दद्यात्पान्थाय परिखेदिने।
स शुभाभरणैः पादैर्वन्दिभिर्नित्यवन्दितः॥
भवेन्नृपो महाभागो मण्डले दशयोजने।
संवाह्याऽध्वपरिश्रान्तं पादाभ्यङ्गादिना नरः॥
धर्मस्य पुरमाप्नोति सर्वकामगुणोज्ज्वलः।
दत्त्वा वारि सुसंस्पर्शं पादाभ्यां च द्विजातये॥
उच्छिष्टमार्जनाद्वाऽपि गोदानफलमश्नुते।

भविष्यपुराणे—

ब्राह्मणस्य तु यो भक्त्या पादौ प्रक्षाल्य शक्तितः।
घृतेनाऽभ्यज्य पादौ तु विष्णुलोके महीयते॥

इति पान्थोपचारः।

अथ गोपरिचर्या।

विष्णुः—

गवां कण्डूयनं चैव सर्वकल्मषनाशनम्।
गवां ग्रासप्रदानेन स्वर्गलोके महीयते॥

आदित्यपुराणे—

लवणं च यथाशक्त्या गवां यो वै ददाति च।
तेषां पुण्यकृतां लोकान्गवां लोकं व्रजन्ति ते॥

महाभारते—

कृत्वा गवार्थे शरणं शीतवातक्षमं महत्।
आसप्तमं तारयति कुलं भरतसत्तम॥

हारीतः—

द्वौ मासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत्।
चतुर्थे त्रिस्तनं चैव यथान्यायं यथाबलम्॥

ब्रह्मपुराणे—

आदौ विचार्य वयसः परिमाणं बलं रुचिम् ।
आकस्मिकं तु दातव्यं पुण्यार्थं तु गवाह्निकम् ॥

विष्णुधर्मोत्तरे—

गवां कण्डूयनं चैव सर्वकल्मषनाशनम् ।
तासां शृङ्गोदकं नाम जाह्नवीजलसन्निभम् ॥

तथा—

दत्त्वा परगवे ग्रासं पुण्यं स महदाप्नुयात् ।
शिशिरं सकलं कालं ग्रासं परगवे तथा ॥
दत्त्वा स्वर्गमवाप्नोति संवत्सरशतानि षट् ।
अग्रभक्तं नरो दद्यान्नित्यमेव तथा गवाम् ॥
मासाष्टकेन लभते नाकलोकं समायुतम् ।
सायं प्रातर्मनुष्याणामशनं स्मृतिनिर्मितम् ॥
तत्रैकमशनं दत्त्वा गवां नित्यमतन्द्रितः ।
द्वितीयं यः समश्नाति तेन संवत्सरं नरः ॥
गवां लोकमवाप्नोति यावन्मन्वन्तरं द्विजः ।
शीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम ॥
वारुणं लोकमाप्नोति क्रीडत्यब्दगणायुतम् ।

तथा—

सिंहव्याघ्रभयत्रस्तां पङ्कलग्नां जले गताम् ।
गामुद्धृत्य नरः स्वर्गे कल्पभोगानुपाश्नुते ॥
तासां संस्पर्शनं धन्यं सर्वकल्मषनाशनम् ।
दानेन च तथा तासां कुलान्यपि समुद्धरेत् ॥
उदक्यासूतिकादोषो नैव तत्र गृहे भवेत् ।

इति गोपरिचर्या ।

अथ सहस्रादिविप्रभोजनविधिः ।

भारते—

ब्राह्मणानां सहस्रं तु संभोज्य भरतर्षभ ।
नरः पापात्प्रमुच्येत पापेष्वभिरतोऽपि यः ॥
भोजयित्वा दशशतं नरो वेदविदां नृप ।

न्यायविद्धर्मविदुषां स्मृतिभाष्यविदां तथा ।
न याति नरकं घोरं संसारांश्च न सेवते ।
सर्वकामसमायुक्तः प्रेत्य चाऽप्यश्नुते सुखम् । इति ॥

लक्षभोजनादौ तु न विधेः क्वाप्युपलम्भः । यस्तु मैथिलग्रन्थे क्वचिदुल्लेखि सोऽप्यनाकरः ।

अथैतस्य प्रयोगः । देशकालौ सङ्कीर्त्य सकलपापप्रमोचननरकागमनसंसारासेवनैहिकसर्वकामसंप्रात्यामुष्मिकसुखप्राप्तिरूपफलकामः सहस्रब्राह्मणान्भोज्यादिनाऽऽतृप्ति तर्पयिष्ये इति सङ्कल्प्य पुण्याहं वाचयित्वाऽऽदिकालाष्टकं संपूज्य ब्राह्मणान्धूपदीपवस्त्रालङ्कारैः संपूज्य सघृताकेनाऽऽतृप्ति भोजयेत् । ततोऽग्निस्थापनाग्निमुखान्तं कृत्वा केशवादिभिर्द्वादशनामभिः स्वाहान्तैर्घृतेन हुत्वा दध्यन्नं ब्राह्मणेभ्यो निवेद्य स्विष्टकृदादि कृत्वा ब्राह्मणेभ्यश्छत्रोपानहौ प्रत्येकं दत्त्वा स्वस्ति वाच्य तान्क्षमापयित्वाऽऽशिषो गृहीत्वा विसर्जयेत् । ततो भुक्तशेषं बन्धुसहितौ दम्पती हृष्टमनस्कौ भुञ्जीयातामिति । अनेन चैकस्मिन्नेव दिने सहस्रादिभोजनं कार्यमिति प्रतीयते । शिष्टास्त्वनेकदिनैरपि समापयन्ति, तत्र मूलं विचारणीयम् ।

अथ नानाद्रव्यदानमन्त्राः ।

हेमाद्रौ व्रतखण्डे—

धन्यं करोति दातारमिह लोके परत्र च ।
तस्मात्प्रदीयते धान्यमतः शान्तिं प्रयच्छ मे ॥
अन्नेन जायते विश्वं प्राणिनां प्राणरक्षणम् ।
तण्डुला विश्वदेवत्याः पाकेनाऽन्नं भवन्ति ये ॥
पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि ।
तस्मात्तन्दुलदानेन प्रीयतां विश्वदेवताः ॥ तण्डुलानाम् ।
यस्मादन्नमयो जम्बूद्वीपे गोधूमसंभवः ।
गन्धर्वसौख्यश्चतद अतः शान्तिं प्रयच्छ मे ॥ गोधूमानाम् ।
धान्यराजाश्च माङ्गल्या द्विजप्रीतिकरा यवाः ।
तस्मादेषां प्रदानेन ममास्त्वभिमतं फलम् ॥ यवानाम् ।
मुद्गबीजानि वै यस्मात्प्रियाणि परमेष्ठिनः ।
तस्मादेषां प्रदानेन प्रीतिः सिद्धास्तु मे सदा ॥ मुद्गानाम् ।

यस्मान्मधुवधे काले विष्णुदेहसमुद्भवाः ।
पितृप्रीतिकरा माषा अतः शान्तिं प्रयच्छ मे ॥ माषाणाम् ।
पुरा गोवर्द्धनोद्धारसमये हरिभक्षिताः ।
चणकाः सर्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥ चणकानाम् ।
अग्निवर्णोद्भवा नाम बलकीर्तिप्रवर्द्धनाः ।
कुलत्थाः सर्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥ कुलत्थानाम् ।
तिलाः पापहरा नित्यं विष्णुदेहसमुद्भवाः ।
तिलदानेन सर्वं मे पापं नाशय केशव ॥ तिलानाम् ।
तिलाः स्वर्णमया युक्ता दुरितक्षयकारकाः ।
विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥
स्वर्णतिलानाम् ।

तिलाः पुण्याः पवित्राश्च सर्वकामकराः शुभाः ।
शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः ॥
यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥
सहिरण्यतिलपात्रस्य ।

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥ अन्नस्य ।
चन्द्रमण्डलमध्यस्थं चन्द्राम्बुजसमप्रभम् ।
दध्यन्नं तस्य दानेन प्रीयतां वामनो मम ॥ दध्यन्नस्य ।
दध्यन्नं सोपदंशं च ब्रह्मविष्णुशिवात्मकम् ।
प्रीयतां धर्मराजो हि तद्दानान्मम सर्वदा ॥
सोपदंशदध्यन्नस्य ।

पानीयसहितं चैव सदध्योदनपात्रकम् ।
समर्चितं च सफलं सदक्षिणं गृहाण मे ॥ सपानीयदध्यन्नस्य ।
सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः ।
नारायणः प्रसन्नः स्यात्कृसरान्नप्रदानतः ॥ कृसरान्नस्य ।
पायसं परमानन्दं सर्वदात्तोत्तमोत्तमम् ।
सर्वदैवतयोग्यं च श्रेयःपुष्टिं प्रयच्छतु ॥ पायसान्नस्य ।
केशवप्रीतिदा भक्ष्याः शम्भुब्रह्मार्कतुष्टिदाः ।

पृथग्विधापूपकाद्या यच्छन्तु बलमौरसम् ॥ भक्ष्याणाम् ।
आदित्यतेजसोत्पन्नाः सर्वमङ्गलकारकाः ।
मण्डकाः सर्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥ मण्डकानाम् ।
आदित्यतेजसोऽभ्यक्तं ज्ञातिश्रैष्ठ्यकरं परम् ।
दत्तं ते मम विप्र त्वं प्रतीच्छाऽपूपमुत्तमम् ॥ अपूपान्नस्य ।
प्राजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि ।
तस्मात्सक्तून्प्रयच्छामि प्रीयतां मे प्रजापतिः ॥ सक्तूनाम् ।
अलक्ष्मीहरणं नित्यं नित्यं सौभाग्यवर्द्धनम् ।
क्षीरं मङ्गलमायुष्यमतः शान्तिं प्रयच्छ मे ॥ दुग्धस्य ।
कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परम् ।
नवनीतं प्रदास्यामि बलं पुष्टिं च देहि मे ॥ नवनीतस्य ।
कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्विवर्द्धनं दातुराज्यं पातु सदैव माम् ॥ आज्यस्य ।
याऽलक्ष्मीर्यच्च मे दौःस्थ्यं सर्वगात्रे व्यवस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥

यज्ञार्थाज्यस्य ।

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहारमाज्ये देवाः प्रतिष्ठिताः ॥

पापक्षयार्थाज्यस्य ।

तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे ॥ तैलस्य ।
अमृतस्य कुलोत्पन्ना इक्षुधारातिशर्करा ।
सूर्यप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे ॥ शर्करायाः ।
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ।
तस्मादस्याः प्रदानेन मम सन्तु मनोरथाः ॥ खण्डस्य ।
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात्परां शान्तिं ददस्व गुड सर्वदा । गुडस्य ।
इक्षुदण्डं महापुण्यं रसालं सर्वकामदम् ।
तुभ्यं दास्यामि तेनाशु प्रीयतां परमेश्वरः ॥ इक्षोः ।

यस्मात्पितृणां श्राद्धे त्वं प्रीतं मध्वमृतोत्तमम् ।
तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात् ॥ मधुनः ।
वारिपूर्णघटोपेतं देवत्रयमयं यतः ।
प्रीयतां धर्मराजस्तु दानेनानेन पुण्यदः ॥ उदकुम्भस्य ।
यमासनन्ति विश्वेशं विश्वनाथमुमासुतम् ।
विघ्नेश्वर क्षिप्रचर तुभ्यं दास्याम्यभीष्टदम् ॥
गणेशप्रतिमायाः ।
ददामि भानुं भवते सर्वोपस्कारसंयुतम् ।
मनोभिलषितावाप्तिं करोतु मम भास्करः ॥ सूर्यमूर्तेः ।
त्वया सुराणाममृतं विहाय हालाहलं संहृतमेव यस्मात् ।
तथाऽसुराणां त्रिपुरं च दग्धमेकेषुणा लोकहितार्थमीश ॥
त्वद्रूपदानादहमप्यदोषो दोषैर्विमुक्तस्तु गुणान्प्रपद्ये ।
तथा कुरु त्वं शरणं प्रपद्ये मयि प्रभो देववर प्रसादम् ॥
शिवमूर्तेः ।
प्रसीदतु भवो नित्यं कृत्तिवासा महेश्वरः ।
पार्वत्या सहितो देवो जगदुत्पत्तिकारकः ॥ उमामहेश्वरयोः ।
शिवशक्त्यात्मकं यस्माज्जगदेतच्चराचरम् ।
यस्मादनेन सर्वं मे करोतु भगवाञ्छिवम् ॥
कैलासवासी गौरीशो भगवान्भगनेत्रवित् ।
चराचरात्मको लिङ्गरूपी दिशतु वाञ्छितम् ॥ लिङ्गस्य ।
इदं मारकतं लिङ्गं रौप्यपीठसमन्वितम् ।
धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम् ॥
संप्रदद्यां विधानेन यथोक्तं फलमस्तु मे । मरकतलिङ्गस्य ।
काश्मीरलिङ्गपक्षे तु इदं काश्मीरजम् , इति वदेत् ।
महाकोशनिवासेन चक्राद्यैरुपशोभितम् ।
अस्य देव प्रदानात्तु मम सन्तु मनोरथाः ॥ शालग्रामस्य ।
महाकोशनिवास त्वं महादेवो महेश्वरः ।
प्रीयतां तव दानेन ततः शान्तिं प्रयच्छ मे ॥ शिवनाभस्य ।
शङ्कुकर्णप्रलम्बोष्ठलम्बभ्रूर्दीर्घनासिक ।
अष्टनेत्र चतुर्वक्त्र विस्तीर्णशतयोजन ॥
व्यतीपात नमस्तेऽस्तु सोमसूर्यसुत प्रभो ।

यद्दानादिकृतं सर्वं तदक्षय्यमिहाऽस्तु मे ॥ व्यतीपातस्य ।
विधुन्तुद नमस्तेऽस्तु सिंहिकानन्दनाऽव्यय ।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ स्वर्णनागस्य ।
जन्मान्तरसहस्रेषु यत्कृतं दुरितं मया ।
स्वर्णपात्रप्रदानेन शान्तिरस्तु सदा मम ॥ स्वर्णपात्रस्य ।
त्वदुद्भवो जगत्स्रष्टुर्वेधसो हेमपङ्कज ।
पद्मावास हरेर्नाभिजात मां पाहि सर्वदा ॥ स्वर्णपद्मस्य ।
कान्तारवनदुर्गेषु चौरव्यालाकुले पथि ।
हिंसकाश्च न हिंसन्तु सिंहदानप्रभावतः ॥ स्वर्णसिंहस्य ।
हिरण्यगर्भसंभूतं सौवर्णं चाङ्गुलीयकम् ।
धर्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः ॥ अङ्गुलीयस्य ।
काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदम् ।
विभूषणं प्रदास्यामि विभूषयतु मां सदा ॥ वलयस्य ।
क्षीरोदमथनोद्भूतमुद्धृतं कुण्डलद्वयम् ।
श्रिया सह समुद्भूतं ददे श्रीः प्रीयतां मम ॥ कुण्डलस्य ।
अगम्यागमनं चैव परदाराभिमर्शनम् ।
रौप्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥ रौप्यपात्रस्य ।
असुरेषु समुद्भूतं रजतं पितृवल्लभम् ।
तस्मादस्य प्रदानेन रुद्रः संप्रीयतां मम ॥ रजतस्य ।
परापवादपैशुन्यादभक्ष्यस्य च भक्षणात् ।
तत्प्रजातं च यत्पापं ताम्रपात्रात्प्रणश्यतु ॥ ताम्रपात्रस्य ।
यानि पापानि काम्यानि कर्मोत्थानि कृतानि वै ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥ कांस्यपात्रस्य ।
यानि पापान्यनेकानि मया यानि कृतानि च ।
लोहपात्रप्रदानेन तानि नश्यन्तु सर्वदा ॥ लोहपात्रस्य ।
यथा रत्नेषु सर्वेषु सर्वदेवा व्यवस्थिताः ।
तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥ रत्नस्य ।
ताम्रपर्ण्यर्णवोत्पन्ना वर्णाद्याः कल्पवर्णिताः ।
मुक्ताः शुक्त्युद्भवाः सन्तु भुक्तिमुक्तिप्रदा मम ॥ मुक्तानाम् ।
यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ।

दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह ॥ भुवः ।
सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तशस्यफलदा अतः शान्तिं प्रयच्छ मे ॥ सस्यभूमेः ।
सदा रोहन्ति बीजानि फालकृष्टे महीतले ।
तव प्रदानात्सफला मम सन्तु मनोरथाः ॥ कृष्टक्षेत्रस्य ।
इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।
तव दानप्रसादेन ममाऽस्त्वभिमतं फलम् ॥ गृहस्य ।
समाश्रयं प्रयच्छामि प्रीयतां मे जगन्निधिः ॥ आश्रयस्य ।
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ गोः ।
यमद्वारे महाघोरा या सा वैतरणी नदी ।
तां तर्तुकामो यच्छामि उत्तारय सुखेन माम् ॥ वैतरण्याः ।
यस्मात्त्वं पृथिवी सर्वा धेनुर्वै कृष्णसन्निभा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥ कृष्णधेनोः ।
मृत्यूत्क्रान्तिप्रवृत्तस्य सुखोत्क्रान्तिविवृद्धये ।
तुभ्यं संप्रददे नाम्ना गां समुत्क्रान्तिसंज्ञिताम् ॥ उत्क्रान्तिधेनोः।
इन्द्रादिलोकपालानां या राजमहिषी शुभा ।
महिषीदानमाहात्म्यात्साऽस्तु मे सर्वकामदा ॥
धर्मराजस्य साहाय्यं यस्याः पुत्रः प्रतिष्ठितः ।
महिषासुरस्य जननी साऽस्तु मे सर्वकामदा ॥ महिष्याः ।
महिषीं वत्ससंयुक्तां सुशीलां च पयस्विनीम् ।
रक्तवस्त्रेण पुष्पेण दत्त्वा मृत्युं जयेन्नरः ॥ मृत्युमहिष्याः ।
वाङ्मनःकायजनितं यत्किंचिन्मम दुष्कृतम् ।
तत्सर्वं विलयं यातु त्वद्दानेनोपसेवितम् ॥ मेष्याः ।
रोमत्वङ्मांसमज्जाद्यैः सर्वोपकरणैः सदा ।
जगतः संप्रवृत्तोऽसि त्वामतः प्रार्थये शिवम् ॥ ऊर्णमेषस्य ।
देवानां यो मुखं हव्यवाहनः सर्वपूजितः ।
तस्य त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः ॥
अग्निमान्द्यं पूर्वकर्मविपाकोत्थं तु यन्मम ।
तत्सर्वं नाशय क्षिप्रं जठराग्निं विवर्द्धय ॥ मेषस्य ।
त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रं भवती परा ।

त्वत्प्रसूतौ स्थिता यज्ञास्तस्माच्छान्तिकरी भव ।। अजायाः ।
गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्मणे दत्तां त्वं हि विप्र समाश्रय ।। कन्यायाः ।
इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता ।
तव कर्मकरी भोग्या यथेष्टं भद्रमस्तु मे ।। दास्याः ।
यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या ममाप्यशून्याऽस्तु तस्माज्जन्मनि जन्मनि ।। शय्यायाः ।
देवदेव जगन्नाथ विश्वात्मन्दत्तयाऽनया ।
प्रभो शिबिकया देव प्रीतो भव जनार्दन ।। शिबिकायाः
रथाय रथनाथाय नमस्ते विश्वकर्मणे ।
विश्वभूताय नाथाय अरुणाय नमो नमः ।। रथस्य ।
कण्टकोच्छिष्टपाषाणवृश्चिकादिनिवारणे ।
पादुके संप्रदास्यामि विप्र प्रीत्या प्रगृह्यताम् ।। पादुकयोः ।
उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदावतः शान्तिं प्रयच्छ मे ।। उपानहोः ।
इहाऽमुत्राऽऽतपत्राणं कुरु केशव मे प्रभो ।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम् ।। छत्रस्य ।
कमण्डलुर्जलैः पूर्णः स्वर्णगर्भः सुलक्षणः ।
अर्पितस्ते महासेन प्रसन्नस्तेन मे भव ।। कमण्डलुनः ।
शशाङ्ककरसङ्काश हिमडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामराऽमरवल्लभ ।। चामरस्य ।
पत्रिका सर्वजन्तूनां शैत्यानन्दकरी शुभा ।
पितॄणां तृप्तिदा नित्यमतः शान्तिं प्रयच्छ मे ।। व्यजनस्य ।
दर्शनेन त्वमादर्श नृणां मङ्गलदायकः ।
शौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ।। दर्पणस्य ।
भगवन्शूलहस्तेश दक्षाध्वरविनाशन ।
तवायुधप्रदानेन शूलं नश्यतु मे सदा ।। शूलस्य ।
सर्वग्रहर्क्षतारेश सर्वेशस्त्वं हि भास्कर ।
संक्रान्तिशूलदोषं मे निवारय दिवाकर ।। संक्रान्तिशूलस्य ।
त्वं देवानां मनुष्याणां रक्षसामायुधावसि ।

तस्मादेषां प्रदानेन शान्तिर्भवतु सर्वदा ॥ आयुधस्य ।
सोमोद्भवानि दारूणि जातवेदःप्रियाणि च ।
तस्मादेषां प्रदानेन श्रियं देहि विभावसो ॥ काष्ठानाम् ।
शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
सुवेषधारि त्वं यस्माद्वासः शान्तिं प्रयच्छ मे ॥ वस्त्रस्य ।
रक्तवस्त्रयुगं यस्मादादित्यस्य प्रियं सदा ।
प्रदानादस्य मे सूर्य अतः शान्तिं प्रयच्छ मे ॥

रक्तवस्त्रयुग्मस्य ।

धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम् ।
सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहम् ॥ कृष्णवस्त्रस्य ।
और्णपट्टमनुध्येयं स्वर्णबीजं तव प्रभो ।
दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥ और्णपट्टस्य ।
और्णमेषसमुत्पन्ना शीतवातभयापहा ।
यस्मात्तुषारहारी स्यादतः शान्तिं प्रयच्छ मे ॥ ऊर्णायाः ।
ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितम् ।
ब्राह्मं तन्मेऽस्तु ते देव ब्रह्मसूत्रप्रदानतः ॥ उपवीतस्य ।
अष्टाविंशतिसंख्याकै रुद्राक्षैर्योजिता मया ।
अर्पिता तव हस्ते त्वं गृहाण सुरसैन्यप ॥ अक्षमालायाः ।
सर्वविद्याश्रयं ज्ञानकरणं ललिताक्षरम् ।
पुस्तकं संप्रयच्छामि प्रिया भवतु भारती ॥ पुस्तकस्य ।
कर्पूरः कदलीभूतो देवदेवप्रियः सदा ।
भाग्योत्तमो नृपाणां च तद्दानात्सुखमस्तु मे ॥ कर्पूरस्य ।
जटामांस्युद्भवां देवीमेणनाभिसमुद्भवाम् ।
भक्त्याऽहं संप्रदास्यामि मम सन्तु मनोरथाः ॥ गन्धद्रव्यस्य ।
नन्दनावास मन्दारसखे वृन्दारकार्चित ।
चन्दन त्वं प्रदानान्मे सान्द्रानन्दप्रदो भव ॥ चन्दनस्य ।
श्रीखण्डागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम ॥

चन्दनाद्यनुलेपनस्य ।

समस्तेभ्योऽपि वस्तुभ्यः संमुखाऽसि सुरासुरैः ।

विन्यस्ताऽङ्गेषु कस्तूरी सुखदाऽस्तु सदा मम ॥ कस्तूर्याः ।
कन्दर्पदर्पदं यस्मात्कर्पूरं प्राणतर्पणम् ।
अहर्पतिभवस्तापस्त्वद्दानादपसर्पतु ॥ कर्पूरस्य ।
यद्भूदङ्गसंलग्नं कुङ्कुमादिविलेपनम् ।
जलक्रीडासु गोपीनां द्वारवत्यां जलार्पितम् ॥
गोपीचन्दनमित्युक्तं मुनीन्द्रैः कल्मषापहम् ।
तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितम् ॥ गोपीचन्दनस्य ।
मणिकाञ्चनपुष्पाणि मणिमुक्तामयानि च ।
तुलसीपत्रदानस्य कलां नार्हन्ति षोडशीम् ॥
तुलसीपत्रदानाद्वा ब्रह्मणः कायसंभवम् ।
पापं प्रशममायातु सर्वे सन्तु मनोरथाः ॥ तुलस्याः ।
ह्लादयन्ति मनो यस्मात्तस्मात्सुमनसः स्मृताः ।
दत्ता ददत मे नित्यमत्याह्लादं सतीं श्रियम् ॥ पुष्पस्य ।
इदं फलं मया विप्र प्रभूतं पुरतस्तव ।
तेन मे सफलाऽवाप्तिर्भवेज्जन्मनि जन्मनि ॥ फलस्य ।
ब्रह्महत्यादिपापघ्नं ब्रह्मणा निर्मितं पुरा ।
कूष्माण्डं बहुबीजाढ्यमतः शान्तिं प्रयच्छ मे ॥ कूष्माण्डस्य ।
ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ।
अस्य प्रदानाद्ब्रह्माद्याः शिवं ददतु पुष्कलम् ॥ ताम्बूलस्य ।
पूरितं पूगपूगेन नागवल्लीदलान्वितम् ।
चूर्णेन चूर्णपात्रेण कर्पूरपिटकेन च ॥
सपूगखण्डनं दिव्यं गन्धर्वाप्सरसां प्रियम् ।
करक त्वं निरातङ्कं त्वत्प्रसादात्कुरुष्व माम् ॥ ताम्बूलकरण्डस्य ।
लक्ष्मीप्रिया च लक्ष्मीदा लक्ष्मी च वसनप्रिया ।
सौभाग्यकृद्वरस्त्रीणां हरिद्रा श्रीप्रदाऽस्तु मे ॥ हरिद्रायाः ।
जरा नो जायते यस्मान्मण्डनं शुभकर्मसु ।
तस्माज्जीरकदानेन प्रीयतां गिरिजा मम ॥ जीरकस्य ।
कञ्चुकीवस्त्रयुग्मैश्च तथा कर्णावतंसकैः ।
कण्ठसूत्रैश्च भूषाभिः प्रीयतां निमिनन्दिनी ॥

सौभाग्यद्रव्ययुक्तशूर्पस्य ।

रामपत्नि महाभागे पुण्यमूर्ति निरामये ।
गृहाणेमानि शूर्पाणि मया दत्तानि जानकि ॥ शूर्पस्य ।

नवग्रहदक्षिणादानमन्त्रो मात्स्ये ।

कपिले सर्वभूतानां पूजनीयाऽसि रोहिणि ॥
सर्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे । इति ॥

इति नानाद्रव्यदानमन्त्राः ।

इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठकृते भगवन्तभास्करे दानमयूखः संपूर्णः ॥